How Homa etc are responsible for getting success ? What is the seintific process. All such problems have been discussed in explanatory notes. of The process of healiag with Homa has also been given there.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

CHAPTER–IV

This chapter deals with various processes, relating to desires according to veer catagory. All the processes are top-secret and should be learnt from the Guru. The importance of woman and the modest behaviour to-wards them have been described in this chapter.

CHAPTER V

In the first chapter the twenty two letter Mantra of Bhagwati Dakshina Kalika has been derived. The system of the worship of Dakshina Kalika has been depicted from chapter two to four. In this chapter other Mantras along with their divine effects have been described. the effects are narrated from the first complet to the first half of the fourteenth complet. In the second half of the fourteenth and fifteenth complets the fifteen letter Mantra has been derived the form of which is as following—

"नमः आं आं क्रों क्रों फट् स्वाहा कालि कालिके हूं ।"

Describing the twenty one letter Mantra from complet 16th to 18th, giving directions regarding the system of worship described in the first chapter the chapter has been closed. The form of the twenty letter Mantra is as follows—ओं ह्रीं ह्रीं हूँ हूँ क्रीं क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं. This Mantra is called विद्यारत्न the gem of learning. The form of the Mantra derived in the first chapter is different from this one as—क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा । Though ओं has not been mentioned but according to the practice of the Guru-cult, the Jap is performed along with ओं.

CHAPTER VI

Some ways of worship for a Veer Sadhak have been mentioned in this chapter. First to sixth verses deal with chatushpath

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Sadhana (worship with four ways). Seventh verse deals with the dawn to dusk Japa-system in a forest seat of Sadhana. From 8th to the first half of the 10th verse the system of corpse-worship. From the last half of the 10th to the 13th verse the way of controling the minds of people (लोक वशीकरण) has been mentioned.

From 14th to 18th verse teaches the way of attaining accomplishment with the help of some other system. Then from 19th to 27th verse there is a description of the Yantras and the system of worship of the five goddesses—Bhadra Kali, Neela, Neela Pataka, and karalika (stick-worship) has been described. After this up to the 42nd verse some Veer Sadhanas have been mentioned. This chapter is a selection of several worships. Success is sure if a person engages himself learning from a teacher.

CHAPTER VII

In the chapter II, it has been told that Purashcharan (पुरश्चरण) is necessary for success. The number of Jap for पुरश्चरण is one lac and the one tenth if Jap ie (ten thousand) is done separately. As this system requires enormous energy and time, Goddess Parvati requested Bhagwana Bhairava to teach some abriged methods for the feable साधक. God Bhairava related eleven Kinds of abriged system of पुरश्चरण.

1. श्मशान-पीठ-जाप has been recommended for a वीर साधक in the first half of the 2nd verse.

2. "नर-मुण्ड". साधना-विधि (in verses 3rd to 5th.)
3. "शव-साधना"-विधि (in verses 6th & 7th.)
4. "सूर्योदय साधना"-विधि (in verse 8th & 9th.)
5. ग्रहण-साधना विधान (in verse 10th to first half of 12th.)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

6. शरत्-साधना (in verse last half of 12 to Ist half of 15th.)

7. लता-साधना-विधान (in verse last half of 15th to 18th)

Note:—The methods of these seven sadhanas have been related in original text. It seems that they are meant for पशु-साधक or वीर-साधक. but Prasada-Bhashya describes them as worshipable by दिव्य साधक as well. This special feature of प्रसाद-भाष्य, which is based upon scriptural evidence, is considerable.

8. पशु-साधना-विधि (in verse 19th to 21st.)
   Here in accordance with the scriptures the ways of attaining मोक्ष, through sensual enjoyments have been narrated.

9. गुरुसाधनोपदेश (in verse 22nd to first half of 24th).
   It ts the easiest system in दिव्य-साधना.

10. सहस्त्रार साधना (in verse 24th to 27th). The system of Yogic Sadhana system of दिव्य-साधना has been described here.

11. नारी साधना (in verse 28th to 31st)

Thus the seventh chapter contains eleven abriged systems of पुरश्चरण which may be followed even by a weak sadhaka.

CHAPTER VIII

The कुलाचार or समयाचार has been described in this chapter. The sadhaka of this कुलाचार is a wel-wisher of all the beings and he engages himself in sadhana with a self less attitude. He becomes शिव भाव-परायण: through the mantra-japa. He is advised to avoid the following activities:—

1. Showing respect for any other mantra.
2. Denouncement of (a) 'इष्ट-मन्त्रपूजा' (b) women and (c) वीर-साधक.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

3. Userping the veer-sadhaka of wealth.

4. Frowning upon a women and beating her.

The mother won't be pleased with such actions and they are fatal to the siddhis as well. (1–4)

He should regard the universe and himself as feminine. The woman being a girl, youthful, old charming, contemptible, notorious etc. should be heartily respected irrespective of her vices or virtues. Beating or denouning to a woman must be avoided and she should not be given a harsh treatment in thought or action. A cherished desire may be fulfilled if a diety is worshipped with flowers, water, food etc. duly touched to a woman. (5–14)

A महाशङ्ख should be placed near the seat of the chanter of the mantra. जप should be done after taking मधु, मांस, ताम्बूल, etc. food-stuffs and a woman—a high-horn woman particularlly-should be seen and meditated upon. (15–16)

In this आचार, (जप etc.) no rules and regulations are imposed regarding दिक्, काल and आसन etc. In other words the goddess may be worshipped and बलि may be offered, freely in महानिशा at a lonely place. Everything should be regarded sacred and no purification should be done of any article- (16–20)

For worship any time viz: day, night, evening, महानिशा etc. is holy. Perfumes, white or red flowers, विल्व-पत्र, मरूवक etc: should be offered at the worship of the goddess. तुलसीपत्र should be avoided. (20–22)

There is nothing irreligious in the afore said activities. It will lead you to the great religion. The साधक may enter into a

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"यैरव पतनं द्रव्यैः सिद्धि तैरेवे चोदिता ।"

Though the perishable matter is not retainable, still it is the best means of attaining शिवत्वं. A good number of quotations have been taken up from a large member of books. Their writers are praise-worthy and they are my people because they are the off-springs of the affectionate Mother. What ever mistakes may be detected, they are due to me and I solicite their pardon for that.

I have tried to begin repaying the debt of Rishis. Gurudeo will be merciful enough to give me his blessings so that I might complete the series of books in his memory. May Bhagawati give long life to Vaidya Mahavir Prased who inspired me to begin this effect. I pay him my well wishes by heart. I will be ever grateful to my Guru-brothers who always encouraged me. I am also thankful to Shri Shiv Kumar Bhatt and Vaidya Bhagirath Ji who made useful corrections in the draft. Translation work has also made the book useful. Proof corrections have been done by chiranjiva Ramesh Kumar whose all round prosperity is desired. I will also be grateful to the printers specially to Shri Kalyan Prasad Ji and Pt. Giriraj Ji Sharma. Chiranjiva Bhanwar Verma took keen interest. May Bhagawati bless Shri Chiranji lal Sharma who is the owner of all this. Shri Shankar Prasad Shukla lectuerer in Maharja Sanskrit College also did a lot to feel.

"Ayam Sarvottamo Dharm Shivottamo Sarvasiddhihi.

Jitendriyasya Sulabho Vanya Syantant Janmabhih.

How can be overcome over Indriyas ? Its simple and experienced way is depicted. Act and be beneficial. My life has become auspicious as I had a chance to dive in the sea of Shastras. It is dedicated wishing that the book will be fruitful to the readers. The

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

of आकर्षण and वशीकरण have been narratted in verses 19th to 22nd and 23rd to 26th repectively.

Now षड़अक्षर मंत्र is being described While reciting 'ॐ ह्लिं, स्वाहा' the षडक्षर मंत्र of the goddess should be meditated as standing on महादेव lying as a corpse. The goddess has blue colour like a blue lotus. She is carrying a sword in her right hand and a नरमुण्ड in her left hand. Twenty-thousand जप should be performed of षडक्षर-मंत्र. One tenth of this number should be recited while offering होम in a त्रिकोण कुण्ड. The पूजा-प्रयोग of this mantra is like that of एकाक्षर-मंत्र.

This mantra bestows upon The Sadhaka prosperity like that of कुबेर when red lotus is offered in होम.

The offering of बिल्व पत्र bestows a kingdom. With red flower the power of जगद्-वशीकरण, with yellow flower the power of स्तम्भन with multi-flower विद्या like बृहस्पति is aquired. The greatest sins are destroyed by this manɪra. Every thing may be gained with this mantra.

CHAPTER XI

Now the सामान्य साधन of Kali is being described. It removes all the sins and troubles of man and fulfills all his desires. All the sins, poverty, night mares and desasters are destroyed.

A Kaul-Sadhaka should never be insulted. He should be worshipped.

His pleasure bestows aquanance with kali. He is praise worthy to worship the goddess. knowing the कौल-मार्ग.

In want of the knowledge of कौल-मार्ग neither Moksha nor Swarga may be attained. The Kali-Pooja bestows upon us longe-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

nity, health, prosperity, vigour and stontness, fame, poetic art, means of worldly pleasures, Moksh etc:

In order to aquire the poetic power the goddess should be thought of having the white form, Her yellow form, at the time of prayer, black from for मारण and धूम्रवर्ण for curbing the enimies should be meditated. A devotee can shade off all his sins with the performance of मंत्रजप etc. His baseless uttering turns into lucid poem. In order to gain सर्वधर्म, one should perform कुमारी-पूजा. 11–13

In verses 14th 15th a 'प्रयोग' for curbing the enemy has been described.

The सर्वसिद्धि-प्रद काली-मत has been thus related here. All kinds of desired objects are made available by it. She is known as काली as she commands and control over the काल. She should be worshipped for life, means of pleasures and मोक्ष etc:

Told by भैरव this विद्या is known as "कालीमत". It should be kept गोपनीय otherwise it will cause loss of सिद्धि.

It should be related only to a devoted and ज्ञानी साधक ।

Original काली-तंत्र has eleven chapters but some books contain twelve Chapters. It seems to be प्रक्षिप्त according to a majority of scholars. Actually the descriptions in this chapter suggest that is प्रक्षिप्त. But still we thought it proper to publish it with "प्रसाद-भाष्य"

इति श्री काली-तन्त्रम्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Prolough

The aim of the वाम-मार्ग is बिन्दु-सिद्धि. The welfare of individual, family, society and nation depends upon बिन्दु-सिद्धि (semen control). This सिद्धि will provide a good physique and sound mind as well as a planned family. The society in general would be strong and we shall become a leading nation in the world. Now the question which confronts us is—'How all this is possible by copulation. A deep thinking will reveal that the nervous system, blood-circulatory system and the muscles-being active by the effect of meditation and chanting of mantras—collectively help to attain this goal. The concentration is the key to success. The unstability of mind is due to the effect of the गुण-त्रय viz. Satva, Rajas, and Tamas. The ten ज्ञानेन्द्रिय and कर्मेन्द्रिय are the cause of the ensteadiness of the mind.

It is too difficult to check these indriyas abruptly. In Yoga-Darshan, Patanjali propounds that the mind may be made calm by concentration on an adject of interest.

यथाभिमत ध्यानाद्वा–पा० योगदर्शन 1/39

In copulation all the indriyas experience common enjoyment. In want of astringency (स्तम्भन) one fails to acheive this enjoyment. As the base of वाम-मार्ग-साधना is बिन्दु (seman-drop), some wel-tried exercises of बिन्दु-सिद्धि are being related here, which, if practised may bestow success within the period of an year.

If our government make arrengments to include this course in the curricula of schools and colleges, within a period of some twenty to twenty five years, the nation as a whole may turn up strong and valiant.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

These exercises may be divided in the following three sections:—

1. The exercises of वीर्य-स्तम्भन (astrigency) named as शवासन, पश्चिमोत्तानासन, सर्वाङ्गासन and वीर्य-स्तम्भनासन.

2. The exercises of वीर्योर्ध्वीकरण (denerting the flow of seman from down-wards to up-wards). विपरीत करणी-मुद्रा, शीर्षासन, गरूड़-मुद्रा, मन्डूक-मुद्रा, शक्ति-चालिनी-मुद्रा, योनि-मुद्रा, सिद्धासन, पद्मासन and भस्त्रिका-प्राणायाम comprise these exercises.

3. ओजोकरण-विधि include the following exercises:—मूल-बंध, जालन्धर-बंध, ध्यानयोग with उड्डियान-बंध

FIRST–SECTION

1. शवासन:—Lie down flat facing the sky-allow the body to relax perfectly. There should be no tension in any part of the body. This is called शवासन which should be practised in the beginning as well as in the end.

2. वीर्य-स्तम्भनासन:–Stand straight with the feet keeping three or four feet apart-catch hold of the right wrist with the left hand, inhale deeply and go on bending the right leg until your nose touches the toe. Try to retain this posture as long as possible. The body and the left leg should remain straight. Think as if the semen become solid. When the restraing of breath becomes difficult stand up slowly and exhale. Bend in the same way in the other side, when your respiration becomes normal. This bending should be performed in equal numbers on both the sides.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

3. पश्चिमोत्तानासन:—Sit straight and strech the feet in front of you in parallel position–inhale deeply–catch both toes with thumbs and fore fingers well as middle fingers been the head slowly so that the nose may touch both the knees the duration of this posture should be increased slowly raise up four head slowly and then exhale:—

4. सर्वाङ्गासन:—Lie on the ground flat, facing the sky-with out bending the knees, raise the legs up and make the toes touch the ground while bending the legs–keep the hands straight to wards the hips, touching the body the chin should be placed in the throat-pit (कण्ठ-कूप) Retain this posture according to your capacity and then resume your original position.

SECOND SECTION

5. विपरीत करणी-मुद्रा:—Sit with both the legs streched in infront of you the body remain straight after inhaling and exhaling some 5,7 times, inhale deeply in the end immediatly lie down and raise the legs with the hands holding the waist the head and the rest of the body should be kept straight and eract the chin should touch the कण्ठ-कूप- After a कुम्भज of 16 counts (मात्रा), return to the original position and exhale slowly. Gradually raise the duration of कुम्भज up to 64 counts.

शीर्षासन with मण्डूक and गरूड़-मुद्रा:—

Keep in coiled form a piece of thin cloth-rest your head upon it supporting the head with both the hands raise the body

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

up side down i. e. keeping the feet above and head on the ground-try to perform मूल बंध and उड्डियान बंध.

Thus taking the शीर्षासन bend your knees in such a way the soles may face and touch each other the pressure created in मूलबंध will develop pressure in the abdomen also increase this pressure so much that you may feel that the शक्ति is ascending high up in the सुषुम्ना. After that reduce the pressure at the soles return to the position of शीर्षासन perform this क्रिया 2–3 times. This is called मण्डूक मुद्रा with शीर्षासन.

Once again taking the शीर्षासन position place the legs in गरुड़ासन State i. e. one leg should surround the other above the knee and ankle-due to the मूल बंध and उड्डियान बंध the प्राण-शक्ति rises up wards the legs are changed in this posture.

सिद्धासन:—Sit on arms-keep the left heel between the anus and the testicles and the sole should touch the thigh-the right heel should be kept at the root of the penis–The weight of the whole body should be balanced on the left sole and the centre of the सींवनीनाड़ी–the support of a pillow of some 4–5 inches may be helpful to this posture.

Ashvini Mudra—Performing Kumbhak shrivelling and streching the anus is called Ashvini Mudra. It should be performed sitting on Siddhasan or Padmasan according to Yoga science. But it is our experience that it can be done in any posture sitting or lying.

Shaktichalini Mudra—Fix the palm of the both hands sitting on Siddhasan or Padmasan. Beat the ground with hips—Repeat it twenty to twenty five times. After it perform Mulbandh and Unite Pran-Apan after performing Purak with the sound of nose flowing

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Kumbhak should be done after performing Jalandharbandh and Ashwini Mudra should be performed while doing Kumbhak. After it open the Jalandharbandh and perform Rechak with the opposite nostril, used in performing Purak. After it, come in normal position.

Yoni Mudra—Perform Shanmukhi mudra sitting on Siddhasan. Attract Pran by Kak Mudra and unite it with Apan. After it performing Jap with Beej Mantra one should think that with the sound of Mantras Kundalini is awaking and moving towards Sahasrar after having passed the Shatchakra.

Press the ears with thumbs, eyes with fore fingers, nostrils with rings and littles, is called Shamukhi mudra.

After performing Shanmkhi mudra, attracting Pran Vayu with both lips is called Kak mudra.

Mulbandh:—fix the heel of left foot between the penis and anus, shrive the anus, and pull the Apan Vayu with power towards upside by narrowing the place of Yoni—The middle place between anus and penis.

It is called Mulbandh.

Bhastrika Pranayam:—(a) Inhale deeply by left nostril with a long and light buzzing sound, upto the mooladhar. (b) Exhale in the same way with the right nostril without performing kumbhak. (c) Then repeat the whole afore said क्रिया (a) and (b) without performing outer kumbhak, begining with right nostril This makes our Bhastrika pranayam. Perform such two Pranayams. (It involves eight processes of in hailing and exhaling.) While you inhale ninth time perform kumbhak as long as possible. Exhale in the end by the right nostril. Thus these ten actions of inhaling

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

and exhaling make one complete प्राणायाम. Now begine with right mostril and perform a pranayam as obout (with ten actions) In the same way 3rd, 4th etc. pranayams can be done.

THIRD SECTION

The aim of Vam Marg is not to satisfy the sexual instict but also to change the semen into abstract form. The abstract form of semen is purified mind. The Jap of Mantra with pure mind gives success. The above depicted ways change the semen's gross form into abstract form. Now we depict the two Bandhas—

Uddiyan Bandh—Sitting on Siddhasan or Padamasan pull the middle portion of the stomach and fix it with back bone. It will create a pitch. The semen and Pranvayu run or fly upwards. so it is called uddiyan bandh.

Dhyan Yoga comes after it. I am neither Siddha nor Guru. I have composed it with the inspiration of mother other wise I am totally incompetent. "सतनाम सतनाम न संशय:"–though I have realised it and Mother gave me a chance to comprehand that :

अयं सर्वोत्तमो धर्मः शिवोक्तः सर्वसिद्धिदः ।
जितेन्द्रियस्य सुलभोनान्यास्यानन्त जन्मभिः ।।

How can we control the indriyas ? An esay and experienced method is being related now. One should plung into action to reap the fruits of it (साधना). life may become pious I have dived deep into the ocean of scriptures (शास्त्रा:). It is my earnest desire that the book may be useful to the readers. This universe is compared to the ocean, the saline water of which (ocean) is not useful for drinking nor bathing. It is useful only as a means of voyage. In order to go accross it a boat is wanted and the Mother has kindly endowed me this body (like a boat). Lord Shiva has imparted ज्ञान to me so that I may cross this universe ;

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"यैरव पतनं द्रव्यैः सिद्धि तैरेवे चोदिता।"

Though the perishable matter is not retainable, still it is the best means of attaining शिवत्वं. A good number of quotations have been taken up from a large member of books. Their writers are praise-worthy and they are my people because they are the off-springs of the affectionate Mother. What ever mistakes may be detected, they are due to me and I solicite their pardon for that.

I have tried to begin repaying the debt of Rishis. Gurudeo will be merciful enough to give me his blessings so that I might complete the series of books in his memory. May Bhagawati give long life to Vaidya Mahavir Prased who inspired me to begin this effect. I pay him my well wishes by heart. I will be ever grateful to my Guru-brothers who always encouraged me. I am also thankful to Shri Shiv Kumar Bhatt and Vaidya Bhagirath Ji who made useful corrections in the draft. Translation work has also made the book useful Proof corrections have been done by chiranjiva Ramesh Kumar whose all round prosperity is desired. I will also be grateful to the printers specially to Shri Kalyan Prasad Ji and Pt. Giriraj Ji Sharma. Chiranjiva Bhanwar Verma took keen interest May Bhagawati bless Shri Chiranji lal Sharma who is the owner of all this. Shri Shankar Prasad Shukla lectuerer in Maharja Sanskrit College also did a lot to feel.

"Ayam Sarvottamo Dharm Shivottamo Sarvasiddhihi.

Jitendriyasya Sulabho Vanya Syantant Janmabhih.

How can be overcome over Indriyas ? Its simple and experienced way is depicted. Act and be beneficial. My life has become auspicious as I had a chance to dive in the sea of Shastras. It is dedicated wishing that the book will be fruitful to the readers. The

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

water of the sea is neither worth drinking nor worth bathing. It has only one utility. It is a simple means of transportation. There was a need for a little boat and Bhagavati is merciful enough to fulfil this need by giving me this body. And the knowledge to cross this world has been given by Shiva.

Yaireva Patanam Dravyaih Siddhistaireva chodita.

Although the matter is perishable and capable of being abandoned yet it is the best source of gaining Shivattva. Thus the credit to complete this work (book) goes to others–इदं न मम्.

——

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रसादभाष्य विषयानुक्रमणिका

पृष्ठाङ्क	विषय
	प्रथमः पटलः
१	तन्त्रावतरणम्. प्रकाशः,विमर्श
२	भैरव-कैलास, पार्वती
३	गुरु
४	ब्रह्म
५	महाविद्या, अविद्या
६	मंत्र विद्ययोर्भेदः विद्याशब्दस्य विविधार्थाः
७	महामाया
८-९	माया महामाया-योगमाया
१०	विद्याराज्ञी=दक्षिणाकाली मन्त्रोद्धार
११	कालिकोपनिषद् मंत्रोद्धारः
१२	मंत्रार्थम्
१३	मंत्राक्षरैः-अङ्गविभागम्
१४	उपास्य देवता-रूपत्रयम्
१५	किं नाम वीर्यम् वीर्यस्योर्ध्वीकरणम्
१६	किं नाम ऋषि-छन्द-देवता ?
१७	को हि नाम न्यासः ?
१८	न्यासे-अगुलिनियमानाहः- किं नाम ऋषिः ?
१९	ऋष्यादि न्यास
२०	अङ्गादि न्यास
२१	न्यासेऽङ्गुलि प्रयोग विधिः
२२	षडङ्गन्यासविधिः
२३	वर्णन्यास

पृष्ठाङ्क	विषय
२४	वर्णन्यास रहस्यम्
२५	वर्णन्यास विनिर्णयम्
२६	न्यासविधिः
२७	पीठन्यासम्
२८	हृत्सरोजे दहरम्
२९	एक पञ्चाशत्पीठानि
३०	ध्यानम्–द्विविधं हि ध्यानम्
३१	केशशब्द निर्वचनम्
३२	काली-निर्वचनम्
३३	काल्येव-कुण्डली-प्रकृति-शक्ति गायत्री-परा-अपरा च
३४-३५	काली निर्वचनावसरे त्रिपुरम्, ग्रन्थित्रय-काल-हर-ब्रह्म इत्येषां निर्वचनम्
३६	दक्षिणकालिकायाः स्वरूपम्
३७	दिव्यमुण्डमाला
३८	के ते ऽसुराः ? व्याधयः इति तत्र नेत्र तंत्रस्य प्रमाणम् मंत्रेण रोगनाशनम्
३९	वर्णमाला स्वरूपम्
४०	वरदाभयमुद्रे
४१	काली, कृष्णवर्णा कथम् ?
४२	कथञ्च सा कराली ?
४३	किं नाम श्मसानम् ? लोके, दिव्याचारे च
४४	शव इति किम् ? दिव्याचारेण
४५	कथं च सा शिवहृदयोपरि संस्थिता ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पृष्ठाङ्क	विषय
१२०	किं नाम पुरम् ? वैदिकवाङ्मये
१२१	अष्टचक्रा नवद्वारा पुरि
१२२	किं नाम पुरम् ? हिरण्यकः, ज्योतिः, स्वर्ग, नरकमिति ।
१२३	नाडीनामवस्थान प्रकारः ।
१२४	श्रीचक्रम्
१२५	प्राकृतिक कामस्वरूपम् अप्राकृतिक कामस्वरूपम्
१२६	तामसिक साधना विधिः
१२७	दिव्यसाधनायां युवति सरस्वती कथ प्रसीदति ?
१२८	सिद्धमार्गः=राजमार्गः
१२९	गुरुयजन विधिः
१३०	सहस्रारस्य स्थितिः
१३१	मूर्ध्नि आत्मनो निवासस्थलमिति आधुनिका वैज्ञानिका
१३२	मृत्युप्रक्रिया–प्रश्नोपनिषदि
१३३	दिव्य सपर्याविधिः
१३४	वीर्यमेव सिद्धिमूलम् तत्पर्यायाः--विन्दु-रेतस-सोम-शुक्रं वा
१३५	स्थिरवीर्थः साधकः एव सिद्धि लभते ।
१३६	पशु-वीर-दिव्य साधनायां नारी का ?
	अष्टमः पटलः
१३७	सदाचारः कः ? के च आप्ताः
१३८	विपरीतरतौ सिद्धिः ?
१३९	आत्मनः पञ्चभेदाः
१४०	अन्तरात्मा एव कुण्डलिनी दिव्य साधनायां विपरीतरतिः
१४१	दिव्यसाधनायाम् मैथुनविधिः
१४२	इत्याचार परः श्रीमान्
	नवमः पटलः
१४३	भगवत्या निर्गुण स्वरूपम् सगुण स्वरूपम् त्रिगुणात्वकमैश्वर्यम् ।
१४४	कथञ्चाहं काली ? सरस्वती? अनिरुद्धा चाहम् ?
१४५	एकं ब्रह्म द्वितीयो नास्ति
१४६	साहं सरस्वती नाम ?
१४७	सायणाचार्यमते सरस्वती ब्रह्मनाडी निर्वचनम्
१४८	उपनिषदि--ब्रह्मपथः तंत्रयोगे--ब्रह्मनाडी ।
१४९	प्रज्ञापराधे सम्प्राप्ते दुःखत्रयोत्पत्तिः । तन्नाशनविधिः
१५०	अनया विद्यया स्थित प्रज्ञो भवति
१५१	विद्यायाः माहात्म्यम् ।
	दशमः पटलः
१५१	काली-दुर्गा -तारायाः समानत्वम् गन्धर्व तंत्रोक्त विधिना पूजा कार्या
१५२	काली मन्त्रोद्धारम् । "क्रीम्" एव मुहम्मदीये सम्प्रदाये 'करीम' इति कथ्यते ।
१५३	एकाक्षर-त्र्याक्षर मंत्रयोस्तु ध्यान पूजादिकं द्वाविंशत्यक्षरवत्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पृष्ठाङ्क	विषय
१५४	कालीहृदयसंज्ञिता सिद्धविद्या उच्यते
१५५	षडक्षर मन्त्रोद्धारः ध्यानम्
१५६	दक्षिणावदुपाचरेत्
१५७	प्रयोग विधिः
१५८	खेचरीमुद्रा
	एकादशः पटलः
१५९	शिवावलि विधानम्
१६०	"शिवा" का ?
१६१	कुमारी पूजनम्

पृष्ठाङ्काः	विषय
	द्वादशः पटलः
१६३	प्रातः कृत्यम्
१६४	ध्यानम्
१६५	अजपा-जप विधिः
१६६	निशापूजा
१६७	सद्वृत्तम्
१६८	कुण्डलिनी वृत्तम्
१६९	किमर्थं हि पूजा-ध्यानम्
१७०	कुलाचारम्
१७१	कालीस्वरूपम्

इतिप्रसादभाष्य विषय–सूची

परिशिष्ट विषय–सूची

क्रम	परिशिष्टम्	विषय	पृष्ठाङ्क
प्रथमं	परिशिष्टम्	शाक्तविज्ञानम्	१
द्वितीयं	परिशिष्टम्	कवचम्	९
		शतनाम	१२
		सहस्रनाम	१४
		कर्पूरस्तवः (आङ्ग्लभाषानुवादसहितः	३०
तृतीयं	परिशिष्टम्	पञ्चमकार-विनिर्णयः	४४
चतुर्थं	परिशिष्टम्	विन्दुयोगः	४९
पञ्चमं	परिशिष्टम्	कालीतंत्र श्लोकार्ध-नामाक्षरानु क्रमणिका	५४
षष्ठं	परिशिष्टम्	प्रसादभाष्ये स्मृताः ग्रन्थाः	६५
		आचार्या-यत्र-पत्रिका	
सप्तमं	परिशिष्टम्	आयुर्वेद अनुसन्धान केन्द्र एक दृष्टि में	६९

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्

ता मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्या वेशयन्तीम्

—ऋगवेद १० । १२५ । ३

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

—गीता ४ । ७

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदा वतीर्याहं करिष्याम्यरि संक्षयम् ॥

—स. श. ११ । ५५

अत्र अहम् विशुद्धसत्त्व परिणाम रूपस्य अन्तःकरणस्य अद्वितीय ब्रह्मात्मिका वृत्ति विशेषः । —सायणः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

॥ श्रीः ॥

काली-तन्त्रम्

प्रथमः पटलः

कैलासशिखरासीनं देवदेवं जगद्गुरुम्[1] ।
उवाच पार्वती देवी[2] भैरवं परमेश्वरम् ॥१॥

नमामि सोमसूर्याग्निरूपिणीं दिव्यतेजसाम् ।
ज्ञानदां मोक्षदां पूर्णां गुरुरूपां परात्पराम् ।
कालिकायाः पदाम्भोजं संस्मृत्य भवतापहम् ।
तत्प्रीत्यै कालिकातन्त्रप्रसादी क्रियते मया ॥

श्री परमेश्वर-महादेवस्य नित्य-निवास-स्थानं हिमवतः कैलासशिखरं वर्तते । तत्रस्थ एव भगवान् सर्वाणि तन्त्राणि समवतारयत् । अतः प्राह—कैलासशिखरासीनमित्यादि—श्रीमद्भास्कररायेणोक्तम्—'स्वयमद्वितीयोऽपि परमशिवो द्विविधं विग्रहं प्रकाशविमर्शभेदेन विरच्य, विमर्शांशेन प्रष्टव्यं प्रकाशांशेन वक्तृत्वञ्च स्वीकृत्य तन्त्रमवतारयितुमारभते । यथा—

गुरु-शिष्य-पदे स्थित्वा स्वयमेव सदाशिवः ।
प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत् ॥

—स्वच्छन्दतन्त्रे

स अद्वितीयोऽपि द्विविधं विग्रहं धार्यते । यथा—

सकलभुवनोदयस्थितिलयमयलीलाविनोदनोद्युक्तः ।
अन्तर्लीनविमर्शः पातु महेश प्रकाशमात्रतनुः ॥

—कामकला विलासः

१. जगत् पतिम् । २. पप्रच्छ परया भक्त्या ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति। तेन परमशिवः स्वयमेव विमर्शांशेन स्वयमेव पृच्छति।

"श्री भैरव उवाच"—इत्यस्यापि स्वयमेव प्रकाशांसेन स्वात्मानमुत्तरयतीत्यर्थः। तथोक्तञ्च कल्पसूत्रेऽपि—"भगवान् परम-शिवभट्टारकः श्रुत्याद्यष्ट विद्याः सर्वाणि दर्शनानि लीलया ततद-वस्थापन्नः प्रणीय संविन्मय्या भगवत्या भैरव्या स्वात्माभिन्नया पृष्टः, पञ्चभिर्मुखैः पञ्चम्नायान् प्रणिनाय" इति।

कैलासः—के-जले लासो लसनं-दीप्ति अस्य इति कैलासः। स्वनामख्यातः पर्वतः। स च शिव कुबेरयोः स्थानम्। तस्य परिमाणम्—"जठर देव कूटौ मेरोः, पूर्वेणाष्टादशयोजनः सहस्र मुद्गाय तौ द्विसहस्रं पृथु तुङ्गौ भवतः। एवमपरेण पवन परिपात्रौ, दक्षिणेन कैलास करवीरौ प्रागायतौ।"

—श्री भागवते-वृहत्संहितायां कूर्मविभागे।

पार्वतीः—पर्वतो हिमाचलस्तस्य तदधिष्ठातृदेवस्य पुत्री इति भावः।

तिथि भेदे कल्प भेदे पर्वभेदप्रभेदतः।
ख्यातौ तेषु च विख्याता पार्वती तेन कीर्तिता॥
महोत्सव विशेषेण पर्वस्थिति प्रकाशितम्।
तस्याधिदेवी या सा पार्वतीति प्रकीर्तिता॥
पर्वतस्य सुता देवी साविर्भूता च पर्वते।
पर्वताधिष्ठातृदेवी पार्वती तेन कीर्तिता॥

—दुर्गोपाख्यान-प्रकृतिखण्डे।

भैरवः—भीर्भयङ्करो रवो यस्य सः—भीरवः। तत् स्वार्थेऽण्-भैरवः।

स शक्तिश्च समाख्यातः सर्वतन्त्रे प्रपूजितः।
: भैरव्या दक्षिणे भागे दक्षिणार्मूति संज्ञकः॥

—तोडलतन्त्रे

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परमेश्वरम् :—परम-उत्कृष्टः, ईश्वरः=परमेश्वरः । आदि-ब्रह्मा इत्यर्थः । तम् परमेश्वरम् ।

अयं वा इदं परमोऽभूदिति । तत्परमेष्ठिनः परमेष्टित्वम् ॥

—तै. २।२।१०।५

एतान्यष्टौ——रुद्रः, सर्वः=शर्वः, पशुपतिः, उग्रः अशनिः, भवः, महादेवः ईशानः-अग्निरूपाणि ।

—श. ६।१।३।१८

जगद् गुरुम्——जगत्=त्रैलोक्यं, तस्य गुरुम् ।

गु-शब्दस्त्वन्धकारः स्यात् ।
रु-शब्दस्तन्निरोधकः ॥
अन्धकारविरोधित्त्वात् गुरुरित्यभिधीयते ।

—अद्वय ता १६

तम्—जगद् गुरुम्=त्रैलोक्य-गुरुम् ।

गुह्यागमार्थतत्त्वार्थसन्धानात् बोधनादपि ॥
रुद्रादिदेव रूपत्वात् गुरुरित्यभिधीयते ॥

—कु तं. १७।१०

यत्तु—गुरुशिष्यपदे स्थित्वा स्वयमेव सदाशिवः ।
प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत् ॥

—स्वच्छन्दतन्त्रे

तत्र—'ब्रह्म हि देवान् प्रच्यावयति ।"

——श. ३।३।४।१७

तथा च—"ब्रह्म वै मंत्रः ।"

—श. ७।१।१।५

विशुद्धज्ञानदेहाय त्रिवेदी दिव्य चक्षुषे ।
श्रेयःप्राप्ति निमित्ताय नमः सोमार्धधारिणे ॥

—स. श.

अति धन्वान्यत्यपस्ततर्द श्येनो नृवक्षाः अवसानदर्शः ।
तरन् विश्वान्यवरा रजांसीन्द्रेण सख्या शिव आ जगम्यात् ॥

—अथर्व. ७।४१।१

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीपार्वत्युवाच[1]—

देव देव ! महादेव ! सृष्टि-स्थित्यन्तकारक[2] ।
किं तद् ब्रह्ममयं धाम श्रोतुमिच्छामि तत्त्वतः ॥२॥
कालिकायाः महाविद्यां समस्त भेद संयुताम्[3] ।
सपर्या भेद सहितां चतुर्वर्ग फलप्रदाम् ॥३॥

श्रीरिति—

ब्रह्ममयं धाम—ब्रह्मस्वरूप तेजः—"धाम शक्तौ प्रभावे च तेजः मन्दिर जन्मसु"—इति विश्वः ।

ब्रह्म—-त्रुटयन्त प्रसिद्धं सच्चित्सुखात्मकमपरिच्छिन्नं सर्वजगत् कारणम्—ब्रह्म । तत्परं ब्रह्म प्रत्यहं पुरस्तात् पूर्वस्यां दिशि प्रथमं जज्ञानं-पूर्वं आविर्भूतम् सत् पश्चात् स्वतेजसा कृत्स्नं जगत् व्याप्नोति, इत्यर्थः ।"

यथा—"ब्रह्म देवान् अजनयत् ।"

—तै. २।८।८।६

"विद्युत् हि एव ब्रह्म ।"

—श. १४।८।७।१

देशकालावच्छिन्नं सच्चिदानन्द लक्षणं परं ब्रह्म "तदैव तेजोमयं धाम" तं श्रोतुमिच्छामि कालिकाया महाविद्याम्—विद्याशब्देन परिभाषितं मन्त्रम् । विद्या=देवीमंत्रम् । "तस्य विद्या न सिद्धयन्ति ।" श्यामास्तवे ताञ्च समस्त भेद संयुताम्=एकाक्षर-त्र्यक्षरादि भेद सहिताम् ।

"अथ कालीमंत्रभेदा उच्यन्ते सिद्धि दायिनः ।" मं. म.

तेषां व्याख्यानं दशमे पटले करिष्ये । 'सपर्याभेदसहिताम्–वरिवस्या प्रकारभेद सहिताम् । "वरिवस्या तु सुश्रूषा

१. भैरव्युवाच । २. सृष्टिस्थिति लयात्मकः, सृष्टिप्रलयकारकः । ३. कालिकाधा महादेव्याः पूजाञ्चैव विशेषतः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परिचर्याप्युपासना" इत्यमरः। "पूजा नमस्यापचितिः सपर्या-चार्हणाः समाः" इत्यमरः।

चतुर्वर्गफलप्रदाम्—"त्रिवर्गो धर्मकामार्थैः चतुर्वर्ग समोक्षकैः" स्वरूपफलप्रदाम्, इत्यस्य महाविद्या विशेषणत्वेऽपि मंत्रदेवतयोः ऐक्यात् कालिका एव ब्रह्मस्वरूपत्वं सूचितम्। चतुर्वर्ग फलप्रदाने-ब्रह्मेतरस्याक्षमत्वात्।

महाविद्यापदेन द्वाविंशत्यक्षर मंत्र एव सूचितः, तस्य मुख्यत्वात्। अतएव महादेवेनापि प्रथमं द्वाविंशत्यक्षरमंत्रं, पूजादिकञ्च उक्त्वा पश्चादन्ये मंत्रभेदा कथिताः।

महाविद्याम् :—प्रकृतार्थन्तूक्तम्। विशेषार्थः कथ्यते—

सैव—विद्या अविद्या च। महाविद्या शब्देन द्वयोरेव ग्रहणम् भवति। "विद्याहम्, अविद्याहम्"—देव्यर्थशीर्षम्-४

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तुते॥

—स० श० ११।२२

जीवनयात्रायाम्—लोकव्यवहारे द्वयमेवावश्यकं वर्तते।

"अविद्यया तरतिलोके-विद्ययाऽमृत मश्नुते।"

अतएव—विद्याशक्ति समस्तानां शक्तिरित्यभिधीयते।

गुणत्रयाश्रया विद्या सा विद्या च तदाश्रया॥

—वृ० जा० उ० ३।३

"विद्याश्च वा अविद्याश्च यच्चान्यदुपदेश्यम्।
शरीरं ब्रह्म प्राविशद् ऋचः सामाथो यजुः॥"

—अथर्व० ११।१०।२३

"विद्या वै धिषणा।"

—तै० ब० ३।२।२।२

विद्यया देवलोकः—जय्यः। देवलोको वै लोकानां श्रेष्ठः तस्माद् विद्यां प्रशंसन्ति।

—श० १४।४।३।२४

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याऽविद्ये निहिते यत्र गूढे।
क्षरं त्वविद्यया ह्यमृतं तु विद्या विद्याऽविद्ये ईशते यस्तु योऽन्यः ॥
—श्वेता० ५।१

श्री भैरव उवाच—

महाविद्यां महामायां महायोगीश्वरीं[1] पराम्।
सर्वविद्यामहाराज्ञीं[2] सर्वसारस्वतप्रदाम् ॥४॥

महाविद्यामिति—यद्यपि "विद्याविद्या" शब्दौ व्याख्यातौ परं तत्तु सामान्यम् अत्र प्रकरणवशात् पुनर्वाच्ये। स्वाहान्ता स्त्रीदेवतामंत्रा "विद्या" शब्देन परिभाष्यन्ते।

मंत्राः पुंदेवता ज्ञेया, विद्या स्त्री देवताः स्मृताः।
पुं-स्त्री नपुंसकात्मानो मंत्राः सर्वे समीरिताः ॥
पुंमंत्रा हूँ फडान्ताः स्युर्द्विठान्ताश्च स्त्रियोमताः।
नपुंसका नमोऽन्ताः स्युरित्युक्ता मनवस्त्रिधा ॥
—शा० ति० २।५८-५९

अत्र—द्विठान्ता इति स्वाहान्ताः। ठ शब्देन सामान्यात् अर्थात् वा विन्दुरुच्यते। "ठः" शून्ये च बृहद्ध्वनौ इति कोशात्। शून्यं विन्दुरूपमेव तस्य द्वित्वं तेन विसर्गः। स च शक्ति रूप इति। तेन द्वि ठ शब्दनेन—अग्निशक्ति "स्वाहा" उक्ता।
—इति राघवभट्टः

अयमपि मंत्रः—स्वाहान्तत्वात् स्त्री देवतात्मकत्वाच्च "विद्या" पद वाच्यः। महाविद्या=सर्वोपरि मंत्र स्वरूपा विद्या द्वाविंशत्यक्षररूपा।

अथवा—विद्या–संस्कृतबुद्धिः
—सायणः अथर्व० ६।११६।१

विद्या–भावना
—सायणः अथर्व० ११।६।१०

इच्छाशक्तिस्तथा सेयम्
—का० क० २६ चिद्वल्ली

---

१. महायोगेश्वरीम्। २. वर्गाद्यं वह्नि संयुक्तम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यथा—"यदयमनुत्तरमूर्ति निजेच्छया निखिलमपि जगत्स्त्रष्टुम् ।
प्रस्यन्दते स स्यन्दः प्रथमः शिव तत्वमुच्यते तज्ज्ञैः ।।
इच्छा सैव स्वेच्छा सन्तत समवायिनी सती शक्तिः ।
सचराचरस्य जगतो बीजं निखिलस्य निजविलीनस्य ।।

—सौ० सु०

"एकोऽहम् बहुस्याम्"

—इत्याख्यस्वरूपमिति ।

महामायाख्ः—तत्र किं माया ? "मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति । मा+"माच्छाससि सूभ्यो यः" इति "य" टाप् । माया अविद्या इत्यर्थः ।

ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ।।

—सप्तशती १।५५

"महामाया प्रभावेण संसार स्थिति कारिणा"

—सप्तशती १।५३

अस्याः प्रभावेणैव जगत्सत्यं भासते । यदा सा अविद्या स्वरूपं विहाय "विद्या" रूपं धार्यते, तदा-जगन्मिथ्या भासते । इति ।

यथा—"सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।"

—स० श० १।६५

अव्यसश्च व्यचसश्च बिलं वि ष्यामि मायया ।
ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महे ।।

—अथर्व० १९।६८।१

अत्र—व्यचस=व्याप्तस्य सर्वशरीरव्यापकस्य व्यान-वायोः समष्टिरूपस्य, अव्यस=अव्यचसः । व्यष्टिरूपस्य प्राणा-त्मकस्य वायोः । तयोः बिलम्=बिलवद् बिलं मूलाधारम् मायया =कर्मणा अभिनव व्यापारेण, विष्यामि=विवृतं करोमि । स्यतिरूपसृष्टो विमोचने—नि० १।१७ निरुक्तः शब्द विवक्षतो पुरुषस्य प्रयत्नजनित वायुवशात् मूलाधारे स्पन्दो भवतीति

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आगमिकाः । "मूलाधारात् प्रथमम् उदितो यस्तु भाव पराख्यः" इति ।

ताभ्याम्=व्यान प्राणाभ्याम्, वेदम्=अक्षरात्ममंत्र-संघम्, उद्धृत्य=विलरूपात् मूलाधारात् परापश्यन्ती मध्यमा वैखरी क्रमेण उद्गमय्य, अथ=अनन्तरम्, कर्मणि=श्रौतानि स्मार्तानि च, कृण्महे=कुर्महे ।

—इति सायणः

नाड्याधारस्तु नादौ वै भित्वा सर्वमिदं जगत् ।
अधः शक्त्या विनिर्गत्य ऊर्ध्व शक्त्यवसानकः ।
नाड्यां ब्रह्मबिले लीनस्त्वव्यक्तध्वनि लक्षणः ।।

—स्वच्छन्द तंत्रे

"नियतिः कालो रागो विद्या कला माया शुद्ध विद्येश्वरः सदाशिवः शक्तिः शिवश्चेत्येकादशः" ।

अधारयत् पृथिवीं विश्वधायसमस्तभ्नान् मायया द्याम वस्रसः ।।

—ऋक् २।१७।५

अत्र मायया=प्रज्ञानेन इति वेङ्कटमाधवः । पुनः—"यद्वा अव्यचसः अव्याप्तस्य परिच्छिन्नस्य जीवात्मनः व्यचसः व्याप्तस्य परमात्मनश्च बिलम्' उपलब्धिस्थानं हृदयम् मायया—अज्ञानेन विष्यामि विमुक्तं विरहितं करोमि । हृदये अज्ञानावृते सति कर्तव्याकर्तव्यविभागो न भवति । अतः कार्याकार्यविभागैक-ज्ञान परिपन्थिनं मूढभावम् अपसारयामि इत्यर्थः । ताभ्यां जीव-परमात्मभ्यां वेदं चिकिर्षीतकर्म विषयं ज्ञानम् उद्धृत्य सम्पाद्य अथ अनन्तरं कर्माणि कृण्महे ।

—सायणः

पुनश्च—माया महामाया-योगमायेति सा त्रिधा विद्यते । यद्यपि तज्ज्ञानम् दीर्घकालीन साधनेन गुरुकृपयैव भवति । तथापि संक्षेपतः विवृणोमि—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माया—तंत्रयोगोक्त पुर्यष्टकस्य, आयुर्विज्ञानोक्त "प्रकृतिश्चाष्ठधातुको" एतत्तन्मात्रकायस्याधिष्ठात्री माया भवति ।

महामाया-यच्च—"चितिश्चित्तं च चैतन्यं चेतनाद्वयकर्म च ।
जीवः कला च देवेशि सूक्ष्म पुर्यष्टकं मतम् ।।

सूक्ष्म शरीरं त्रिगुणातीतं तदेव महामाया । शरीरेऽस्मिन् हृदयादधः पादपर्यन्तं मायायाः अधिकारक्षेत्रं भवति, हृदयादूर्ध्वं शिखा पर्यन्तं महामायायाः अधिकारक्षेत्रं भवति। योगमाया-अस्य तंत्रस्य-विद्या=दक्षिणकालिका-एव योगमाया अस्ति । मूलाधारादुत्थिता माया क्रमात् ग्रन्थित्रयभेदं कृत्वा यदा भगवता दक्षिणाभिमुखेन शिवेन संयुज्यते तदा "योगमाया" इति कथ्यते ।

शेमुषी दक्षिणा प्रोक्ता सा यस्याभिक्षणे मुखम् ।
दक्षिणाभिमुखप्रोक्तः शिवोऽसौ ब्रह्मवादिभिः ।।

—दक्षिणामूर्ति उप० ३१

तच्चरमावस्था—"सोऽहम्" इति भवति ।

अशुद्ध चित्तमेव अज्ञान-कारणम् तन्निरोधः एव योगः । यथा—"योगश्चित्तवृत्ति निरोधः" ।

—पातञ्जल योग सूत्र १।२

तमेव—स्पष्टयति । द्वौ क्रमाविति—

"द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं मुनीश्वर ।
योगस्तु वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ।।
तस्मिन्निरोधिते नूनमुपशान्तं मनो भवेत् ।
मनः स्पन्दोपशान्तायां संसारः प्रविलीयते ।।

—शाण्डिल्योपनिषत्

एतत्सर्वं हठयोगेन संभवः । किन्तु तंत्रेऽस्मिन्—

कायक्लेशस्य आवश्यकता न वर्तते । यथा वक्ष्यति—न वा प्रयास बाहुल्यमिति । यतः—कुलार्णव तंत्रे—

उपायाः वहवः सन्ति ज्ञातुं ब्रह्म सनातनम् ।
तथापि प्रकृतेर्योगात् क्षिप्रं प्रत्यक्षतां व्रजेत् ।।

—उक्तम्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अतएव महायोगीश्वरीति कथ्यते ।

सर्व विद्या महाराज्ञीम्—सर्वासां विद्यानाम्=अक्षरात्मक मंत्र संघानाम् । इयम् दक्षिणकालिका—विद्या प्राधान्येन राज्ञीव प्रकाशते । अतएव विद्याराज्ञीति उच्यते । अथवा विद्या=ब्रह्म-विद्या । ब्रह्मज्ञानोपायत्वेन बहुधा, तासु सर्वासु विद्यासु आशुब्रह्मज्ञानबोधकत्वात् इयं विद्या राज्ञी श्रेष्ठा इत्यर्थः ।

अथ मंत्रोद्धारम्—

कामत्रयं वह्निसंस्थं[1] रति-विन्दु विभूषितम्[2] ।
कूर्चयुग्मं तथा लज्जायुगलं तदनन्तरम् ॥५॥
दक्षिणे कालिके चेति पूर्व बीजानि चोद्धरेत् ।
अन्ते वह्निवधूं दद्यात् विद्याराज्ञी प्रकीर्तिता ॥६॥

कामत्रयमिति—कामः=ककारः—"कः क्रोधीशो महा-काली कामदेव प्रकाशकः ।" इति श्री तत्राभिधाने । तस्य त्रयम्=ककार त्रयमित्यर्थः । वह्नी=रेफः । "रः स्यात् कामेऽनिले वह्नौ" इत्येकाक्षर कोषे । तत्संस्थं रेफारूढं ककारत्रयमित्यर्थः एतेन "क्रः" सम्पद्यते । रतिः—ईकारः "माया लक्ष्मी रतिः शान्तिवैष्णवी विन्दुमालिनी" मंत्राभिधाने । विन्दुः=अनुस्वारः, "अनुस्वारश्च बिन्दुश्च दण्डोदण्डी वियद्विदुः ।" मंत्राभिधाने । रति विन्दुभ्यां ईकारानुस्वाराभ्याम्, विभूषितम् रेफारूढम् ककारत्रयम् । तेन—"कामत्रयं वह्निसंस्थं रति विन्दु विभूषितम्"-"क्रीं क्रीं क्रीं इत्यायाति

कूर्च युग्मम्—कूर्चं हूं बीजम् । "हूँ व कूर्चं परमेशानि" मंत्राभिधाने तस्य युग्मम्-तेन हूँ हूँ इत्येवं भवति । तदनन्तरम्—

लज्जायुगलम्—"ह्रीं लज्जा गिरिजा च शक्तिरपि हृल्लेखा मायापरा" मंत्राभिधाने । एवं "लज्जापदेन" ह्रीं बीज-

१ वर्गाद्यं वह्निसंयुक्तम् २ समन्वितम्

Digitization by Hindu-Heritage Foundation of America. HHFA(USA)

मुच्यते । तस्य युगलम्—ह्रीं ह्रीं इति । एवम्—क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं इति बीज सप्तकमुद्धृतम्—

तदनन्तरम्—बीज सप्तकमुद्धृत्य शेषं पूरयेत् ।
दक्षिणेकालिके—इति स्वरूपाख्यम् पदद्वयमुद्धरेत् ।

अन्ते—वह्निवधूं=स्वाहां दद्यात् । "स्वाहा वह्निवधू शिरोऽपि "ठ" युगम् इति तंत्राभिधाने । एतेन—

"क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणेकालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।" इति द्वाविंशत्यक्षरो दक्षिणाकालिका मंत्र उद्धृतः ।

यद्यपि काम वह्नि रति, प्रभृति शब्दैः- क्रमशः रेफः ईकारः ऊकारादयश्च अभिधीयन्ते । तथाप्यत्र तांत्रिक कोशानुसारेण ककारादय एव गृहीताः ।

कालिकोपनिषदि तु एवम्—"अथ हैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां त्रिगुणामुक्ता काम रेफेन्दिरा बिन्दु मेलनरूपा, एतत् त्रिगुणमादौ; तदनु कूर्च बीज द्वयम्, कूर्चबीजन्तु=व्योम-षष्ठस्वरविन्दुमेलनरूपम् तदेव द्विरुच्चार्यम्, भुवनाद्वयम् । भुवनातु=व्योम—ज्वलनेन्दिरा शून्यमेलन रूपाम्, तद् द्वयम् । दक्षिणे कालिके चेति मुख्यता । तदनु सप्तबीजमुच्चार्य वृहद्भानुजायां समुच्चरेत् ।" अर्थात्—कामः=ककारः, रेफः, इन्दिरा=ईकारः, विन्दुः=अनुस्वारः, एतेषां मेलनरूपा सुभगा क्रीं बीजमित्यर्थः । सा च सुभगा त्रिगुणा—क्रीं क्रीं क्रीं इति । व्योमः=हकारः, षष्ठस्वरः=ऊकारः, विन्दुः=अनुस्वारः एतेषां मेलनरूपम्—कूर्चबीजम् "हूँ" इति । तद् द्वयम् "हूं हूं" इति व्योमः=हकारः, ज्वलनम्=रेफः, इन्दिरा=ईकारः, शून्यम्=बिन्दुः=अनुस्वारः इत्यर्थः । एतेषां मेलनरूपा=भुवना—"ह्रीं"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बीजम् । तस्य द्वयम् "ह्रीं ह्रीं" इति । "दक्षिणेकालिके" इति सम्बोधनान्तं स्वरूपम् । बृहद् भानुजाया=स्वाहा ।।

"तथा च—काल्यर्च्चन चन्द्रिकायाम्—"

ककारं वह्नि संयुक्तं रति विन्दु समन्वितम् ।
त्रिगुणञ्च ततः कूर्च्चयुगं लज्जायुगं ततः ।।
दक्षिणेकालिके चेति पूर्वबीजानि चोद्धरेत् ।
वह्निजायावधिः प्रोक्तः कालिकायाः मनुर्मतः ।।इति।।

मन्त्रार्थमाह—

ककारोज्वलरूपत्वात् केवलं मोक्षदायिनी ।
ज्वलनार्णसमायोगात् सर्वतेजोमयी शुभा ।।
मायात्रयेण देवेशि सृष्टि स्थित्यन्तकारिणी ।
बिन्दूनां निष्कलत्वाच्च कैवल्यफलदायिनी ।।
बीजत्रया शाम्भवी सा केवलं ज्ञान चित्कला ।
शब्दबीजद्वयेनैव शब्दराशि प्रबोधिनी ।।
लज्जाबीजद्वयेनैव सृष्टि – स्थित्यन्तकारिणी ।
सम्बोधनपदेनैव सदा सन्निधि कारिणी ।।
स्वाहया जगतां माता सर्व पाप प्रणाशिनी ।।

—तंत्रसारधृतयामले ।

"अत्र—माया = ईकारः, शब्दबीजम् = "हूँ" इति । शेषं स्पष्टम् । उज्ज्वल रूपत्वात्=तस्याःकुण्डलिनी स्वरूपायाः सहस्रारसहितायाः षट्चक्ररूपायाः उज्ज्वलत्वम् प्रसिद्धमेव । यथा च—"

कालो अश्वो वहति सप्तरश्मि सहस्राक्षो अजरो भूरिरेताः ।
तमा रोहन्ति कवयोः विपश्चितः तस्यचक्रा भुवनानि विश्वा ।।

—अथर्व० १९।५३।१

"कालः=कालः कलयिता सर्वस्य जगतः अनवच्छिन्नकालरूपः परमेश्वरः । स यया शक्त्या कलयति सैव काली ।"

कला काष्ठादिरूपेण परिणाम प्रदायिनी ।
विश्वस्योपरता शक्ति नारायणी नमोऽस्तुते ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सा सप्तरश्मि "षट्चक्ररूपा ज्वलयति । यथा—

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तुते ।।

अत्र—ज्वालया-सृजति-पालयति-संहारयति च । अतएवोक्तम् सृष्टि-स्थिति अन्तकारिणीति ।"

त्रिशूलम्—

"तत् त्रिशूलं-त्रीणिशूलानि इव अग्राणि यस्य" इतिमेदिनी । त्रिशिखमिति पर्यायवाचि शब्देनापि तदेवार्थमधिगम्यते । इडा-पिङ्गला सुषुम्ना अपि भृकुट्यां गत्वा त्रिशूलवदाकारं प्राप्नुवन्ति, तदेव-त्रिशूलम् ।

अथच—"अग्नि-वायु-आदित्याः "सृष्टिस्थिति अन्तकारकाः तथाच—सप्तशत्यां प्रथम-मध्यम उत्तरचरित्रस्य क्रमशः अग्नि-वायु-सूर्यास्तत्त्वत्रया एव त्रिशूलम्— इतिदिक् ।

"मत्राक्षरैरङ्गविभागमाह—"

क्रींकारो मस्तकं देवि क्रींकारश्च ललाटकम् ।
नेत्रत्रयञ्च क्रींकारो हूंकारेण च नासिका ।।
हूंकारो मुखपद्म स्यात् ह्रीकारःकर्णयुग्मकम् ।
ह्रींकारेण भवेद् ग्रीवा दकारश्चिबुकं भवेत् ।।
क्षिकारेण भवेद्दन्तो णोकारेणोष्ठ युग्मकम् ।
का कारेण स्तनद्वन्द्वं लिकारः पृष्ठदेशकः ।।
के कारेण भवेद्बाहुः क्रीकारेणोदरं भवेत् ।
क्रींकारो नाभिदेशः स्यात् क्रींकारश्च नितम्बकः ।।
हूं कारो योनिरूपः स्यात् हूकारेणोरूयुग्मकम् ।
ह्रींकारो जानुयुग्मं स्यात् ह्रीं कारो गुल्फदेशकः ।।
स्वा शब्देन पद द्वन्द्वं हा शब्दैः नखरं तथा ।।

—उत्तरा तंत्रे

"अन्येषामङ्गानामेष्वन्तर्भावः—एवमेव मंत्र-देवतयोरैक्य भावनायाम् उत्तरातंत्रोक्त वचन क्रमेण मंत्रस्य तत्तक्षरैर्देवतायाः तत्तदिन्द्रियाणां परिकल्पनं कर्त्तव्यम् ।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मंत्रार्थं देवतारूपचिन्तनं परमेश्वरि।
मंत्रात्मकस्य देहस्य मंत्रवाच्येनदेवता॥
वाच्य वाचक भावेन अभेदो मंत्र देवयोः।
मंत्र वाच्या देवता च मंत्रो हि वाचकः स्मृतः॥
वाचकेऽपि च विज्ञाते वाच्य एव प्रसीदति।

—यामले

"वस्तुतस्तु देवताया मंत्रात्मकमेकं रूपम्। यथा च—"

पदानि मंत्रारब्धानि मंत्रा वर्णैक विग्रहाः।
वर्णा स्वनिष्ठा इत्येषां स्थूल–सूक्ष्म–परात्मता॥

—तंत्रालोक ६।३६

उपास्यायाः परमेश्वर्यास्त्रीणि रूपाणि-उपास्य योग्यानि-स्थूल-सूक्ष्म-परञ्चेति। तत्राद्यं कर-चरणाद्यवयवशीलं मंत्र-सिद्धिमतां चक्षुरिन्द्रिय-वाणीन्द्रिययोर्ग्राह्यम्। द्वितीयं मंत्रात्मकं पुष्यवतां श्रवणेन्द्रिय-वागिन्द्रियोर्योग्यम्। तृतीयम् वासनात्मकं पुण्यवतां मनसो योग्यम्। एतत् त्रितयन्तु वाङ्मनसातीनं मुक्तै रहन्तया अनुभूयमानमखण्डम् रूपम्। अतएवोक्तम्—

"स्थूलं-सूक्ष्मं-परं वपुः"

—तंत्रलोके ६।३६

मंत्र संस्कार प्रभृतय अनावश्यकम्—

नात्र सिद्धयाद्यपेक्षाऽस्ति न वा मित्रारिलक्षणम्[1]।
न वा प्रयास बाहुल्यं[2] न काय क्लेश सम्भवः॥७॥

"नात्रेति—"साधकानां शीघ्रसिद्धयर्थं मंत्र शुद्धिमथो ब्रुवे—" मन्त्र महार्णव २४।१ इत्यनुसारेण मंत्रशुद्धिः, मंत्र-संस्कारादयस्यच आवश्यकता भवति। तै अभावे मंत्रसिद्धिर्न जायते। फलमपि च न लभ्यते। किन्तु अस्मिन् मंत्रे

१. नात्र चिन्ता विशुद्धिस्तु नारि मित्रारि दूषणम्, क-नात्र चिन्ता विशुद्धिर्वा नारि मित्रादि चिन्तनम् २. न वित्त बाहुल्यम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सिद्धादीनाम् अ क थ ह चक्रोक्त सिद्ध-साध्य सुसिद्धारीणाम् अपेक्षा नास्ति। न वा मित्रारि लक्षण "मित्यनेन कुलाकुल चक्रविचारोऽपि नास्ति। अर्थात् चक्रद्वय कथनेन कस्यापि चक्रस्य विचारो नापेक्षित इति सूचितम्।"

"तथैव—अन्य मंत्रे प्रयास बाहुल्यं अपेक्षते। यथा-हठ-योगेन शरीरशुद्धि, विधाय सिद्धिपीठे जपं चरेत् इत्यादि तथा च—"कलौ संख्या चतुर्गुणाः" इति। किन्तु-अस्मिन मंत्रे एत-त्सर्वं नापेक्षितः। तथा च योगशास्त्रोक्त प्राणायामादिना शरीर क्लेशोऽपि नापेक्षितः। यस्या विद्यायाः स्मरणमात्रेण केवलं जप-मनन-मात्रेण नरो प्रेयश्रेयौ प्राप्य जीवनमुक्तो भवति। अतएवोक्तम्—"

'भोगश्च मोक्षश्च करस्थ एव।"

"तर्हि—किम् आवश्यकं वर्ततेऽत्र? वीर्यस्योर्ध्वीकरण मावश्यकं वर्तते। शरीरस्याधः प्रदेशे एकोऽग्निः अनुद्युत् सूर्या-त्मको वर्तते। अपरः अग्निः शिरसि वर्तते। सूर्य उदिते सति, अनयोर्द्यावा पृथिव्ययोर्मध्ये तौ अग्नी परस्परं संगतौ भवतः। तयोः सूर्याग्न्यो सम्बन्धिनो रश्मयः परस्परसम्मेलनेन द्यावा पृथिव्यौ आश्रयन्ति। शुक्रसंरक्षणेन तपोमहिम्ना अग्निरूपेण तस्या अधिदेवता भवतीत्यर्थः।"

"असौ वा आदित्यः शुक्रः" —शतपथब्राह्मण ६।४।२।२१;
—ताण्डय्य ब्राह्मण १५।५।६

'ज्योतिः शुक्रमसौ—आदित्यः" —ऐतरेय ब्राह्मण ७।१२
इयं-पृथिवी हि अग्निः" —शतपथब्राह्मण ६।१।१।१४
"योषा वाऽअग्निः" —शतपथब्राह्मण १४।६।१।१६

अर्वागन्य इतो अन्यः पृथिव्या अग्नी समेतोनभसी अन्तरेमे।
तयोः श्रयन्ते रश्मयोधि दृढास्ताना तिष्ठति तपसा ब्रह्मचारी॥

अथर्व० ११।७।११

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"अत्र ब्रह्मचारी=नाष्टाङ्गमैथुनवर्जितः । अपितु-अष्टाङ्ग-मैथुनमाचरतोऽपि शुक्रस्खलनं न भवेत् । स एवात्र ब्रह्मचारीति । इत्युनुभवसिद्धम् ।

ऋष्यादि कथनम्—

यस्या स्मरणमात्रेण जीवन्मुक्तो भवेन्नर[1]: ।
भैरवोऽस्य ऋषि प्रोक्तः उष्णिक् छन्द उदाहृतम्[2] ॥८॥
देवता कालिका प्रोक्ता[3] लज्जाबीजन्तु बीजकम् ।
शक्तिस्तु[4] कूर्चबीजं स्याद्दनिरूद्ध सरस्वती ॥९॥
कवित्वार्थे नियोगः[5] स्यादेवं ऋष्यादि कल्पना ।
अङ्गन्यास-करन्यासौ यथावदभिधीयते ॥१०॥

यस्येति—"यस्या=विद्यायाः, स्मरण मात्रेण=जपमात्रेण, नरः, जीवनमुक्तो भवति । अचिन्त्य प्रभावो खलु-अस्या विद्यायाः । यद्भोगेन मोक्षो भवति । किमाश्चर्यमतः परम् ?

भैरव इति—ऋष्यादिकमाहः—यतः—

"ऋषि छन्दोऽपरिज्ञानात् न मंत्रः फलदो भवेत् ।
दौर्बल्यं याति मंत्राणां विनियोगमजानताम् ॥"

—श्यामा रहस्ये

ऋषिः— छन्दः देवतादीनामर्थं निर्वचनञ्च—

ऋषिः—"ऋषि वर्णादिको धातू स्तो गत्यां प्रापणेऽपि च ।
ताभ्यां यद्यत्स्वरूपं स ऋषिः स्याद् गुरुवाचक. ॥"

छन्दः—"इच्छा दानार्थकौ धातूस्तश्छाद्यश्च दादिकः ।
तयोरिच्छां ददातीति छन्दो मंत्रार्णवाचकः ॥"

देवता :—"आत्मनो देवता भाव प्रदानाद् देवतेति च ।
पदं समस्तमंत्रेषु विद्वद्भिस्समुदीरितम् ॥"

---

१ अस्यां स्मरणमात्रेण सिद्धयोऽष्टौ भवन्ति हि ।" ख-ग-घ । २. छन्दो वरानने 'ग' ३ देवी । क । तंत्र सारे श्याम रहस्ये च उद्धृत काली-तंत्रवचनावूल्या "बीजकम्" इत्यतः परं शक्तिस्तु" इत्यन्तः पूर्वं-"कीलकञ्चाद्यबीजं स्याच्चतुर्वर्ग फलप्रदम्" इत्यधिकः पाठो दृश्यते । ५. कवित्वे विनियोगः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ऋष्यादि न्यासस्यावश्यकतामाहः—

किं नाम न्यासम् । न्यासोहि नाम स्वशरीरे-इष्टदेवस्य मंत्रस्य च स्थापनम् । सम्यक् कृते न्यासे सिद्धे-सति साधको देवस्वरूपो भवति । स स्वयमेव देवोभवति । अतएवोक्तम्—

ऋषिच्छन्दो देवतानां विन्यासेन विना यदि ।
करोति साधको यत्र तत् सर्वं विफलं भवेत् ।।

—शाक्तानन्दतरङ्गनी

ऋष्यादि न्यास स्थानमाहः—

ऋषिर्गरूत्वात् शिरसैवधार्य छन्दोऽक्षरत्वात् रसनागतं स्यात् ।
धियाऽवगन्तव्यतया सदैव हृदि प्रदिष्टा मनु देवता च ।।

—प्रपञ्चसारसारसंग्रहे-७-पटले ।

गुरुत्वात् मस्तके चास्य न्यासस्तु परिकीर्तितः ।
सर्वेषां मंत्र तत्त्वानां छादनाच्छन्द उच्यते ।।
अक्षरत्वात् पदत्वाच्च मुखे छन्दः प्रकीर्तितः ।
सर्वेषामेव जन्तूनां भाषणात् प्रेरणां तथा ।।
हृदयाम्भोज मध्यस्थां देवतां तत्र तां न्यसेत् ।।

—गौतमीये ।

ऋषिं न्यसेन्मूर्ध्नि देशेच्छन्दस्तु मुखपङ्कजे ।।
देवता हृदये चैव बीजन्तु गुह्यदेशके ।
शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत ।।

—शाक्तानन्द तरङ्गनी

अङ्गानामर्थस्तुः—

हृदयं बुद्धिगम्यत्वात् प्रणामः स्यान्नमः पदम् ।
क्रियते हृदयेनातः बुद्धिगम्या नमस्कृतिः ।।
तुङ्गार्थं शिरसि चेति विषयाहरणे द्विठः ।
शिरो मंत्रेण चेत्तुङ्ग विषयाहृति लक्षणा ।।
शिखातेजः समुद्दिष्टा वषडित्यङ्गमुच्यते ।
तत्तेजोऽस्यतनुः प्रोक्ता शिखामंत्रेण मंत्रिभिः ।।
कव् गृह्णन् इत्यस्माद्धातोः कवचसंभवः ।
हुं तेजस्तेजसा देहो गृह्यते कवचं ततः ।।
असुत्रासादिकौ धातू संक्षेप चलनार्थकौ ।
तेनानिष्टं समाक्षिप्य चालयेत् षट्पदाग्निना ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"नेत्रं दृष्टि समुद्दिष्टा वौषट् दर्शनमुच्यते।
दर्शनं दृग्विषयेण स्यात् तत्तेजो नेत्रवाचकम् ॥"

—प्रपञ्च सारसारसंग्रहे ७ पटले।

ऋष्यादि न्यासे-अङ्गुलिनियममाहः—

अंगुष्ठञ्च शीर्ष देशे मध्यमानामिका मुखे।
अंगुष्ठ रहितं देवि हृदि देव विनिर्दिशेत् ॥
तत्त्वाख्य मुद्रया देवि गुह्ये बीजं विनिर्दिशेत्।
शक्तिञ्च विन्यसेत् भद्रे मध्याङ्गुल्या पद द्वये ॥
कीलकं विन्यसद्देवि सर्वाङ्गे तलयोस्तथा ॥

—काली सर्वस्वे

किं नाम ऋषिः ?

'ऋषयः अतीन्द्रियार्थदर्शिनः" —सायणः

"ऋषयः मंत्रद्रष्टारः"

"ऋषति प्राप्नोति सर्वान् मंत्रान् ज्ञानेन पश्यति।"

—वाचस्पतिः।

"महेश्वर मुखात् ज्ञात्वा यः साक्षात् तपसा मनुम्।
संसाधयति शुद्धात्मा स तस्य ऋषि रीरितः ॥"

—गौतमीये।

एतत् साधारण विषयम्। यत् प्रथममादिपुरुषात् मंत्रं लब्ध्वा तन्मंत्रसाधनेन सिद्धो बभूव। स च तन्मंत्रस्य ऋषिः, इति कथ्यते। परमत्र विशेषः स्यात्-कालिकायास्तु महेश्वर रूपी काल्यभिन्नो महाकाल एव लोक शिक्षार्थं मंत्रं साधयामास। अतएव स ऋषित्वं प्राप्तः। महाकालस्य कालीमन्त्र साधने कर्पूरस्तवादिकं प्रमाणम्।

एतन् मंत्रस्य भैरवो ऋषिः। तत्तच्छक्तेः तत्तन्नामधेयः शिव एव भैरव पद वाच्य। अतः कालिकाया महाकाल एव भैरव ऋषिश्च। यथा—"कालिकाया महाकालः, सुन्दर्या ललितेश्वरः" इति पुरश्चर्यार्णवे-शक्तिसंगम तंत्रवचनमुद्धृतम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अस्य मन्त्रस्य उष्णिक् छन्दः। दक्षिणा कालिका देवता। बीजं लज्जा=ह्रीं बीजम्। शक्तिः कूर्चबीजं हूंकारः। आद्यबीजं "क्रीं" कीलकम्। यथा

"कीलकञ्चाद्य बीजं तु चतुर्वर्गार्थ सिद्धये।"

—कालीक्रमे

कवित्वार्थे विनियोगः। अत्र "कवित्वार्थे" इत्युपलक्षणम्। यद्यद् स्वाभिलषितं तदर्थे विनियोगः। तंत्रे विविधफलश्रवणात्। ततो यथेष्टमभिलाषः कार्यः। यथा—

"भैरवोऽस्य ऋषिप्रोक्तः, उष्णिग् छन्द उदाहृतम्।
दक्षिणा कालिका देवी चतुर्वर्गफलप्रदा॥"

—श्यामारहस्ये

एवं श्यामारहस्योद्धृत कुलचूड़ामणि वचने पूर्वोक्त कालीक्रम वचने च चतुर्वर्ग-फललाभ-स्मरणात् अभिलाष मात्रे—"चतुर्वर्ग सिद्धये विनियोगः" इति सम्प्रदायिकाः। तंत्रसारे तु "पुरुषार्थ सिद्धये विनियोगः" इति वाक्यं लभते। अयं तु शब्दभेद एव। यतः धर्म-अर्थ-काम-मोक्षरूपचतुर्वर्ग एव पुरुषार्थः, इति सिद्धः।

ऋष्यादि न्यास प्रयोगस्तु—कृताञ्जलिः पठेत्। अस्य मंत्रस्य भैरवः ऋषि। उष्णिक् छन्दः। श्री दक्षिणकालिका देवता। ह्रीं बीजम्। हूं शक्तिः। क्रीं कीलकम्। चतुर्वर्ग सिद्धये विनियोगः। इति

ततश्च—अंगुष्ठेन शिरसि-ॐ भैरवाय ऋषये नमः।

मध्यमानामिकाभ्यां मुखे-ॐ उष्णिक् छन्दसे नमः।

अंगुष्ठरहित-अंगुलिभिः हृदये-श्री दक्षिणकालिकायै देवतायै नमः।

संलग्नांगुष्ठानामिकारुपतत्त्वमुद्रया गुह्ये- ॐ ह्रीं बीजाय नमः। मध्यमाङ्गुल्या पद द्वये ॐ हूं शक्तये नमः। हस्त द्वयतलयोः सर्वाङ्गे-ॐ क्रीं कीलकाय नमः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"अनिरूद्ध सरस्वति" इति विद्याया विशेषणम् । अनिरूद्धा=अनर्गला सरस्वती=वाग् यया सा अनिरूद्ध सरस्वती विद्या । एतद् विद्योपासकस्य मुखाद् अनर्गला गद्य-पद्यमयी वाक् निर्गच्छति ।

"तेषां गद्यानि पद्यानि च मुख कुहरात् उल्लसन्त्येव वाचः ।"
—कर्पूरस्तवे १

अङ्गन्यास-करन्यासमाहः—

षड्दीर्घ भाजा बीजेन प्रणवाद्येन कल्पयेत् ।
हृदयाय नमः प्रोक्तं शिरसे वह्निवल्लभा ॥११॥
शिखायै वषडित्युक्तं कवचाय हुमीरितम् ।
नेत्रत्रयाव वौषट् स्यात् अस्त्राय फडितिक्रमः[1] ॥१२॥

षड् दीर्घभाजेति

षड् दीर्घान्—आ-ई-ऊ-ऐ-औ-अः, इति दीर्घ स्वरान् भजते इति षड् दीर्घ भाक् । प्रणवाद्येन=आदौ भव आद्यः, प्रणवो आद्यो यस्य तेन प्रणवाद्येन षड्दीर्घभाजा बीजेन करन्यास-अंगन्यासौ कल्पयेदित्यर्थः । अत्र बीजविषये मतभेदो दृश्यते । यथा—

श्रीमत्पूर्णानन्द परमहंसमते—आद्य बीजम् क्रीं कारः ।

तंत्रसारकारमते — आद्यबीजम् ह्रींकारः । इति तत्समीक्षा—श्रीमत्पूर्णानन्द परमहंसस्तु, एवं व्याख्यातवान्—

" श्यामारहस्ये कालीतंत्रवचनमुद्धृत्य—"बीजं मंत्राद्य बीजन्तु, न तु पारिभाषिकं, तंत्रान्तर दृष्टत्वाच्च । यथा—

प्रणवञ्चाद्यबीजं षड्दीर्घस्वरभाजितम् ।
कुर्यात् षडङ्ग विन्यासं मूलखण्डत्रयेण वा ॥

मंत्राद्यबीजं क्रींकारः । पारिभाषिक बीजं ह्रीं कारः "लज्जाबीजन्तु बीजकम्" इति वचनात् ।

१. नेत्रत्रयाय वौषट् च अस्त्राय फट् प्रकीर्तितम् । ख-ग-घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तंत्रसारकारस्तु—"तेन मायया षडङ्गन्यासः। "षड्दीर्घ-भाजा बीजेन प्रणवाद्येन कल्पयेत् ।"

वीरतंत्रे—"दीर्घषटक्युताद्येन प्रणवाद्येन कल्पयेत् ।" इति वा 'इत्युक्तवान्' एतन्मतेऽक्रींकार ह्लींकारयोरिच्छा विकल्पः, श्यामारहस्यकारेण तु ह्लींकारो नाङ्गीकृत। सम्प्रदाय भेदेन—क्रीं बीजेन ह्लीं बीजेन च कराङ्गन्यासौ प्रचलितौ।

स्वतंत्रवचने-पक्षान्तरमुक्तम्। यथा 'मूलखण्डत्रयेण वा' श्यामारहस्येऽपि—"मूलखण्ड त्रय द्विरावृत्या वा कुर्यात्-आद्य सप्तबीजेन हृदयं, द्वितीयखण्ड षडक्षरेण शीर्षं, तृतीय खण्डेन 'शेषाक्षरेण शिखां' पुनः—आद्य खण्डेन कवचं, द्वितीय खण्डेन नेत्रत्रयं, तृतीयखण्डेन अस्त्रम्। इत्थम् वा षडङ्गन्यासं कुर्यात्।

"षडङ्गानि न्यसेन्मंत्री त्रिःसकृद्वा यथाक्रमम् ।"

इति भैरवतंत्र वचनात् त्रिः सकृद्वा अङ्गन्यासं कुर्यात्। वारत्रये फल-बाहुल्यम्। अङ्गन्यासे-अङ्गुलिनियमः—

हृदयं मध्यमाऽनामा-तर्जनीभिः स्मृतं शिरः।
मध्यमा तर्जनीभ्यां, स्यात् अङ्गुष्ठं शिखा स्मृता ॥
दशभिः कवचं प्रोक्तं तिसृभिर्नेत्र मीरितम्।
प्रोक्ताङ्गुलिभ्यां अस्त्रं स्यात् अङ्गक्लृप्तिरियं मता ॥

—तंत्रसारे

अत्र तिसृभिः-तर्जनी-मध्यमा-अनामाभिः ।

"तर्जनी-मध्यमा-अनामा प्रोक्ता नेत्रत्रये क्रमात् ।"

—राघवभट्टः

"तर्जनी-मध्यमाभ्यान्तु ततोऽस्त्रं विन्यसेत्प्रिये ।"

—दक्षिणामूर्तिसंहिता

प्रयोगस्तु—

ओं क्रां अंगुष्ठाभ्यां नमः। ओं क्रीं तर्जनीभ्यां स्वाहा।
ओं क्रूं मध्यमाभ्यां वषट्। ओं क्रैं अनामिकाभ्यां हुम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ओ क्रौं कनिष्ठकाभ्यां वौषट्। ओं क्रः करतलकरपृष्ठाभ्यां फट्।

—इति करन्यासः

ओं क्रां दक्षहस्त-तर्जनी-मध्यमा-अनामिकाभिर्हृदये नमः।
ओं क्रीं दक्षहस्त-तर्जनी-मध्यमाभ्यां शिरसि स्वाहा।
ओं क्रूं दक्षहस्त मुष्टिवद्ध दक्षहस्तांगुष्ठेन शिखायै वषट्।
ओं क्रैं हस्तद्वय-सर्वांगुलिभि सर्वांगे कवचाय हुम्।
ओं क्रौं दक्षहस्त-तर्जनी-मध्यमा-अनामाभि नेत्रत्रयाय वौषट्।
ओं क्रः—दक्षहस्त तर्जनी-मध्यमाभ्याम्, वामहस्ततले
तालत्रयं दत्त्वा अस्त्राय फट् इति वदेत्।

—इतिषडङ्ग न्यासः।

नेत्र न्यासे तु स्वललाटे नासिकामूलदेशे तृतीयं कल्पयित्वा तर्जन्या दक्षनेत्रे, मध्यमया ऊर्ध्वनेत्रे, अनामया वामनेत्रे न्यसेत्। करन्यासे—वामहस्ततले, दक्षहस्तपृष्ठेन षष्ठन्यासः। अङ्गन्यासे—दक्षहस्त तर्जनी-मध्यमाभ्याम् वामहस्ततले, तालत्रय दानम्—इति विशेषः।

करन्यास नियम प्रमाणन्तु—

अंगुलीषु क्रमादङ्गैरंगुष्ठादिषु विन्यसेत्।

कनिष्ठान्तासु तद् वाह्य तलयोः करयोः सुधीः। अस्त्रेण तालत्रितयम्" इति।

—प्रपञ्च-सार-सार संग्रहे ७ पटले

इति क्रीं बीजेन न्यास प्रयोगः।

ह्लीं बीज द्वारा न्यासे तु—कां कीं क्रूं कैं कौं क्रः इत्येतेषु ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः इति पठनीयम्। अन्यत् सर्वमेकरूपम्। प्रपञ्चसार-सार संग्रहोक्ते त्वयं विशेषः—

अथ करन्यास प्रकार उच्यते—"उभाभ्यां कराभ्यां तत् तदङ्गुष्ठाद्यङ्गुलीषु-क्रमेण-अङ्गुलिमूलमारभ्याऽग्रं मंत्रपूर्वकम् अंगुष्ठाभ्यां नमः। इत्यादि न्यसेत्। तत्र तर्जनीभ्याम् अंगुष्ठयोः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इतरासु च अंगुष्ठाभ्यां न्यसेत्। तत्र पञ्चांग पक्षे अंगुलिष्वेव विन्यसेत्। षडङ्ग पक्षे षष्ठो न्यासः। तावत् वामहस्ततलेन दक्षिणहस्ततले च न्यसेत्। एवं कर पृष्ठयोश्च।

—प्रपञ्चसार-सार संग्रहे सप्तमे पटले

अत्र—"अङ्गन्यास-करन्यासौ मायया दीर्घमाचरेत्।" इति-शाक्तानन्द तरङ्गिणीधृत वचनेनापि शाक्त-साधारण पूजा प्रसङ्गे तथाभिहितम्। सत्साम्प्रदायिकैस्तु करन्यास एव आदौ क्रियते। यथा—

करन्यासं पुरा कृत्वा देहन्यासमतः परम्।
अङ्गन्यासं न्यसेत्पश्चात् एष साधारणी विधिः॥

इति राघवभट्ट वचनेनापि करन्यासाग्र कर्त्तव्यम् सिद्धयति। पाठक्रमात् छान्दक्रमस्य बलवत्त्वात् अत्रापि करन्यास एवादौ करणीयः।

एवं यथाविधिं[1] कृत्वा वर्णन्यासं समाचरेत्।
वर्णन्यासं प्रवक्ष्यामि येन देवीमयो भवेत्॥१३॥
अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वै हृदयं स्पृशेत्[2]।
ए ऐ ओ औ ततोऽप्यं अः क ख ग घ पुनस्ततः॥१४॥
उक्त्वा च दक्षिणं भुजं स्पृशेत् साधकसत्तमः।
ङ च छ ज समुच्चार्य झ ञ ट ठ ड ढ तथा॥१५॥
इति वामभुजे न्यस्य ण त थ द पुनः स्मरेत्।
ध न प फ ब भ इति दक्षिणजङ्घके न्यसेत्॥१६॥
म य र ल व श ष स ह ळ क्ष वामजङ्घके[3]।
इति वर्णान् प्रविन्यस्य मूलविद्यां समुच्चरन्[4]॥१७॥

१ यथाविधम् 'ख' २–हृदयेन्यसेत् 'क ३–इतिवामके. ४-इतिव्याप्त्या प्रविन्यस्य मूलविद्यां समुच्चरेत 'ख-ग घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

[1]सप्तधा व्यापकं कुर्यात् येन देवी मयो भवेत् ।
व्यापकत्त्वेन संन्यस्य ततो ध्यायेत्परां शिवाम् ।।१८।।

एवमित्यादि—इत्थं प्रकारेण करन्यासं अङ्गन्यासमुक्त्वा तद् रहस्यं पुनर्वर्णयति ।

इज्यमानो हृदात्मायं हृदये स्याच्चिदात्मकः ।
क्रियते तत्परत्वन्तु हृन्मन्त्रेण ततः परम् ।।
सर्वज्ञादि गुणोत्तुङ्गे संविद्रूपे परात्मनि ।
क्रियते विषयाहारः शिरो-मन्त्रेण धीमता ।।
हृत्–शिरो-रूप-चिद्-धाममयता भावना दृढा ।
क्रियते निजदेहस्य शिखामन्त्रेण सादरम् ।।
मन्त्रात्मकस्य देहस्य मन्त्रवाच्येन तेजसा ।
सर्वतो वर्म्ममन्त्रेण क्रियतेऽनन्यहृंवृतिः ।।
यद्ददाति परं ज्ञानं संविद्रूपे परात्मनि ।
हृदयादि मयं तेजः स्यात्-एतत्-नेत्र संज्ञकम् ।।
आध्यात्मिकादिरूपं यत्साधकस्य विनाशयेत् ।
अविद्या जातमस्त्रं तत् परं धाम समीरितम् ।।

—राघवभट्टधृत गौतमीये ।

एवं यथाविधि करन्यासाङ्गन्यासौ कृत्वा वर्णन्यासं समाचरेत् । तत्फलञ्च—"देवी मयो भवेत् । यतः देवो भूत्वा यजेद्देवम् । नादेवो देवं यजेत्" इति अतः वर्णन्यासविधिं वक्ष्ये वर्णन्यासमित्यादि-तत्रद्विविधो हि वर्णन्यासः । सविन्दुवर्णन्यासः, निर्विन्दुवर्णन्यासश्च । अत्र निर्विन्दुवर्णन्यास एव सम्मतः । यथा—"अथैतल्लिखित वचने स्वारस्यात् विन्दुरहित एव वर्ण न्यासः । विरूपाक्षमते तु सविन्दुरेव, इत्यस्य प्रमाणमुक्तं कवचे लिपिन्यासे ।" इत्युक्तम् ।

—श्यामारहस्ये कालीतंत्रवचनम्

तंत्रसार कारेण तु सविन्दु लिपिन्यास लिखित्वा "कालीतंत्रे पुनर्विदुः ।" यथा–'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वै हृदयं

१–श्लोकमेतत् । घ, पुस्तकेनास्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्पृशेत् ।" इत्यादि । किन्तु — "सविन्दून् वा न्यसेदेतान् निर्विन्दून् वाथ वर्णवान् ।" इत्याचार्य परिगृहीत भैरवीय वाक्याद् उभयमेव युक्तम्" इति लिखितम् ।

राघवेन्द्रभट्टाचार्यस्तु नित्यनैमित्तिककाम्यार्च्चनपद्धतौ सविन्दुलिपिन्यासं उक्त्वा "इदमत्रावधेयम्—अयं सविन्दुवर्णन्यासस्तुविरूपाक्ष सम्मतः" इत्युक्तम् । श्यामारहस्यकारेणापि न्यासप्रयोगे सविन्दुलिपिन्यास एव लिखितः । विरूपाक्षसम्मत सविन्दुवर्णन्यास प्रमाणन्तु श्यामारहस्ये विरूपाक्षकृत कालीकवचे द्रष्टव्यम् । एतावता सविन्दुकनिर्विन्दुकयोः, इच्छाविकल्पेऽपि सविन्दुकन्यास एव शिष्टैर्व्यवह्रियते । कालीतंत्र सम्मत निर्विन्दुकन्यासस्य व्यवहारो विरलतमः । तथा च हरतत्त्वदीधितौ- "सविन्दु-निर्विन्दूभयस्य शास्त्रसिद्धत्वात्, इच्छा वैकल्पिकेऽपि साम्प्रदायिका सविन्दुमेव व्यवहरन्ति" इति । बहुषु हस्तलिखित कालीतंत्रेषु लिपिन्यासे निर्विन्दुकः पाठो दृश्यते । स तु लिपिकरप्रमादोऽवगन्तव्यः । तंत्रसारश्यामारहस्य नित्यनैमित्तिककाम्यार्च्चनपद्धतिकाराणामुक्तेर्विरोधात् । हरतत्त्वदीधितिकारेणापि तथाविधं कालीतंत्रं दृष्ट्वा यद्—"इह वर्णन्यासः कालीतंत्रादौ सविन्दुकः कङ्कालमालिनी तंत्रादौ तु निर्विन्दुरिति" इदं लिखितं तद् भ्रान्तिपूर्णम् । स्त्री-शूद्रयोस्तु निर्विन्दुर्वर्णन्यासः । यथा—

नादविन्दुसमोपेतं सर्ववर्णे व्यवस्थितम् ।
स्त्रीशूद्रयोरेतदेव नादविन्दुविवर्जितम् ॥

—ताराहस्यधृततारार्णवे ।

कालीतंत्रसम्मतनिर्बिन्दुकन्यासप्रयोगो–यथा—

हृदये— अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ नमः,

दक्षभुजे– ए ऐ ओ औ अं अः क ख ग घ नमः ।

वामभुजे—ङ च छ ज झ ञ ट ठ ड ढ नमः ।

दक्ष जङ्घायाम्—ण त थ द ध न प फ ब भ नमः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वाम जङ्घायाम्—म य र ल व श ष स हळक्षः नमः।

सबिन्दुकन्यासे तु प्रतिवर्णे अनुस्वारं संयोज्य न्यसेदिति विशेषः।

सर्वत्र—दक्षहस्तांगुष्ठानामिकाग्रसम्मेलनरूप तत्त्वमुद्रया न्यसेत्।

दक्षभुजे तु—वामहस्ततत्त्वमुद्रया न्यसेत्—दक्षहस्त तत्त्वमुद्रया न्यासासम्भवात्। तथा च गौतमीये—

मनसा वा न्यसेत् न्यासान् पुष्पेणैवाश्च वा मुने।
अङ् गुष्ठानामिकाभ्याम् वा अन्यथा विफलं भवेत्॥

इत्यत्र भास्करराय मते-अन्तर्यागन्यासे मनसा। देवताग्रे पुष्पेण स्वगात्रेऽङ्गुष्ठानामिकाभ्यां न्यसेत्।

केचित्तु—वा शब्दात् इच्छाविकल्पार्थान् मन्यन्ते। स्व-गात्रे वाह्यन्यासे मनसा न्यासस्यासङ्गत्वात् इच्छाविकल्पार्थः सुष्ठु-तया न प्रतिभाति। अतो भास्कररायमतमेव समीचीनम्।

"एवमन्तः प्रविन्यस्य मनसा तो बहिर्न्यसेत्॥"

इत्यगस्त्यसंहिता वचनेन—

"स्वदेहेऽनामया कार्यः पुष्पेण सुरमूर्तिषु।"

इति मेरू तंत्र वचनेन च अमुमेवार्थं प्रकटयति।

इत्थं न्यासं कुर्यात्। यथा—

प्रातः काले तथा पूजा समये होम कर्मणि।
जपकाले तथा तेषां विनियोगः पृथक् पृथक्॥
पूजाकाले समस्तं वा कृत्वा साधकपुङ्गवः॥

—योगिनीहृदय २।६२

येन देवी मयो भवेदिति—एवं कृतेन न्यासेन साधको स्वयं देवीस्वरूपमेव जायते। "सर्व रूप मयी देवी-सर्वं देवी मयं जगत्" सम्पद्यते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"एवं यो न्यस्तगात्रस्तु स पूज्यः सर्वयोगिभिः।
नास्त्यस्य पूज्यो लोकेषु पितृमातृ मुखो जनः।
स एव पूज्य सर्वेषां स स्वयं परमेश्वरः॥"

—योगिनीहृदय २।११

विद्याया परं रूपं प्राप्यते, अयंभावः।

ऊनविंशादारभ्य षड्विंश पर्यन्तमष्टौ पीठन्यासश्लोकाः सर्वत्रादर्शनात् केवले "घ" प्रतौ मिलितत्वात्-प्रक्षिप्ता इति मन्यते। तथाप्यत्र पठिता। यतः—हरतत्त्व दीधितौ-"यद्यपि कालीतन्त्र-वीरतन्त्रयोः, अनिरूद्धसरस्वती विद्यापूजायां मातृकान्यासो नोक्त-स्तथापि निगदितभूरिवचनैक वाक्यत्वात् निषेधाभावाच्च तस्या-मपि स कर्त्तव्यः। अन्यथा तत्रानुक्तपीठन्यास बीजन्यास तत्त्वन्यासानाम् अवश्य कर्त्तव्यत्वेऽपि तत्परिहारापत्तिः" इति।

पीठन्यासं ततः कुर्याद् येन देवीमयो भवेत्।
हृत्सरोजे सुधासिन्धुमध्ये द्वीपं सुवर्णजम् ॥१९॥
परितः पारिजातांश्च मध्ये कल्पतरूं ततः।
तन्मूले हेम निर्माणं द्वाश्चतुष्टय भूषितम् ॥२०॥
मण्डपं मन्दवातेन पराक्रान्तं सुधूपितम्।
मन्त्रैस्तत्र प्रतिष्ठाप्य तत्र पूजां समाचरेत् ॥२१॥
श्मसानं तत्र सम्पूज्य तत्र कल्पद्रुमं यजेत्।
तन्मूले मणिपीठञ्च नानामणिविभूषितम् ॥२२॥
नानालंकारभूषाढ्यं मुनिर्देवैश्च भूषितम्।
शिवाभिर्बहुमांसास्थि मोदमानाभिरन्ततः ॥२३॥
शवमुण्डा-चतुर्दिक्षुश्चिताङ्गारास्थिभूषिताः।
इच्छा-ज्ञान-क्रिया चैव कामिनी कामदायिनी ॥२४॥
रति रतिप्रिया नन्दा मध्ये चैव मनोन्मनी।
हसौः सदाशिवेत्युक्त्वा महाप्रेतेति तत्परम् ॥२५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पद्मासनाय हृदयं पीठन्यास उदाहृतः ।
एवं देहमये पीठे चिन्तयेदिष्टदेवताम् ॥२६॥

पीठन्यासमित्यादि—पीठमेतत् सहस्रारे सुधासिन्धुमध्ये यद् हृत्पद्मं अस्ति तदेव भगवत्याः पीठम्-आसनमस्ति । तमेव-श्रुतौ-उपनिषत्सु-तान्त्रिक वाङ्मये च दहरमिति कथ्यते । यथा—

"अस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मदहरोऽस्मिन्नन्तराकाशः'

—छान्दोग्योपनिषद् ८।१।१

"किं तदत्र विद्यते ?" इति जिज्ञासायाम्—

—छान्दोग्योपनिषद्

अस्योपरि—

"तत्र हि ब्रह्म उपलभ्यते ।"

– ब्रह्मयोगी

'ततो रक्तोत्पलाभासं हृदयायतनं महत् ।
दहरं पुण्डरीकं तत् वेदान्तेषु निगद्यते ॥"

—क्षुरिकोपनिषद्

अस्योपरि—"ततः सुषुम्णामार्गात् रक्तोत्पलाभासं हृदयायतनं नाड्यपेक्षयामहत् । "दहरं पुण्डरीकं वेश्म ।" इत्यादि वेदान्तेषु यत् दहरं पुण्डरीकं निगद्यतेतत्र-सुषुम्णानालार्पित हृदये दृगादीन् त्रीनपि प्रत्याहरेत् ।"

— ब्रह्मयोगी

"दहरं विपाप्मं परवेश्मभूतम् ।
हृत्पुण्डरीकं पुरमध्य संस्थम् ॥"

"दहरोऽस्मिन्नन्तराकाशः" इति श्रुत्युक्तरीत्या । हृदयाब्जमध्यगतमाकाशं दहरम्' इत्युच्यते । तत्रैव भगवत्या पीठम् । अतएवोक्तम्—

महापद्मवनान्तस्थे वाग्भवे गुरुपादुकाम ।
आप्यायित जगद्रूपां परमामृत वर्षिणीम् ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सञ्चिन्त्य परमाद्वैत भावनामृत घूर्णितः ।
दहरान्तरसंसर्पत्-नादालोकनतत्परः ॥
विकल्प रूप संजल्प विमुखोऽन्तर्मुखः सदा ।
इन्द्रिय प्रीणन द्रव्यैर्विहित स्वात्मपूजनः ॥"

—योगिनीहृदयः ३ । ५-७

"संयम्येन्द्रियसञ्चारं प्रोचरेत् नादमान्तरम् ।
एष एव जपः प्रोक्तो न तु वाह्य जपो जपः ॥"

—अमृतानन्दः

तृतीयोऽयं सोपानः । द्वितीयस्तु—

"पीठानि विन्यसेद्देवि मातृकास्थानके पुनः ।" इत्यारभ्य
"एते पीठाः समुद्दिष्टा मातृकारूपकाः स्थिताः ॥" पर्यन्तमुक्तम्

— योगिनीहृदय ३।३६-४३

तद्विधिस्तु—

"ततः पञ्चादशदेकञ्च पीठानां विन्यसेत्क्रमात् ।
लिपिक्रम समायुक्तान् लिपिस्थानेषु विन्यसेत् ॥"

—ब्रह्माण्ड पुराणे

"अं मनुः कामरूपाय नमः" इत्यादि प्रयोगः । इति दिक्
द्वितीयोऽयं सोपानः । प्रथमस्तु—

"कृतयुगे दक्षक्रतौ शिवनिन्दां श्रुत्वा प्राणांस्त्यक्तवत्याः सत्याः शरीरं शिरसि धृत्वा भ्रमति शिवे विष्णुना चक्रेणच्छिन्नास्तस्या अवयवा यत्र यत्र पतिताः त एव देशा एकपञ्चाशत्महापीठा अभवन् । इति पौराणिकी कथाः । तेषु महापीठेषु क्रमशः गत्वा जपादपि सिद्धिर्भवति । यतस्तेषु पीठेषु बहुभि साधकैः, तपस्तप्तम् । सिद्धिश्च प्राप्ता । परिशिष्टेद्रष्टव्यानि ।

ध्यानमस्याः प्रवक्ष्यामि स्मरणात् शिवतां व्रजेत् ॥२६॥

विविध न्यासान्तरम्-देवीमयोभूत्वेत्यर्थः, जपारम्भे ध्यानं कथयामि ।
यतः—जपात् पूर्वं मध्येऽन्ते च ध्यानकरणात् क्षिप्रसिद्धिमाप्नोति ।
अतः—ध्यानमाह-ध्यानमिति-तत्र किं नाम ध्यानम् ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ध्यै चिन्तम्ः भावे ल्युट् चिन्तम्

"तत्र प्रत्ययैकतानता ध्यानम्"

—पातञ्जल योगदर्शन ३।२

इष्ट स्वरूपे ध्येयावलम्बनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः। द्विविधं हि ध्यानम्। स्थूलं-सूक्ष्मञ्च। तथा—

ध्यानं तु द्विविधं प्रोक्तं स्थूल-सूक्ष्म प्रभेदतः।
साकार स्थूलमित्याहुर्निराकारस्तु सूक्ष्मकम्॥

—कुलार्णवतंत्रे ९।३

द्विविधे हि ध्याने-निश्चलत्वञ्चमनसः– अत्यावश्यकं वर्तते। "स्थूलेऽपि निश्चलं चेतो भवेत् सूक्ष्मेऽपि निश्चलम्।"

—कुलार्णवतंत्रे ९।४

अथवा—मन ऐकाग्रता सम्पादनाय एव ध्यानं क्रियते।

करालवदनामित्यारभ्य--श्मशानालय वासिनीम् श्लोक २७ तः—३६ पर्यन्तम् ध्यानमाह। यथा—

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमाला विभूषिताम्[1]॥२७॥

कराल वदनामिति–करालं दन्तुरं उन्नत् दंष्ट्राम् तद्युक्तं वदनं यस्यास्ताम्—

कराल वदनाम् इति कराले दन्तुरे तुङ्गे भीषणे चाभिधेयवत्। इति मेदिनी। अथवा-अभक्तानां भयानकं वदनं यस्यास्ताम्। घोराम्—"हन्वधे+"हन्तेरच् घुर् च।"

—उणा० ५।६४

इति अच् धातोर्घुरादेशः। सा घोरा=हन्ति विनाशयति रौद्ररूपेणेति।

१. करालेत्यादि विभूषितामित्यन्तश्लोकार्धद्वयस्थले ग घ पुस्तकयोः:— "दंष्ट्रा कराल वदनां ललज्जिह्वां भयानकाम् "इति श्लोकार्धमात्रं दृश्यते।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अतएव भयानकरूपा। "दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्" इत्यमरः ताम् घोराम् । परार्थेतु-"घोरां भयानकां दुर्लक्षणाम्-"सायणः", अत्र लक्षणम्-लक्ष्यते ज्ञायतेऽनेनेति-लक्षणम्-दुर्दुःखेन लक्ष्यते दृश्यते प्राप्यते सा दुर्लक्षणा दुर्गा" इति यावत् । ताम्= दुर्लक्षणाम्=घोराम् इत्यर्थः ।

मुक्तकेशीम्—मुक्ताः विगलिताः केशाः चिकुराः यस्यास्साम् ।

"चिकुरो कुन्तलो बालः कचः केशः शिरोरूहाः ।"

—इत्यमरः

एतेन सौभाग्यं, सौन्दर्यातिशयितं तपः स्वरूपञ्च व्यञ्जते ।

तथाच—"के जले शेते वा" केशः । कं शिरोऽम्बुनो"-इत्यमरः । तट्टीकायां धृतवचनम्—"शीर्ष जलेषु कम्" इति मेदिनी । किं नाम तज्जलम् ? "वरुणः" इति । यथा

"अप्सु वै वरुणः"

—तैत्तरीय ब्राह्मण १।६।५।६

"एता वा अपां वरुणगृहीता याः स्यन्दमानानां न स्यन्दते ।"

— शतपथ ब्राह्मण ४।४।५।१०

"मज्जजातोपधातुः विशेषः केशः"

—कल्पद्रुमे

"अस्थ्यन्तर्गतो रसः-मज्जाः इत्यर्थः"

—सायणः

आयुर्वेऽदेपि मज्ज्ञः केशोत्पत्तिर्मन्यते । यथा तज्जलं क्षीयते पाण्डुरत्वं पलितत्त्वञ्च वर्द्धते । यथा—

तद्वदापो गणापाये केशाः स्युः पाण्डुरा क्रमात्"

—वराहोपनिषद् ५।४

सुश्रुतेनापि उष्मणा जलक्षयमेव पलितनिदानम् कथितम्—

"क्रोध शोक श्रमकृता शरीरोष्मा शिरोगतः ।
पित्तं च केशान् पचति पलितं तेन जायते ।।"

—सुश्रुतनिदान १३।३७

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एतेकायसम्पत्—यौवनत्वञ्च व्यञ्ज्यते ।

पराअर्थे—तु "ब्रह्म विष्णुरुद्र संज्ञाः शक्तयः केशसंज्ञिता।" इति भागवते ।

अतएव—"काशते प्रकाशते लोके ।" इति केशाः । "काश्+अच्, पृषोदरादित्वात् ऐत्वे साधुः-हलायुधे ।

"सूर्य-अग्नि प्रभृतिरश्मिस्वरूपां-परब्रह्मशक्तिः, इत्यर्थः ।

चतुर्भुजाम् चत्वारो भुजा यस्यास्ताम् । अर्थात् वराभय-मुद्राआयुधयुक्ता चतुर्भुजा, ताम् चतुभुजाम् ।

कालिकाम्-तत्र काली-"कल् उपदेशे ।" घञ् १३।३।१६

इति भट्टोजी-अमर कोष टीकायाम्—इति कालः

तस्यशक्तेः स्वरूपम्-काली । मातृरूपेण मोक्षोपदेश प्रदात्री ।

"सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।"

—सप्तशती १।४४

इयं नारायणी काली तारा शून्य निवासिनी
सुन्दरी रक्त काली च महिष मर्दिनी तथा ।

—बृहन्नीलतंत्र ८।१३०

वस्तुतस्तु सा "निराकारा" एव । तथापि—

"मनसा कल्पिता मूर्तिस्तेजोरूपाऽपरा च सा ।"

—बृहन्नीलतंत्र ८।१३१

अतएवोक्तम्—

"निराकारा च साकारा सैव नानाभिधानभृत् ।"

—प्राधानिक रहस्य ३०

अहमेव स्वयमिदं वदामि जुष्टं देवानामुत मानुषाणाम् ।
यं कामये तन्तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।।

—ऋग्वेद १०।१२५।५

अत्र-वदामि=लोकहितार्थं उपदिशामि इति सायणः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सा एव तंत्रे कुण्डलीति कथ्यते—

"परापरेति विख्याता कुण्डलोजीवसंज्ञका।"

—वृहन्नीलतंत्र ८।१२७

सा एव उपनिषदि-आयुर्विज्ञाने च—

"प्रकृतिश्चाष्टधातुकी"

—अग्निवेशतंत्रशारीर १।२४

"अष्टप्रकृति रूपा सा कुण्डली मुनिसत्तमः"

—दर्शनोपनिषद् ४।११

"अष्टप्रकृति रूपा सा"

—त्रिशिखी ब्राह्मणोपनिषद् मंत्र भाग ६३

सा एव शक्तिः। इति

"शक्तिः कुण्डलिनी नाम"

— योग कुण्डल्युपनिषद् १।८२

सा एव गायत्री—

"कुण्डलिन्यां समुद्भूता गायत्री प्राणधारिणी।
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित्॥

—योग चूड़ामणि ३५

सा एव परा-अपरा च। अतएवोक्तम्-तं ब्रह्माणं, तमृषिं तम्सुमेधाम् इति।

सा एव अपरा—साकारा, परा-निराकारा विख्याता। तथा च नानाभिधानभृता अपि सा एव। यथा—

परमात्मैव रामोऽयं महाविष्णुर्महाशिवः।
निरञ्जनः स्वरूपोऽयं कृष्णरूपा च तारिणी।
आत्मप्रकाशिनी नित्यानित्यानन्दस्वरूपिणी॥"

—वृहन्नीलतंत्र ८।१३१

अतएवोक्तम्—

"ऋषिभिर्बहुधा गीतम्।"

अथ च—

कलनात्सर्वभूतानां महाकालः प्रकीर्तितः।
महाकालस्य कलनात् त्वमाद्या कालिका परा॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कालसंग्रसनात्काली सर्वेषामादि रूपिणी ।
कालत्वात् ग्रादिभूतत्वात् ग्राद्या कालीति गीयते ।।
पुनः स्वरूपमासाद्य तमोरूपं निराकृतिः ।
वाचातीतं मनोऽगम्यं त्वेकैवावशिष्यते ।।
साकारापि निराकारा मायया बहुरूपिणी ।
त्वं सर्वादिः ग्रनादिः त्वं कर्त्री हर्त्री च पालिका"

—महानिर्वाणतंत्र ४।३१-३४

ग्रहं रूद्राय धनु ग्रा तनोमि ब्रह्मद्विषे शर वे हन्तवा उ ।
ग्रहं जनाय समदं कृणोम्यहं द्यावा पृथिवी ग्राविवेश ।।

—ऋग्वेद १०।१२५।६

ग्रहं रुद्राय देवाय धनु ग्रा-ततज्यं करोमि । ब्राह्मणानां द्वेष्टारम् हन्तुम् जनाय कलहं-संग्रामं करोमि । ग्रहम् द्यावापृथिवी ग्रा विवेश ।"

—वेङ्कटः ।

"पुरा त्रिपुर विजयसमये रूद्राय धनुः ग्रहम् ग्रा तनोमि । ब्रह्मद्विषे द्वेष्ट्रे शर वे–त्रिपुरवासिनम् ग्रसुरगणं हन्तुं समदं संग्रामं करोमि । तथा द्यावापृथिव्यौ ग्रहम् ग्रा विवेश ग्रन्तर्यामित्वेन प्रविष्टवती ।"

—सायणः

ग्रत्र–त्रिपुरम्—"तस्मादु हैतत्पुरां परमम् रूपं यत्त्रिपुरम्"—

—शतपथब्राह्मण ६।३।३।२५

तान्त्रिक योगे—"ब्रह्म विष्णु-रुद्र ग्रन्थिः" इति नाम्ना ज्ञायते । तत्र स्थिता कामक्रोधादयो त्रिपुरवासिनोऽसुराः । तानेव हन्तुं सा भगवती संग्रामं जयति ।"

—इति मम

"ज्ञानाग्निदग्धकर्माणं भस्मसात्कुरुतेऽर्जुन !"

—गीता

कालिकां दक्षिणामिति-कालः-शिवः, तस्य शक्ति काली ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इत्थं बहुभिर्निवचितम् तन्न। महानिर्वाणतंत्रस्य निर्वचनम् समीचीनम्। यथा—

कलनात्सर्वभूतानां महाकालः प्रकीर्तितः।
महाकालस्य कलनात् त्वं आद्या कालिका परा॥
काल संग्रसनात्काली सर्वेषामादि रूपिणी।
कालत्वात् आदिभूतत्वात् आद्या कालीति गीयते॥
पुनः स्वरूपमासाद्य तमोरूपंनिराकृतिः।
वाचातीतं मनोगम्यं त्वमेकैवावशिष्यते॥
साकारापि निराकारा मायया बहुरूपिणी।
त्वं सर्वादिः अनादित्वं कर्त्री हर्त्री च पालिका॥

—महानिर्वाण तंत्र ४।३१–३४

यद्वा-कालः—पर ब्रह्म-परमात्मा। तस्य कर्त्तृत्वशक्ति काली यथा "सर्व जगत्कारणभूतः परमात्मा"

"सर्व जगत्कारणत्वेऽनुभूयमानः कालः परमात्मा"

"नित्य ज्ञानरूपः कालः परमात्मा"

"कालः—कलयिता सर्वेन्द्रिय व्यापारकर्त्ता शरीराभिमानी देवः"

"कालः—इमाः परिदृश्यमाना सर्व प्राण्याधारभूताः"

"काले परमात्मनि मनः जगत्सिसृक्षुनिमित्तभूतं
मनो वर्तते।"-"तस्मिन्नेव काले-प्राणः
सूत्रात्मा—सर्व जगदन्तर्यामी वर्तते इति
आधार व्यपदेशः। यद्वा मनः-जात्येकवचनम्
सर्वेषां प्राणिनां मनांसि।"

"काले प्राणः–"प्राणः-पञ्चवृत्तिकः, प्राणाः अपि परमात्मन्येव वर्तन्ते।"

—अथर्व १९।५३ सूक्ते, सायणाचार्यः

कालो ह ब्रह्म भूत्वा विभर्ति परमेष्ठिनम्

—अथर्व १९।५३–९

अत्र—"कालो ह = काल एव, ब्रह्म = देशकालावच्छिन्नं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सच्चित्सुखयितृरसम् अबाध्यं परमार्थतत्त्वं भूत्वा परमेष्ठिनम् परमे स्थाने सत्यलोके तिष्ठन्तं चतुर्मुख ब्रह्माणं बिभर्ति ।"

—सायणाचार्यः

दक्षिणाम्-दक्षिणः—"उदारो दातृ-महतोर्दक्षिणे" इति मेदिनी यतः सः उदारतायाः साक्षान्मूर्तिः एव अतः-दक्षिणा-मूर्तिः" इति कथ्यते । "स्वदृष्टिपथं प्रविष्टानां मोक्षार्थिनां केवल मौन व्याख्यानतो निष्पन्न निष्प्रतियोगिक-ब्रह्ममात्रज्ञान-समकाल-प्रादूर्भूत-स्वमात्रावस्थानलक्षणविकलेबर दक्षिणा देयेति यः, तद्वितरणाभिमुखो भवति सोऽयं दक्षिणाभिमुखः परमात्मा"

—ब्रह्मयोगी

"शेमुषी दक्षिणा प्रोक्ता"

—दक्षिणामूर्त्युपनिषद् ३१

अत्र—

"शेमुषी–तत्त्वज्ञानस्वरूपिणी ब्रह्ममात्र प्रकाशनदक्षा इति दक्षिणा"

—ब्रह्मयोगी

अथच—

निर्गुणः पुरुषः काल्या सृज्यते लुप्यते यत. ।
अतः सा दक्षिणानाम्ना त्रिषु लोकेषु गीयते ।। इति

यद्वा—

"पुरुषो दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते ।
वामया दक्षिण जित्वा महामोक्ष प्रदायिनी ।।

—कश्चित्

दिव्याम्—दिविभवाम् दिव्याम्" भगवत्या दिव्यरूपमेव परंरूपम् तत्तु पुण्यवतां दिव्य-चक्षुषा एव दृश्यते । यतस्तत्स्वरूपम् अलौकिकत्वात् । अलौकिकमिन्द्रियविषयमेव नास्ति । यथा—

कृत्वा देव्या पदाम्भोजदर्शनं शिवचक्षुषा ।"

—गुहचिन्तामणी ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तथा—

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामिते चक्षुः पश्य मे योगमैश्वरम् ।।

—गीता ११।८ इति

मुण्डमाला विशेषण पक्षेतु—दिव्या-वर्णमाला, अक्षमाला वा । तत्तु प्रणवांशादुत्पन्ना इति ज्ञेयम् । यथा—

"अकाराद् ब्रह्मणोत्पन्नास्तप्त चामीकर प्रभाः ।"

—शारदातिलक २।१६

सरस्वति व्रतेषु ते दिव्येषु देविधामसु ।
जुषस्व हव्यमाहुत प्रजां देवि ररास्व नः ।।"

—अथर्ववेद ७।७०।१

अत्र हे सरस्वति ! वर्णपदादिरूपेण प्रसरणवति"-सायणः प्रजाः—"प्रजा वै विश्व ज्योतिः ।"

—शतपथब्राह्मण ६।५।३।५

मुण्ड मालाविभूषिताम्—मुण्डम्-"मस्तके" इति वाचस्पत्ये ।

"उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।" इत्यमरः । परन्तु-अत्र तु-मुण्डेन-ग्रीवायाः शीर्षपर्यन्तं भागो ग्राह्य तैरेव माला ग्रथितत्त्वात् । माला="माल्यं माला स्रजौ मूर्ध्नि इत्यमरः, मुण्डानां माला-मुण्डमाला, मुण्डस्रगित्यर्थः । असुरमुण्ड-निचयैः रचितमालया विभूषितां शोभायुक्तामित्यर्थः । यद्यप्यत्र मुण्डानां संख्यनिर्णयो नास्ति, तथापि-अन्यत्र दर्शनात् पञ्चाशत् संख्यानिर्णयो जायते । यथा—

"पञ्चशन्मुण्डघटितमालाशोणितलोलिताम् ।" विरुपाक्ष-ध्याने ।

"पंचाशद्भिर्महामाला श भितां परमेश्वरीम् ।" तंत्रचूडामणिः । केन ग्रथिता एषा माला ? इत्याहः-अन्योन्यकेशग्रथितैः ।" तंत्रचूडामणिः । केषां मुण्डैर्ग्रथिता-माला ? "असुराणां मुण्ड-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

निचयैः" इति शेषः। के तेऽसुरा ? "असून् प्राणान् लान्ति आददते अपहरन्तीत्यसुराः।"

—आतोपनुपसर्गे कः—पा. ।३।२।३ इति कप्रत्ययः

यद्वा असयन्ति शरीरं क्षिपन्ति पातयन्तीति असुराः, व्याधयो राक्षसाः वा" इति सायणः। व्यष्टिपक्षे व्याधयः। समष्टिपक्षे राक्षसाः, अत्युग्रसंक्रामक रोगाः इत्यर्थः।

ते, असुरा नाना रूपाणि विधाय शरीरं हिंसन्ति। यथा—

वातजाः पित्तजाः भूताः श्लेष्मजाः सन्निपातजाः।
भोक्तुकामा रतिकामा हन्तु कामास्तथापरे ॥
वातस्थानं समासाद्य वातजाः प्रभवन्ति हि।
क्षोभयन्ति स्वक स्थानं पित्तजाः पैत्तिकं तथा ॥
श्लेष्मजाश्च स्वकं स्थानं सर्वस्थाः सन्निपातजाः।
क्षोभयन्ति विनाशार्थम् ॥"

—नेत्रतंत्र १६।१७४-७६

अत्र भूताः—रोगोत्पादक कीटाणवः। ते पञ्चाशत्प्रकाराः, न तु पञ्चाशत्संख्यकाः। एवं क्रमेणेति यावत्—पञ्चकर्मेन्द्रियैः पञ्चज्ञानेन्द्रियैश्च पञ्चमहाभूताः प्रतिक्षणं स्वस्वविषयीभूत-माहारस्वरूपम् गृह्यन्ते। इत्थं ते पञ्चाशत् प्रकारेण उपभुज्य-मानाः वातपित्तश्लेष्म-दोष स्वरूपे परिणताः—

असून्=प्राणान् अपहन्ति। प्राणशब्देन-जीवनीशक्तिः गृहीता भवति।

तेषामसुराणां मारणार्थं कालीमंत्रं प्रयुज्यते। यथा—

"मंत्रौषधिक्रियायोगैः रक्षा वै शिव चोदिता।
कर्त्तव्या शिवदा नित्या सा शिवाशिवहारिणी ॥"

—नेत्रतंत्र १६।१७८

दिव्याचारे—

"ईदृश्या च स्रजा यस्तु कुरुते जपमुत्तमम्।
अपमृत्यु कलिभ्यां च मुच्यते नात्र संशयः ॥"

—बृहन्नीलतंत्र ४।५२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्स्रक्—

"परानन्दमयं ब्रह्म शब्दब्रह्मविभूषितम् ।
आत्मनो देहमध्ये तु सर्वमंत्रात्मकं प्रिये !"

—निरूत्तर तंत्र ।

"सौषुम्णाध्वन्युच्चरिता प्रभुत्व प्राप्नुवन्ति हि ।"

—वृहन्नीलतंत्र ४।५१

"इडापिङ्गलयोर्मध्ये वर्णाश्च ज्योतिरूपिणः ।"

—वृहन्नीलतंत्र ८।१२२

"मम कण्ठेस्थितं वीजं पञ्चाशद्वर्णमद्भुतम् ।
अकारादि क्षकारान्तापञ्चाशन् मातृकाक्षराः ॥"

—कामधेनु तंत्रे

"अव्यया अपरिच्छिन्ना त्रिपुराकण्ठसंस्थिता ।"

—राधातंत्रे

एवं "मुण्डमाला विभूषिताम्" व्याख्याता भवति ।

**सद्यश्छिन्नशिरः खङ्ग-वामाधोर्द्ध्वकराम्बुजाम् ।
अभयं वरदञ्चैव दक्षिणोर्द्ध्वाधपाणिकाम्[1] ॥२८॥**

सद्येति—"सद्यश्छिन्न शिरः खङ्गः वामाधोर्ध्व कराम्बुजाम् सद्यः सपदि ।

"सद्य सपदि तत्क्षणे" इत्यमरः । छिन्नं यश्छिरः तश्च खङ्गश्च तौ वामयोर्ध्वकराम्बुजयोर्यस्यास्ताम् । शिरस्तु वामाधः करे, खङ्गस्तु वामोर्ध्व करे इति । यथाक्रममित्यर्थः ।

अभयं वरदञ्चैव दक्षिणोर्ध्वाधः पाणिकाम् । अत्र प्राप्य" इति पदम् अध्याहार्यम् । तथा च-अभयम् अभयमुद्राम्, वरदम्=वरदमुद्राञ्च प्राप्य दक्षिणोर्ध्वाधःपाणिकौ यस्यस्ताम् । अत्र "एव" शब्दः एवमर्थवाचकः । अव्ययानाम् अनेकार्थवाचकत्वात् ।

वामाधोर्ध्वः—अधः पाणिकाम् । उभयत्र—"अधः" इत्य-

[1] दक्षिणाधोर्ध्वपाणिकाम् ।ग।

Digitization by Hindu-Heritage Foundation of America. HHFA(USA)

दन्तशब्दः, "सर्वे सान्ता पक्षे अदन्ता" इति न्यायात् । अथवा— "इति व्याप्तौ" इति भ्वादीगणीये वधातो राङ् पूर्वात् कर्त्तर्यचि पृषोदरादित्वात् न लोपे "एव" इति पदं सिद्धम् ।

तथाहि—अभयं वरदञ्चैवौ प्राप्तौ दक्षिणोर्ध्वाधः पाणिकौ यस्यास्ताम् । अत्रापि दक्षिणोर्ध्वपाणो-अभयमुद्रा, दक्षिणाधः पाणौ वरदमुद्रा, इति क्रमः । एवं वामाधः पाणौ सद्यश्छिन्नं नृमुण्डम्, वामोर्ध्वपाणौ खड्गः दक्षिणोर्ध्वपाणौ अभय मुद्रा, दक्षिणाध पाणौ वरद मुद्रा, इति । अभयवरदमुद्रयोर्लक्षणम्—

"ऊर्ध्वीकृतो वामहस्त प्रसृतोऽभय मुद्रिका ।
अधः स्थितो दक्षहस्तः प्रसृतो वर मुद्रिका ।।

—मुद्रानिघण्टु

अत्र प्रसृतत्वं सङ्कोचराहित्यम् । अभय-वरद मुद्रयोः सामान्य लक्षणमुक्तं भगवति कालिका विषये, वैशिष्ठ्यं वर्तते । अभय वरदञ्चैव दक्षहस्तस्य एव । न तु वामदक्षहस्तयोः । अर्थात् शिलष्टाङ्गुरसङ्कुचितो दक्षिणोर्ध्व पाणौअभय मुद्रा । शिलष्टाङ्गलिसङ्कुचितो दक्षिणाधः पाणौ वरदमुद्रा । साधकस्य मद्राप्रदर्शनकाले वामहस्ते, देव्यास्तु दक्ष हस्तेऽभय मुद्रेति विशेषः ।

महामेघप्रभां श्यामां तथा चैव दिगम्बरीम्[1] ।
कण्ठावसक्त मुण्डाली गलद्रुधिर चर्चिताम् ।।२६।।

महामेघप्रभामिति—महामेघस्य प्रभेव प्रभा यस्यास्ताम् । महामेघस्वरूपाम्—

आपो विद्युदभ्रं वर्षं सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरूद्भिः प्रच्युता मेघाः प्रावन्तु पृथिवीमनुः ।।"

—अथर्ववेद ४।१५।६

१–दिगम्बराम्-क । नीलमेघप्रभां तन्वीं घोर रूपां दिगम्बराम्-ग । नीलमेघाप्रभां तन्वीं घोररूपाम् दिगम्बरीम्-घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथ च – अत्र महापद प्रयोगात् महाकालस्तुतौ-"स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे" इत्यत्र-ध्वांतपद प्रयोगात्-तथा विरुपाक्षोक्तध्याने–"नीलाञ्जनचयप्रख्याम्" इत्यत्र, नीलादि पद दर्शनाच्च अतीव कृष्णवर्णा इति सूचितम् । देव्याः कृष्णवर्णत्वे हेतुमाह—

"श्वेत पीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्वभूतानि शैलजे ।।
अतस्तस्याः महाशक्तेः निर्गुणायाः निराकृतेः ।
हितायाः प्राप्त योगानां वर्णः कृष्णो निरूपितः ।।"

—महानिर्वाण तंत्रे

श्यामाम् – इत्यनेन आक्रन्तत्वं ज्ञापितं न तु श्याम वर्णत्वम् । यतः श्यामवर्णन्तु-"महामेघप्रभाम्" इत्यनेन ख्यापितम् ।" "अम्बिकायाम्" इति विश्वकोशे । तथाच-हिमालय सुतायां काल्याञ्च –

"ततः सा कालिका देवी योगविद्रा जगन्मयी ।
पूर्वत्यक्त सती रूपा जन्मार्थं मेनकां ययौ ।।
समवस्थानुरूपेण मेनकाजठरे शिवा ।
सम्भूय च समुत्पन्ना सा लक्ष्मीरिव सागरम् ।।
वसन्तसमये देवी नवम्यां मृगयोगतः ।
अर्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात् ।।
तां तु दृष्ट्वा यथा जातां नीलोत्पलदलानुगाम् ।
श्यामा सा मेनका देवी मुदमायाति हर्षिता ।।"

— कालिका पुराण अध्याय ३०

दिगम्बरीम् – दिक् अम्बरं परिधानं वसनं यस्यास्ताम् । "अम्बरं व्योम्नि वाससि"–इत्यमरः । दिगम्बरीम् नग्नामित्यर्थः कण्ठावसक्तमुण्डाली गलत्रुधिर चर्चिताम्-कण्ठेऽवसक्ता-लग्ना या मुण्डाली = मुण्डानाम् अली, मुण्डमाला इति यावत् । तस्या गलन्ति-स्रवन्ति रुधिराणि तैश्चर्चिताम् अनुलिप्ताम् इति यावत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्णावतंसतानीत-शव-युग्म-भयानकाम् ।
घोर दंष्ट्रां करालास्यां पीनोन्नत पयोधराम्[1] ॥३०॥

कर्णेति—कर्णावतंसतानीत शव युग्म भयानकाम्=कर्णयोः अवेतंसताम्-अलङ्कारताम् नीतम्-प्रापितं यत् शव युग्म मृतनर-शिशुदेहयुगलम्, तेन भयानकाम् "शर युग्मेति" पाठे-शरयुग्मं वाण युग्ममित्यर्थः । "घोरदाणावतंसा" इति "प्रेतकर्णावतंसा" इति च ।

"शकुन्तपक्ष संयुक्त वाण कर्ण विभूषिताम् ।" इति
"विगतासुकिशोराभ्यां कृतकर्णावतंसिनीम् ।" इति

"दर्शनादुभयमेव पाठः" इति तंत्रसारकारः । शवयुग्मेति पाठस्य प्रचार बाहुल्यं दृश्यते । वस्तुतस्तु ध्यान मंत्र पाठे एक-तर एव पाठ्यः । ध्याने तु कर्णाधः प्रेतयुग्मं कर्णोर्ध्वे वाणयुग्मं ध्येयम् । इति वृद्धोपदेशः । घोर दंष्ट्राम्-घोरा भीमा दंष्ट्रा यस्यास्ताम् । करालास्याम् = करालः ललज्जिह्वा आस्ये मुखे यस्यास्ताम् ।" कराल तीक्ष्ण खड्गे च ललज्जिह्वा भयानके" इति । अथवा 'करालो दन्तुरे तुङ्गे" इत्यमरः । उन्नत दंष्ट्रत्वात् करालवदना, इति । तन्न पूर्वं व्याख्यत्वात् अर्थात्=करालवदनाम्-उन्नत दंष्ट्रत्वात् भयानकवदनात् । तथाच-करालास्याम्-लल-ज्जिह्वत्वात् भयानकास्याम् । इति यावत् पीनोन्नतपयोधराम् पीनौ स्थूलौ उन्नतौ च पयोधरौ स्तनौ यस्याः तादृशीम् ॥३०॥

शवानां कर संङ्घातैः कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वय गलद्रक्तधारा विस्फुरिताननाम् ॥३१॥

शवामिति—शवानां पूर्वोक्त मृता सुराणां कर सङ्घातैः-कृत काञ्चीम् छिन्नकरसमूहैः कृता काञ्ची मेखला यया तादृशीम् । यथा-"मृतहस्तसहस्रैस्तु बद्धकाञ्चीं दिगम्बरीम्"

१—श्लोकार्धमेतद् ग-घ पुस्तकयोर्नास्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति । हसन्मुखीम् हास्य युक्तं मुखं यस्याः तादृशीम् । सृक्कद्वय गलद्रक्त धारा विस्फुरिताननाम्-सृक्क-सृक्करणी-"प्रान्तावोष्ठस्य सृक्करणी" इत्यमरः। एवं सृक्क-सृक्करणी सृक्किरणीति शब्दाः-ग्रोष्ठाधरयोः प्रान्तभागद्वय वाचकाः । तत्र सृक्कशब्दोऽदन्तो नान्तश्च । सृक्कद्वयात् । ओष्ठाधर प्रान्त भाग द्वयात् गलन्तौ ये रक्तधारे पीतावशिष्टासुर शोणितानां प्रवाहौ ताभ्यां विस्फुरितं प्रकाशितं विजृम्भितमित्यर्थः । आननं यस्याः तादृशीम् ।।३१।।

घोररावां महारौद्रीं श्मसानालयवासिनीम् ।
बालार्कमण्डलाकारलोचनत्रितयान्विताम्[1] ।।३२।।

घोररावामिति—घोरः-अशिव अतएव असुराणामभक्तानाञ्च भयप्रदः, एव भयानकध्वनिः, यस्याः तादृशीम् । महारौद्रीम्=अतिशयोग्राम "रौद्रं तुऽग्रम्" इत्यमरः । श्मसानालय वासिनीम्=श्मसानम् "शवाशेरतेऽत्र, श्मसानम्, यद्वा श्मनां-शवानाम्, शानम्=शयनम् यत्र श्मसानम् ।

शव दहन स्थानमितिति । यथा—

श्मशब्देन शवः प्रोक्त शानं शयन मुच्यते ।
निर्वंवन्ति श्मशानार्थं मुने शब्दार्थं कोविदाः ।।
महान्त्यपि भूतानि प्रलये समुपस्थिते ।
शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो भवेत् ।।

—स्कन्दपुराणे-काशीकाण्डे

तत्र वासिनीम् । दिव्याचारे—श्मसानस्थानं सहस्रारे कथितम् । अतएवोक्तं "श्मसानवह्निमध्यस्थाम् । प्रसंगोपात्त शवनिर्वचनमपि करोति । तत्र-शवम्=मृतशरीरम् दिव्याचारेतु-"शव" विकारे गतौ च । [भ्वा० प० सेट्]

शवति विकरतीति चित्तम् । शव=कामः । चिरो मनसि । यः विकारं जनयति तदेषः कामः=शिवः । —दुर्गादासः ।

१—बालाकमण्डलाकारां त्रिनेत्रामुन्नतस्तनीम् । ग-घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चिता—"चीयते श्मसानाग्निरस्यामिति चिता।" दिव्याचारे तु—यत् वैदिकवाङ्मये दहरं आकाशं वा कथ्यते तदेव तंत्रे श्मशानमिति तत्रैव य पञ्चाग्निः प्रज्ज्वलते सैव चिता।

बालार्क-मण्डलाकार लोचन त्रितयान्विताम्—बालश्चासौऽर्कश्चेति बालार्कः—उद्यद्भानुरित्यर्थः। तस्य मण्डलमिव आकारो यस्य तादृशेन लोचन त्रितयेन, उद्यद्भानुमण्डल सदृशरक्तवर्णैस्त्रिभिर्नेत्रै इत्यर्थः। "तै अन्विताम्=युक्ताम्। यथा च—

बालार्क मण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशाङ्कुशवरां चापं सावित्री दधती भजे॥

—गायत्री पुरश्चरण पद्धति

दन्तुरां दक्षिणव्यापि-मुक्तालम्बि-कचोच्चयाम्।
शव-रूप-महादेव-हृदयोपरि-संस्थिताम् ॥३३॥

दन्तुरामिति—दन्तुराम्-उन्नतदन्ताम्, उपर्युपरिदन्त विशिष्टाम्, दक्षिणव्यापिमुक्तालम्बि कचोच्चयाम्=दक्षिणाङ्ग व्याप्नोतीति दक्षिणव्यापी शिवहृदि पदार्पण भङ्ग्या केशसमूहस्य दक्षिणाङ्ग व्यापकत्वम् प्रतीयते। मुक्तः=वेणीबन्धनरहितः अतएव—आलम्बी—आ सम्यक् लम्बते इत्यालम्बी लम्बमान इत्यर्थः, एवं भूतः कचोच्चयः केश समूहो यस्यास्ताम्। शवरूप महादेव हृदयोपरि संस्थिताम्=शवस्य रूपमिव रूपं यस्य स चासौ महादेवश्चेति शवरूप महादेवः, तस्य हृदयोपरि संस्थिताम्।

वस्तुतस्तु शिवस्य शवत्वं न संगच्छते, अपितु—योगनिद्राधीनत्वं सूचितम् यथा—"योगनिद्राधरं शम्भुम्" योगिनीतंत्रे। तथाच—रूपपदस्य व्यावर्तकत्वापत्तेः भगवत्या काल्याः शिवहृदये दक्षिणपादं वामपादं वा संस्थितम्?

कुब्जिकातंत्रे योगिनीतंत्रे च—भिन्नरूपत्वात् चिन्तनीयम् यथा—

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

"शवस्य हृदये चैव दक्षपाद निषेविताम् ।"

—कुब्जिकातंत्रे ।

"वामपादं शव हृदि दक्षिणां लोक लाञ्छितम् ।"

—योगिनीतंत्रे ।

अस्य समाधानं गुप्तसाधनतंत्रेण भवति । यथा—

"आलीढं कीदृशंनाथ ! प्रत्यालीढन्तु कीदृशम् ।"

—गु० सा० तं० ६ । १४

"आलीढ वाम पादन्तु प्रत्यालीढन्तु दक्षिणम् ।
संहाररूपिणी काली जगन्मोहनकारिणी ।।
आलीढ पादा सा देवी प्रत्यालीढाक्षणे क्षणे ।
गुरूणा यस्य यत्प्रोक्त तत् तस्य ब्रह्मसञ्ज्ञितम् ।।
वह्निरूपा महामाया सत्यं सत्ये न संशयः ।
अतएव महेशानी जगन्मोहन कारिणी ।

—गु० सा० तं० ३४-३६

नमिता पूर्वजंघातु पश्चिमा प्रगुणाभवेत् ।
असमो मध्यकायः स्यात् आलीढस्य च लक्षणम् ।।"

—अग्निपुराणे

प्रत्यालीढं तद्विपर्ययम् । तत्रैव । "वह्निरूपा" इत्यनेन श्मसानालय वासस्य कारणमुक्तम् देवी कथं शव वाहना ? इत्याहुः

"या चाद्या परमा विद्या द्वितीया भैरवीपरा ।
त्रैलोक्य जननी नित्या सा कथं शववाहना ।।"

इति देवी प्रश्नोत्तरे—

सा चाद्या परमेशानि स्वय कालस्वरूपिणी ।
श्री शिवस्य हृदयाम्भोजे स्थिता संहारकारिणी ।।
अतएव महाकालो जगत्संहारकारकः ।
संहाररूपिणी काली यथा व्यक्तस्वरूपिणी ।।
तदैव सा सहसा देवी शवरूप सदाशिवः ।
तत्क्षणाच्चञ्चलापाङ्गि सा देवी शववाहना ।।
यस्मिन् त्यक्ता महाकाली शक्तिहीनः सदाशिवः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शक्त्या युक्तो यदा देवी तदैव शिवरूपकः ।।
शक्तिहीनो शवः साक्षात् पुरूषत्वं न मुञ्चति ।।
—तत्रैव ।। ३२ ।।

महाकालेन च समं विपरीत-रतातुराम्[1] ।
शिवाभिर्घोर रावाभिश्चतुर्दिक्षु समन्विताम्[2] ।।३३।।

महाकालेनेति—महाकालेन च समं विपरीत-रतातुराम्= महाकालेन स्वभैरवेण सम सह विपरीत व्यत्ययेन कृतं यद्रतं सुरतव्यापारः तस्मिन् आतुरां विक्षिप्तचिन्तामित्यर्थः । "अननुज्ञाता हि योषिद् वि सदृशमाचरन्ती निस्त्रपैव स्या दिति । वात्स्यायने । शिवशक्ति मिथुनभावं विना सृष्टिव्यापरं न प्रचलतीतिसिद्धान्तः । यथा—

"शित शोणित विन्दु युगलं विविक्तशक्तिसंकुचत्प्रसरम् ।
वा.र्थ.ृष्टिहेतुः परस्परानुप्रविष्ट विस्पष्टम् ।।"
—का० क० वि० ६.

शिव शक्त्यो अविनाभाव सम्बन्धेऽपि सृष्टि व्यापरे शक्तेः क्रियायाः अनुभूयमानेन प्राधान्यात् शक्तिरेव सर्वं करोतीति । प्रतिभासते । अत्र सृष्ट्या अर्थं मिथुन भावेऽपि शक्तिरेव प्राधान्यात्, अत्र महाकालेन सह देव्या विपरीतावस्था उत्प्रेक्षिता । वस्तुतस्तु तदानीं न रतावस्था किन्तु सदाशिव रूप दिगम्बर महाकालोपरि दिगम्बरी भावेन देव्या स्थित्वात् उत्प्रेक्षा इति ।

त्रिधा हि विपरीत रतिः—पशु-वीर-दिव्य भेदात् । पशुविपरीतवीरविपरतिश्च व्याख्यातौ ।

दिव्याचारे विपरीतरत्याः स्वरूपम्—

ऊर्ध्वशक्तिमयः सोम अधिशक्तिमयोऽनलः ।
ताभ्यां सम्पुटितं तस्याच्छशद्विश्वामिदं जगत् ।।

१ महाकालेन वै सार्द्धं मुपविष्टरतातुराम्, ख । महाकालेन सार्धं तामुपविष्टां रतातुराम्, ग । महाकालेन च समुपविष्टां स्मरातुराम्, घ ।
२ श्लोकार्धमेतत् क पुस्तकेनास्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत्र—"ऊर्ध्वाधोभेदेन परमेश्वर शक्तिर्द्विविधा । सोमस्तूर्ध्व-शक्तिमयः शिवः सर्वोर्ध्वे तन्मौलि प्रतिष्ठानात् । अधः शक्ति-मयोऽनलः= जीवः ।

तस्मात् ताभ्यां शिव शक्तिभ्यां स्वाङ्गदृष्ट्या स्वातिरेकेणा-स्तीति शश्वद्विश्वसनीयं इद विश्वं जगत् सम्पुटितं कवलित-मित्यर्थः ।

—ब्रह्मयोगी ।

स्थितिरेषा लोके " रतिः " इति कथ्यते । यथा—

"आनन्दाज्जायते विश्वं स एव रतिरुच्यते ।
स्त्रीपुंसा शृणु विप्रेन्द्र मनसां मेलनं रतिः ॥"

—आदिशास्त्रे २।२

यदातु—"मूलाधार शक्त्यावधृतो युक्तोऽयं कालाग्नि जीवः स्वोपाधिशक्त्यंशं विहाय ऊर्ध्वगो यथा भवति तथैव शिवशक्ति पदास्पदः शिव शक्त्यैक्यनिम्नगो भवतीव भवति वस्तुतस्तस्य निम्नोन्नतवैरस्यात् ।"

"आधार शक्त्याऽवधृतः कालाग्निरयमूर्ध्वगः ।
तथैव निम्नगः सोमः शिव शक्ति पदास्पदः ॥
शिवश्चोर्ध्वमयः शक्ति रूर्ध्वं शक्ति मयः शिवः ।
तदित्थं शिव शक्तिभ्यां नाव्याप्तमिह किंचन ॥"

—वृ० जा० उ० २।११-१२

विपरीतरत्याश्चित्रमेतत् उपनिषदि—

"हकारेण बहिर्याति सकारेण विशेत्पुनः ।
हंस हसेति मंत्रोऽयं सर्वैर्जीवैश्च जप्यते ॥
गुरु वाक्यात्सुषुम्नायां विपरीतो भवेज्जपः ।
सोऽहं सोऽहमिति यः स्यात् मंत्रयोग स उच्यते ॥

—यो० शि० १।१३०-१३१

इतिमंत्रयोगे । तत्क्रिया तु—

"यावत्यो नाड्यो देवि तिर्यगूर्ध्वमधः स्थिताः ।
समानेन समाकृष्टा एकीभूता भवन्ति ते ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तासु ये वायवस्तेऽपि प्राणे समरसीगताः ।
नाड्यस्तु सुषुम्नायामेकी भूता व्यवस्थिताः ।।

तान्त्रिक-वाङ्मये तु—

निजभवन-निवासादुच्चलन्ती विलासैः,
पथि पथि कमलानां चारूहासं विधाय ।
तरूणत तपन कान्तिः कुण्डली देवता सा,
शिव-सदन सुधाभिर्दीप्यिते आत्मतेजः ।।

तस्योर्ध्वे विस्फुरन्ति स्फुट रूचिर तडित्पुञ्जभा भास्वराङ्गी-
मुद्गच्छतीं सुषम्नानुसरणि शिखामाललाटेन्दु-बिम्बं,
चिन्मात्रां सूक्ष्मरूपां जगदुदयकरीं भावना-मात्रगम्यां,
मूलं या सर्वधाम्नां स्फुरति निरूपमा हूं कृतोदञ्चितोरः ।।

नीता सा शनकैरधो मुख सहस्राराऽरूणाब्जोदरे,
च्योतत्पूर्ण-शशाङ्क विम्ब मधुतः पीयूषधारा-स्रुतिम् ।
रक्तां मन्त्रमयीं निपीय च सुधानिष्यन्दरूपा विशे-
द्भूयोऽप्यात्म-निकेतनं पुनरपि प्रोत्थाय पीत्वा विशेत् ।।

अत्र-आपीन-स्तन-जघन-दृग्यौवनवती नायिकायाः अभिसार-चित्रं अथ च तस्याः विपरीतः इतिः स्वरूपं प्रत्यक्षं जायते अतएवोक्तम्—

मूले भाले हृदि च विलसद्वर्णरूपा सवित्री,
पीनोत्तुङ्ग-स्तन भर-नमन्मध्य देशा महेशी ।
चक्रे चक्रे गलित सुधया सिक्तगात्री प्रकामं
दद्यादाद्या श्रियमविकला वाङ्मयी देवता नः ।।

शिवाभिरित्यादि—शिवाभिः—शृगालैः "स्त्रियां शिवा-भूरिमायः गोमायुः मृगधूर्तकाः । शृगालः वञ्चक-क्रोष्टु-फेरू-फेरव जम्बुकाः इत्यमरः ।" पुण्यक्तवपि शिवा शब्दो नित्यं स्त्रीलिङ्ग इत्यर्थः । इत्यमरटीकायां महेश्वरः । ताभिः घोर रावाभिः घोरः-भयानक रावः शब्दो यस्यास्ताम्-शिवाभिघोर रावाभिः । चतुर्दिक्षु समन्ततः समन्विताम्-वेष्टितामित्यर्थः । अन्यत्र तु शिवा-मुक्तिः कल्याणदात्रीति यथा—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"शिवामुक्ति समाख्याताः तद्युक्ता मोक्षतपरा ।"

—श्यामाकल्प

"शिवामुक्तिः समाख्याता योगिनां मोक्षदायिनी ।
शिवाय यां जपेद्देवीं शिवालोके नतः स्मृताः ।।

—देवी पुराणे ४५ अध्याये

शिवा कल्याण रूपा च शिवदा च शिवप्रिया ।
प्रिये दातरि च शब्दः –शिवा तेन प्रकीर्तिता ।।

—ब्रह्म वै० पु० प्र० खण्ड ५४ अ०

शश्च कल्याण वचनः इरेवोत्कृष्ट वाचकः ।
समूह वाचकश्चैव "वा" कारो दातृवाचकः ।।
श्रेय संघोत्कृत दात्री, शिवा तेन प्रकीर्तिता ।
शिवराशिः मूर्तिमती शिवा तेन प्रकीर्तिता ।।

सालोक्य-सामीप्य-सारूप्य-सायुज्य-कैवल्यादि भेदेन बहुवचन-द्योतनाय शिवभिरिति अस्मिनर्थे—घोररावाभिः—एवं व्याख्यातुमर्हति—घोरयति-विनाशयति-आशाम्-इति घोरः । तादृशो र वः =शब्दः, तैः-घोररावाभिः । यथा—

"आशा नाम नृणां काचिदाश्चर्यमयीश्रृङ्खला ।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ।।"

—भास्करराय:

"न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
सर्वाशा संक्षये चेतः क्षयो मोक्ष इतीष्यते ।।"

—अ० उ० २।२३

भगवती सपर्यया सा-आशा-नश्यत्वेव । यत सा—

"इच्छा शक्ति भयं पाशमङ्कुशं ज्ञानरूपिणम् ।
क्रिया शक्ति मये बाणधनुषी दधदुज्ज्वलम् ।।"

—यो० हृ० च० सं० ५३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुख प्रसन्नवदनां स्मेरानन् सरोरूहाम्[1] ।
योगिनी-चक्र-सहितां कालिकां भावयेत्सदा[2] ।
एवं सञ्चिन्तयेत्कालीं सर्व कामार्थ सिद्धये[3] ।।३४।।

सुखेति-सुख प्रसन्न वदनाम्-सुखं सुखकरं भक्तानां आनन्द-दायकमिति प्रसन्नं=प्रफुल्लं वदनम् मुखमिति यस्यास्ताम् । स्मेराननसरोरूहाम्-स्मेरं-विकसितं आननसरोरूहम्-मुखपद्मम् यस्यास्ताम् । प्रफुल्लित पद्म तुल्य सुन्दरमुखीमित्यर्थः योगिनी चक्रसहिताम्-योगिनी चक्रमध्यस्थाम्, कालिकां सदा भावयेत् ध्यायेदित्यर्थः । एवम्-इत्थं रूपां भगवतीं कालीं सर्वकामार्थ सिद्धये-प्रेयश्रेयप्राप्तये सञ्चिन्तयेत्-सम्यक्ध्यायेत् इत्यर्थं ।

योगिनी—१. योगोऽस्ति-यास्या सा-योगयुक्ता नारी । सा कोटि-विधा । तासां मध्ये चतुषष्टिः प्रधानाः ।

—शब्दकल्पद्रुमे

२. "योगिन्यो विमर्शांशिभूतेच्छा-ज्ञान-"क्रियात्मिका सरस्वती पृथिवी-रुद्राण्यस्तिस्रः ।"

—भास्करराय:

३. षोडशादि द्वात्रिंशत् अब्दान्ता सुवासिनी-योगिनीत्युच्यते ।"

—भास्करराय:

योगिनीचक्रसहिताम्—सर्वकामार्थ सिद्धये-नैमित्तिकतया कालिकां योगिनी चक्रसहिताम्-भावयेत् पूजयेच्च । कस्मिन्नक्षत्रे-वारे-प्रभृतिषु-एषा पूजा केन विधिना कर्त्तव्या ? इति विवक्षायाम्—

"पुष्यभेन तु वारे-च सौरे च परमेश्वरि ।
गुरोर्दिने स्वनक्षत्रे चतुर्दश्यष्टमीषु च ।।

१. श्लोकार्धमेतत् ग-पुस्तकेनास्ति । २. केवलं ख-पुस्तके दृश्यते । ३. एवं सञ्चिन्त्य कालीं प्राणन्यासे समाचरेत् ।

Digitization by Hindu-Heritage-Foundation of America. HH

चक्रपूजां विशेषेण योगिनीनां समाचरेत् ।
चतुःषष्टियुताः कोट्यो योगिनीनां महौजसाम् ।
चक्रमेतत्समाश्रित्य संस्थिता वीरवन्दिते ।
अष्टष्टकं तु कर्त्तव्यं वित्ताशाठ्यविवर्जितम् ।।"

—यो० ह० पू० १६३-१६८

अत्र-पुष्यभेन-पुष्यनक्षत्रेण सह सौरे वारे गुरोरूदय व्याप्त्योर्दिने स्वनक्षत्रे च चतुर्दश्यष्टमीषु तिथिषु च चक्रपूजां चतुरस्रादि वैन्दवान्तचक्रगतानां देवतानाम् पूजां विशेषेण समाचरेत् । अष्टाष्टकम्-अष्टानामष्टकम् । शेषन्तु गुरूमुखाद् ज्ञेयम् । इति ।

अथार्च्चन विधिं वक्ष्ये देव्याः सर्वसमृद्धिदम्[1]।
येनानुष्ठित मात्रेणभवाब्धौ न निमज्जति ।।३७।।
अनेक-हेम-रत्नादि-माणिक्य वरसिद्धिदम् !
इन्द्रादि सुरवृन्दानां साधनैकफलप्रदम् ।।३८।।
विपक्षकुलसंहारकारणं पौरूषप्रदम्[2] ।
शान्तिकं[3] पौष्टिञ्चैव वशीकरणमुत्तमम्[4]।।३९।।
मारणोच्छेदजनकमाकृष्टिकरमुत्तमम् ।
समस्तशोकशमनमानन्दाब्धौ निमज्जनम्[5]।।४०।।
चतुः समुद्र पर्यन्तमेदिनी साधनोत्तमम्[6]।
स्त्रीरत्नकुलसन्दायि पुत्रपौत्र-विवर्धनम् ।।४१।।

अथेति—फलश्रुतिरियं विधिपूर्वक-सम्यगनुष्ठानेन अभिष्ठं प्राप्यते एव । सम्यगनुष्ठितेऽर्च्चिते मंत्रेऽवश्यमेव सिद्धिं विन्दते । यैः कारणैः सिद्धिर्न प्राप्यते तानाहः—

---

१ अनुष्ठानविधिवक्ष्ये देव्याः सर्वसमृद्धिदम्-ख ग । 'मानसैश्चर्चयित्वा तु साक्षात् सिद्धीश्वरोभवेत् । यंत्रपीठार्चनं वक्ष्ये देव्या सर्वसमृद्धिदम्-घ । २ 'शरणप्रदम्'-ख । ३ शान्तिदम्-घ । ४ मरणोच्चाटजनकं तथाकर्षणमुत्तमम्-ग । "मारणोच्छेदन करम्"-घ । ५ मानन्दाब्धिविधूदयम्-ख मानन्दादिविभूतिदम्-ग । मानन्दाब्धिविभूतिदम्-च ६ न्तां धरित्रीसाधये तथा-क ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अज्ञानात् निरारम्भात् तथा चित्तविपर्ययात् ।
अश्रद्धानात् शास्त्रे दारिद्रचात् अप्रतिश्रयात् ।।

साधनानामलाभाच्च दैवतानाञ्च विघ्नतः ।
पापोदयात् पूर्वकृतात् पार्थिवेन्द्र भयादपि ।।

दैन्यात् शरीरसम्पर्कात् असहायात् असंगतात् ।
सन्तोषादपि अविश्वासात् इन्द्रियाणां प्रसंगतः ।।

रसं रसायनं मंत्रं सिद्धं द्रव्यमथोत्तरम् ।
न सिद्धयेत् कारणैरेभिः यदन्यच्च क्रियान्तरम् ।।

—रस० उ० १६ । २८५-२८८

सिद्ध्युपायमाहः—

" न भावेन विना देवि मंत्र विद्या फलप्रदाम् ।
तेन भावेन देवेशि पूजयेत्परमेश्वरीम् ।।

—बृ० नी० तं० २१ । २४

"गुरोरनुज्ञा मात्रेण दुष्टमंत्रोऽपि सिद्धयति ।"
"यस्मिन्मंत्रे च आचारस्तस्मिन् धर्मस्तु तादृशः ।"

आदौ यंत्रं प्रवक्ष्यामि यज्ज्ञात्वाऽमरतां व्रजेत् ।
आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्वहिर्न्यसेत् ।।४२।।
ततो वै विलिखेन्मंत्री त्रिकोण त्रयमुत्तमम् ।
वृत्तं विलिख्य विधिवल्लिखेत् पद्मं सुलक्षणम् ।।४३।।
ततो वृत्तं विलिख्यैव लिखेत् भुपुरमेककम् ।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ।।४४।।

आदौ—किं नाम यंत्रम् ?

यं भूतादि सर्वेभ्यो भयेभ्योऽपि कुलेश्वरि !
त्र्यायतेसतत चैव तस्माद् यंत्रमितीरितम् ।।

—कु० तं० १७ । ६१

यंत्रे पूजा किमर्थम् क्रियते ?

यंत्रे सा पूजिता देवी सहसैव प्रसीदति ।
काम क्रोधादि दोषोत्थसर्वदुःख नियंत्रणात् ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यंत्रमाहुरेतस्मिन् देवी प्रीणाति तत्त्वतः ।
शरीरमिव जीवस्य दीपस्य स्नेहवत्प्रिये !!
सर्वेषामापि देवानां तस्माद् यंत्र प्रतिष्ठितम् ।
तस्माद् यंत्रं लिखित्वा–अर्थं ध्यात्वा सावृत्ति शिवाम् ।
ज्ञात्वा गुरूमुखात्सर्वं पूजयेत् विधिवत्प्रिये ।।

यंत्राधारम्—

"काञ्चन-रजत-ताम्रपत्र-भूर्जपत्रादिषुज्ञेयम् ।"

—तंत्रान्तरे

"लेखनं यंत्र राजस्य हेमे पात्रे विशिष्यते ।
ताम्रे वापि प्रकर्त्तव्यं यंत्र पूजार्थमेव हि ।।
न पैत्तले न वा काष्ठे न पाषाणे न मार्तिके ।
कालीयत्रं प्रकुर्वीत साधकोऽभीष्टसिद्धये ।।

—तंत्रान्तरे

लेखनीमाह—

यंत्रराजं लिखेन्मंत्री स्वर्ण-रत्न शलाकया ।
पुष्पेण विलिखेच्चापि विल्वस्य कण्टकेन वा ।।

—श्रीतत्वचिन्तामणिः

अत्र केन रत्नेनेतिविवक्षायाम्-यथोद्देशम् ।

"तन्मध्ये विलिखेद्यत्रं सुवर्णेन कुशेन वा ।"

अथवा—

"स्वर्णरौप्य शलाकया"—इति तंत्रान्तरे

लेखनद्रव्यमाहः—

"कुषीद्-कर्पूरञ्च चन्दनैश्च लिखेत्सुयंत्रम्"

—कालीनिगमे ।

"चन्दना-गुरू-कर्पूर-सिन्दूर-रजसापि वा ।
कस्तूरी कुंकुमैर्द्रव्यैः रोचना लाक्षया तथा ।।"

—तंत्रान्तरे

वृहन्नीलतंत्रे त्वयं विशेषः—

"एतत्तु विलीखेत् ताम्रे कुण्डगोलविलेपिते ।
स्वयंभूः कुसुमैर्युवते कुङ्कुमागुरूसंयुते ।।"

—वृ० नी० तं० ८।५

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत्र–कुण्डगोलोद्भवम्–स्वयंभू कुसुमञ्च लिख्यते—

"स्वामिशून्या च या नारी जारयोगाद्रजस्वला :
तद् रक्तं गोलकं ज्ञेयम् ।"
"विवाहितायाः कन्यायाः प्रथमे ऋतुसंङ्गमे ।
तत् शोणितं महेशान स्वपुष्पं परिकीर्तितम् ।।"

—सर्वोल्लास तंत्रे

लेखनविधिमाहः—

"मूलमंत्रमुच्चारयन् सम्यगालिखेद् यंत्रमुत्तमम् ।"
—सम्मोहनतत्रवाक्य शाक्तानन्द तरङ्गिण्याम् ।

आदो त्रिकोणमित्यादि—आदौ त्रिकोणमेकम्, ततस्तत्त्रिकोणं गर्भीकृत्य अपरं त्रिकोणमेकं, तत एतत्त्रिकोणद्वयं गर्भीकृत्य क्रमशस्त्रिकोण त्रयं विलिखेत् । एवं क्रमेण त्रिकोणपञ्चकं भवति । सर्वाणि त्रिकोणाणि समबाहुकानि अधेमुखानि च कुर्यात् ! वामकेश्वर तंत्रादौ श्रीयंत्रान्तर्गतत्रिकोणचक्रे बाहुत्रयस्य इच्छा-क्रिया ज्ञानेति शक्ति त्रय रूपत्वकथनात् शक्तित्रयस्य साम्यात् बाहूनामपि समपरिमाणत्वं भवितुमर्हति । अत्रापि तथैव, शक्ति त्रयसाम्यात् रेखागणित रीत्यापि वृतान्तर्गत त्रिकोण बाहूनां परिमाण साम्यं युक्तियुक्तम् । अधोमुख करणे रहस्यमिदम्—

"यत्र यत्र महाविद्या शक्ति विद्या प्रकाशिता ।
तत्र तत्र त्रिकोणञ्च अधोमुखमुदीरितम् ।
देवत्रिकोणे कर्त्तव्ये ऊर्ध्वास्य परिकीर्तितम् ।।"

—तारा रहस्ये

अधोमुख त्रिकोणस्य तु शक्तिरिति संज्ञा । अस्याङ्कने वामकेश्वस्य तंत्रस्य भास्करराय कृत सेतुबन्धाख्य टीकायामुक्तम्—"यदाशाभिमुखोमंत्री चक्रराजं समुद्धरेत् सैव पूर्वादिक् । तामारभ्य प्रादक्षिण्येनेतराः सप्त दिशः । ईशानादाग्नेय पर्यन्तामेकां तिर्यग्रेखाम् कृत्वा तदीशानाग्रात् तदाग्नेयाच्चारभ्य पश्चिमदिक्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पर्यन्ते द्वे रेखे समाकृष्य पश्चिमस्यां दिशि ते मेलयेत् तदिदं स्वाभिमुखाग्रात् त्रिकोणं भवति । अस्य शक्तिरिति संज्ञा ।"

अत्रेदमवधेयम्—तंत्रसारादिधृत कालीतंत्र वचनेषु—"वृत्तं विलिख्य"—इत्यारभ्य—"भूपुरमेककम्" इत्यन्तम्, इति स्थाने—

"ततो वृत्तं समालेख्य लिखेदष्टदलं ततः ।
वृत्तं विलिख्य विधिवत् लिखेत् भूपुरमेककम् ।।"

इति पद्मदल संख्या कथनात् अयमेव पाठः समीचीनतया प्रतिभाति । तदनन्तरं वृत्तपञ्चकं गर्भीकृत्य एकं वृत्तं तद्वहिरष्टदलं पद्मम्, तद् वहिश्चतुर्द्वार समन्वितं चतुरस्राकारं भूपुरं पृथ्वीमण्डलम् लिखेत् । समबाहुकोणकं क्षेत्रं चतुररस्रं, एतदेव भूपुरं । यथा—

"भू गृहं चतुरस्रं स्याद् अष्टवज्र विभूषितम् ।"

— इति राघवभट्ट

अत्र—"अष्ट वज्रविभूषितम्" इत्यत्र वक्त्रावपि वज्ररहित चतुरस्रस्यापि भूगृह संज्ञा इति व्यवहारः । अत्र अनुक्तावपि प्रथमत्रिकोण मध्यस्थले एक पंक्तौ निजं बीजं विन्दुं लज्जावीजञ्च क्रमेण लिखेत् । तद् यथा—

"उत्तरास्यो लिखेद् यंत्रं गुरूं नत्वाशिवं स्मरन् ।
निजबीजं ततो बिन्दुं लज्जाबीजमतः परम् ।।
पंक्तिक्रमे लिखित्वा तु त्रिकोण पञ्चकं क्रमात् ।
लिखित्वा वेष्टयेत्सम्यक् वृत्तेन परमेश्वरि ।।
ततोऽष्टदल पद्मञ्च ततो वृत्तं लिखेद्बधः ।
ततो द्वाराणि कुर्वीत चर्तुदिक्षुः समाहितः ।।
एवं यंत्रं प्रकुर्वीत कालिका पूजने बुधः ।"

—महाकाल संहिता

"मध्ये तु वैन्दवं चक्रं बीजमाया विभूषितम् ।"

—कुमारी कल्पे

विन्दुं विन्दुरूपं चिह्नम् । निल बीजं क्रीं । लज्जाबीजं ह्रीं । एतत्त्रितयलेखनं अन्यतंत्रेऽष्वपि दृश्यते । यथा—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"आदौ त्रिकोणं विन्यस्य त्रिकोणं तद् बहिर्न्यसेत् ।
बहिस्त्रिकोणमालिख्य षट्कोणञ्च लिखेद् बहिः ॥
मध्ये तु बैन्दवं चक्रं बीजमाया विभूषितम् ।
षट् कोणान्तु बहिर्वृत्तं ततश्चाष्टदलं लिखेत् ॥
बहिर्वृत्तेन संयुक्त भूपुरेकैण वेष्टितम् ।
ज्ञात्वैवं युक्तिमाप्नोति यंत्रमेतन्नसंशयः ॥"

—वृ० नी० तं० ८ । २-४

कुमारीतंत्र वचने त्रिकोणत्रयात् परं षट्कोण लेखनमुक्तम्, तत् त्रिकोणद्वयपरम् । कालीतंत्र वचने—

" अधो वक्रं पञ्चकोणमन्यन्यश्चाप्य लग्नकम् ।
एवं भूतं महायंत्रं स्थापयेत् सिंहविष्टरे ॥"

इति सिद्धेश्वरतंत्र-वचने सह विरोधापत्तेः, सम्भवत्येक वाक्ये भिन्न वाक्यस्य कल्पनाया अन्याययत्वाच्च । पञ्चकोणम् पञ्चत्रिकोणम् सिंह विष्टरे=सिंहासने । अन्यत्र तु—

"शुद्धासने च पशुभिरदृष्टे पुरतो न्यसेत् ।"

—वृ० नी० तं० ८ । ६

यंत्रान्तरमपि दृश्यतोयथा—

"शक्त्याग्निभ्याञ्च षट्कोणं शक्तिभिश्च नवात्मकम् ।
पद्मं वसुदलं भूमि पुरश्चतुर्द्वार संयुता ॥"

—तंत्रसारे

अत्र-ऊर्ध्वमुख त्रिकोणस्य अग्निरिति संज्ञा । शक्त्याग्निभ्याम् अधोमुखोर्ध्वमुख त्रिकोणाभ्यां षट्कोणम् । अयं भावः— "आदौ-अधोमुखं त्रिकोणमेकं विलिख्य, पश्चादूर्ध्व मुखेनैकेन त्रिकोणेन तद्भेदयित्वा षष्ट्कोणं सम्पाद्यम् । शक्तिभिश्च नवात्मकम्=ततः तत्षट्कोणं गर्भीकृत्य अन्योन्यासंसक्त मधोमुख-त्रिकोण त्रय लिखेत् इत्यर्थः । तद्बहिरष्टदलं पद्म तकद्बहिश्च-तुर्द्वारसंयुतं भू गृहम् । मंत्र महोदधौऽपि—

"आदौ षट्कोणमारच्य त्रिकोण त्रितयं ततः ।
पद्ममष्टदलं वाह्ये भू पुरं तत्र पूजयेत् ॥

—म० म० ३ । ११

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कालीयन्त्रम्

आदौ त्रिकोण विन्यस्य त्रिकोणं तद्वहिर्न्यसेत् ।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ।।
ततो वृतं समालिख्य लिखेद् अष्टदलं ततः ।
वृत्तं विलिख्य विधिवल्लिखेद् भूपुरमेककम् ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

किन्तु-कालीतन्त्रोक्त यंत्रमेव प्रचरतितराम्। यंत्र विषयक-शेष ज्ञानं पूर्य्यते—

"बीजं प्राणं च शक्तिञ्च दृष्टि वश्यादिकं तथा।
मंत्र यंत्राख्य गायत्री प्राणस्थापनमेव च॥
भूतदिक्पाल बीजानि यन्त्रस्याङ्गानि वै दश॥

—सौ० ल० उ० टीकायाम् घृतवचनम्

मंत्रगायत्री—

"मंत्रराजाय विद्महे महामंत्राय धीमहि, तन्नोमंत्रः प्रचोदयात्"

यंत्रगायत्री—

"यंत्रराजाय विद्महे महायंत्राय धीमहि तन्नो यंत्रः प्रचोदयात्"

—प्र० सा० त० ३०.

एतौ द्वावपि मंत्रौ सर्वत्र यथावकाशं विलिखेत्।

प्राण-प्रतिष्ठा-मंत्रमाह—"ब्रह्म-विष्णु-महेश्वरा ऋषयः। ऋग्यजुसामाथर्वाणि छन्दांसि। सकल जगत्सृष्टि कारिणो प्राण-धारिणो शक्तिर्देवता। आं बीजं, क्रों शक्तिः प्राण प्रतिष्ठार्थे विनियोगः।

आं हृत्। ह्रीं शिरः। क्रों शिखा। आं कवचम्। इत्याद्यङ्गानि। ध्यानम्—

"रक्ताम्भोधिस्थ पोतोल्लसदरूणसरोजाधिरूढा कराब्जे
पाशं कोदण्डमिक्षूद्भव गुणमप्यकुशश्चबाणान्।
बिभ्राणासृक्कपाल त्रिणयन लसितापीनवक्षोरुह ढ्या,
देवो बालार्कवर्णा भवतु सुखकरी प्राणशक्ति परा न.।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों क्षं सं हंसः अमुष्य प्राणाः इह प्राणा इह।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों क्षं वं सं हंसः अमुष्य जीव इह।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ॐ आं ह्रीं क्रीं यं रं लं वं शं षं सं हों क्षं सं हंसः अमुष्य सर्वेन्द्रियाणि—

वाङ्मनः श्रोत्र घ्राण प्राणा इहैवागत्य सुखं चिरं तिष्ठतु स्वाहा। क्रों ह्रीं आं हंस सोऽहं स्वाहा हंसः क्षं हं इति।

अत्र—अमुष्य पदात् पूर्वं साध्य देवता नाम योजयेत्। स्वप्राणप्रतिष्ठामंत्रः। इमं यथावकाशं विलिखेत्।

एनं यंत्र हृदयमिति चाचक्षते।

वाय्वग्नि वज्रि वरुणेश्वर राक्षसेन्दु—
प्रेतेश दिक्षु लिखितंस्थ यादिवर्णैः।
बिन्द्वङ्कितैः क्षगतहससमेतमध्यं
प्राणाख्या यत्रमथ वर्णवृत्तान्तरस्थम्॥

अयमर्थः—यंत्रस्य वाय्वादि दिक्षु उक्तेन क्रमेण यं रं लं वं शंषंसंहं इत्येतानि बीजानि विलिखेदिति।

प्राण प्रतिष्ठामंत्रस्य गायत्री मंत्र यत्रयोः।
यथावकाशं विलिखेत् गुरुवत्क्रेण वर्त्मना॥"

—प्र० सा० सा० ३०-तमे पटले।

पीठ पूजा ततः कृत्वा स्ववामेऽर्घ्यं न्यसेत्प्रिये।
मूलविद्यां षड्गेन मूलमंत्रेण चार्चयेत्॥४४॥

ततो हृदयपद्मान्तः स्फुरन्तीं परमां कलाम्।
यन्त्रमध्ये समावाह्य न्यासजालं[1] प्रविन्यसेत्॥४५॥
ततो ध्यात्वा महादेवीमुपचारान् प्रकल्पयेत्[2]।
नमस्कृत्य महादेवीं ततः आवरणं यजेत्॥४६॥

वरिवस्याविधिमाहः—पीठपूजामिति—प्रथमं स्वहृदये देवतां ध्यात्वा तत्र मानसोपचारैः सम्पूज्य ताम्राद्याधारे यत्रं, तदशक्तौ-

१. न्यासमेव-क। २. मुपचारैः प्रपूजयेत्-क।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यन्त्रपुष्पं संस्थाप्य, तदन्यस्मिन् विहितताधारे वा कुमारी-कल्पाद्युक्तां पीठपूजां विधाय स्ववामे त्रीणि अर्घ्यपात्राणि-अशक्तौ-द्वे एकं वा संस्थाप्य तत्र षडङ्गपूजां कृत्वा देवीमावाहयेत् ।

तत्रायंक्रमः—प्रथमं शिरसि द्वादशार्णसरसीरुहोदरे श्रीगुरुं ध्यात्वा मानसोपचारैस्तं संपूज्य—

"नमोऽस्तु गुरवे तस्मै स्वेष्ट स्वरूपिणे ।
यस्यवाक् अमृतं हन्ति विषं संसारसञ्ज्ञकम् ।।"

इत्यनेन प्रणम्य—

"श्री गुरो दक्षिणामूर्ते भक्तानुग्रहकारक ।
अनुज्ञां देहि भगवन् यंत्रराजार्च्चनाय मे ।।"

इति गुर्वाज्ञां प्रार्थ्य प्राणायामं षडङ्गन्यासञ्च कुर्यात् । ततः आत्मानं कामकलारूपं विभाव्य कराभ्यां पुष्पाञ्जलिमादाय तं मातृकाम्भोजत्वेन कल्पयित्वा कूर्म्ममुद्रां वद्ध्वा हृदि चक्रराजे देवीं यथोक्तरूपां सपरिवारां पूर्वोक्तध्यानाभिलापेन ध्यात्वा तेजोरूपतामामापाद्य अन्तर्मुद्राप्रयोगेण मूलाधारात्कुण्डलिनीमुथाप्य तया सह षट् चक्रभेदक्रमेण हृदयान्तः स्फुरन्तीं तेजोमयीं सुषुम्नामार्गेण ब्रह्मरन्ध्रं नीत्वा परतेजःसङ्गमेनामृतमहाम्बुधौ क्षणं विश्राम्य शिवशक्तिसामरस्यसुखमनुभूय—

महापद्मवनान्तस्थे कारणानन्द विग्रहे ।
सवहितरतेमातः एहि एहि परमेश्वरि ।।
एहि एहि देवदेवेशि कालिके देवपूजिते ।
परामृत प्रिये शीघ्रं सान्निध्यं कुरु सिद्धिदे ।।
देवेशि भक्तिसुलभे परिवारसमन्विते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ।।

इति आवाहनमंत्रान्ते—"यं" इति वायुवीजेन वहन् नासापुटाध्वना कूर्ममुद्रामुद्रित करस्थ पुष्पाञ्जलौ तत्तेजः समानीय पीठान्तः कल्पितमूर्ते शिरसि-ब्रह्मरन्ध्रस्थाने सन्निवेश्य महाकालाङ्कस्थां सावरणां श्रीमद्दक्षिणकालिकां सर्वावयवभावेनध्यायन्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पीठान्तः कल्पितमूर्तेः शिरसि ब्रह्मरन्ध्रस्थाने सन्निवेशिता, या तेजोरूपा देवी तां कल्पितमूर्तेः सर्वेष्वेवावयेषु व्यापकत्वेनावाहयेत्। आह्वानानन्तरम् आवाहनाङ्ग भूताति स्थापन-सन्निधापन-सन्निरोधन-सन्मुखी-करणान्यपि कुर्यात् ।

तत्रायं प्रयोगः—महाकालसहित श्रीमद्दक्षिणकालिके 'इह आगच्छ आगच्छ-इत्यावाहनीमुद्रया आवाह्य-"इह तिष्ठ तिष्ठ" इति स्थापनीमुद्रया संस्थाप्य-"इह सन्निहिता भव" इति सन्निधापनीमुद्रया सन्निधाप्य-"इह सन्निरूध्यस्व" इति सन्निरोधनी मुद्रया सन्निरूध्य "ममपूजांगृहाण" इति सम्मुखी करणमुद्रया आवाहित-स्थापित-सन्निधापित-सन्निरुद्धीकृत तेजस्कां कल्पितमूर्ति पूजाग्रहणानुकूलानुष्ठानत्वेन सम्मुखी कुर्यात् । इत्थं विधाय प्राणप्रतिष्ठां कुर्यात् यथा—"आं ह्रीं क्रों हंसः महाकालसहितः दक्षिणकालिकाया प्रण इह प्राणा इह । "आं ह्रीं क्रो हंसः महाकाल सहित श्रीमद्दाक्षिणकालिकाया जीव इह स्थितः । आं ह्रीं क्रो हं सः महाकालसहित श्रीमद्दशिवकालिकायाः सर्वेन्द्रियाणि । आं ह्रीं क्रीं हं सः महाकालसहित श्रीमदक्षिणकालिकायाः वाङ्मनश्चक्षुः श्रोत्र-घ्राण-प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।"

इतिमंत्र चतुष्टयेन प्राणप्रतिष्ठां लेलिहानमुद्रया कुशविष्टरेण वा कृत्वा "अवगुण्ठिताभव" इत्यभिलापेन "हूँ" इत्युच्चार्य अवगुण्ठनमुद्रया प्राणप्रतिष्ठाङ्गं अवगुण्ठनञ्च कृत्वा देव्यङ्गे षडङ्गविन्यासेन सकलीकृत्य मूलविद्याम्-"ओं ह्रीं ह्रीं क्षुं इति दीपनीविद्यां विन्दुयुक्तां अकारादिक्षकारान्ताम् मातृकाञ्च उच्चार्य अर्घ्य जलेन देवीं त्रिः प्रोक्षयेत् ततश्च-महामुद्रानामक परमीकरण मुद्रया परमीकृत्य छोटिकाभिर्दशदिग्बन्धनं कृत्वा " वं " इति अमृतबीजमुच्चार्य धेनुमुद्रया अमृतधारया अभिषिञ्चन अमृतीकुर्यात् । ततः-योनिखड्ग-मुण्ड-वराऽभीति परयोनिमुद्राः प्रदर्श्य

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यथाशक्ति उपलब्ध वाह्योपचारैः पूजयेत् । केचित् साम्प्रदायिका आवाहनादिषु महाकाल सहितेति पदं न वदन्ति ।

इति ४४–४६

कालीं कपालिनीं कुल्लां कुरूकुल्लां विरोधिनीम् ।
विप्रचिन्तान्तु सम्पूज्य बहिः षट्कोणके ततः[1] ॥४७॥
उग्रामुग्रप्रभां दीप्तां तथा मध्यत्रिकोणके ।
नीलां घनां बलाकाञ्च तथैवान्य त्रिकोणके[2] ॥४८॥
मात्रां मुद्रां मिताञ्चैव तथैवान्तस्त्रिकोणके[3] ।
सर्वाः श्यामा असिकरा मुण्डमाला विभूषिताः[4] ॥४९॥
तर्जनीं वामहस्ततेन धारयन्त्यः शुचि स्मिताः[5] ।
ततो वै मातरः पूज्याः ब्राह्मी नारायणी तथा[6] ॥५०॥
माहेश्वरी च चामुण्डा कौमारी चापराजिता ।
वाराही च तथा पूज्या नारसिंही तथैव च ॥५१॥
सर्वासामपि देवीनां बलिपूजां तथैव च[7] ।
अनुलेपनकं गन्धो धूपो दीपो तथैव च[8] ॥५२॥
त्रिस्त्रि पूजा प्रकर्त्तव्या[9] सर्वासामपि साधकैः ।
गुरूपङ्क्ति षडङ्गञ्च दिक पलांश्च ततोऽर्चयेत्[10] ।
एवं पूजा पुरा कृत्वा मूलेनैव यथाविधि ॥५३॥

१. धुघः–ग घ । २. तथाऽर त्रिकोणके–ख-ग । तथैववापरकेत्रिके–च । ३. तथैवान्य त्रिकोणके–क । न्यसेत्त्वान्य त्रिकोण के–ग । ४. त्रिभूषणः–ग–घ । ५. धारयन्ताश्च सम्मिता क–च । ६. एतच्च श्लोकार्धं स्थने ध–पुस्तके "ततो वै मातरः पूज्या पद्मेष्वष्टदलेषु च तत्रादौ पूजयेद्ब्राह्मीं ततो नारायणी तथा ।" इतिश्लोकोदृश्यते । ७. "सर्वासामपि-वैदेयो वलिः पूजनमेव–ग । ८. गन्धदीपौ क्रमात्तथा"–क । "गन्धदीपौ च पानकम्" ख–ग । ९. त्रिमिपूजा प्रकर्त्तव्या घ । १०. श्लोकार्धमेतत् केवले घ पुस्तके दृश्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आवरण पूजामाह—कालीमित्यादि-यन्त्रराजवैन्दव चक्रे मूलदेवता पूजनीया । वैन्दवचक्रस्य दक्षिणे महाकालः पूजयितव्यः । आवरणपूजायां तु प्रथमावरणे-यंत्रराजस्याष्टदल पद्मस्य अग्नीशान निर्ऋति वायुकोणस्य केशर-चतुष्टये अग्निवायु कोणयोर्मध्य पूर्वादिगत केशरे दिक् चतुष्टय गत केशर चतुष्टये च क्रमेण हृदयादि षडङ्गदेवताः पूजयेत् ।

द्वितीयावरणे—तु यंत्रराजस्य मध्य त्रिकोण पृष्ठरेखा विन्दु-चक्रयोरन्तराले गुरुषङ्क्तोः पूजयेत् । तृतीयावरणे-यंत्रराजस्य प्रथमत्रिकोण-सम्मुख त्रिकोणादारभ्य वामावर्त्तेन पञ्चत्रिकोणानां पञ्चदशकोणेषु क्रमेण काल्यादयः पञ्चदशः देवताः पूज्याः । चतुर्थावरणे-अष्टदलपद्मस्य पूर्वाद्यष्टदलमूलेषु ब्राह्मयाद्यष्ट मातृः पूर्वाद्यष्टदलेषु असिताङ्गाद्यष्टभैरवांश्च प्रादक्षिण्येन पूजयेत् ।

पञ्चमावरणे—भूपुरस्य पूर्वादिग् द्वारमारभ्य प्रादक्षिण्येनाष्टसु दिक्षु इन्द्रेशानयोर्मध्ये निर्ऋति वरूणोर्मध्ये च इन्द्राद्यष्टलोक पालान् क्रमेण पूजयेत् । ततोभूपूरबाह्ये इन्द्रादिदश लोकपालानां पृष्ठभागे यंत्रबहिर्भूतस्थाने प्रादक्षिण्येन वज्राद्यस्त्राणि पूजयेत् ।

षष्ठावरणे—प्रथम त्रिकोण विन्दु चक्रयोरन्तराले ईशान-कोणादारभ्य प्रादक्षिण्येन कोणचतुष्टये मूलदेवता हस्त चतुष्टये वा देवी हस्त चतुष्टयगत खड्ग-मुण्डऽभय वरात्मकास्त्र चतुष्टयं पूजयेत् ।

मूलेऽनुक्तमपि ग्रन्थान्तरेभ्य आकृष्य क्रमोऽयं लिखितः । पूजायाम् एष एव क्रय अनुसरणीयः, श्यामारहस्यादावुक्तत्वात् शिष्टैः क्रियमणत्वात्त्व सम्प्रदायभेदेन आवरण पूजायां क्वचित् स्थानभेदः क्रमभेदश्च विद्यते ।

इति ४७–५३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नैवेद्यादीन्[1] यथा शक्त्या दद्यात् देव्यै पुनः पुनः ।
ततो वै दशवारास्तु[2] दीपं दद्यात्तु[3] साधकः ।।५४।।
पुष्पादिकं पुनर्दद्यात् मूलेनैव यथाविधिः ।
तत सावहितोमन्त्री गुरूं नत्वा शिरः स्थितम् ।।५५।।
देवीं ध्वात्वा चाष्टोत्तरसहस्रं[4] प्रजपेन्मनुम् ।
तेजोमयं जपफलं[5] देव्या हस्ते समर्पये-
गुह्यातिगुह्य गोपत्रीत्वमिति मन्त्रेण मंत्रवित् ।
ततः शिरसि वै पुष्पं[6] दत्वा अष्टाङ्गं प्रणम्य च ।।५७।।
विसृज्य परया भक्त्या संहारेणैव भक्तितः[7] ।
उद्वास्य हृदये देवीं तन्मयो भवति ध्रुवम् ।।
पुरश्चरणकालेऽपि पूजा चैषा प्रकीर्तिता ।।५८।।

इति श्री कालीतन्त्रे—सपर्याविधि[8]

प्रथमः पटलः

१. नैवेद्यन्तम्-ख । नैवेद्यादि-ग घ । २. दशवारन्तु क ख । ३ दत्त्वा च घ । ४. चाष्टोत्तर शत्कव्य-घ । ५. तेजोमयं जपनलम्-क घ । "तेजोमयं जलं देव्या वामहस्ने"-ख । ६. ततो वै शिरसे पुष्पं क ग घ । ७. "सन्निधापन मुद्रया क ग घ । ८. सपर्या नियमः इति प्रथम पटलः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वितीयः पटलः

भैरव उवाच—

साधनं सिद्धमंत्रस्य वक्ष्यामि परमादभुतम् ।
भाग्यहीनोऽपि मूर्खोऽपि यद्बोधादमरो भवेत् ।।१।।
साधयेत् सकलान् कामान् सर्वसिद्धीश्वरो भवेत् ।।१½।।

सिद्धमंत्रमेव सिद्धि प्रयच्छति-अतएव पूर्वं मंत्रसिद्धिर्कथं भवतीति कथ्यते साधनमिति-सिद्धमंत्रस्य साधनम्-उपायं वक्ष्यामि । यतः भगवत्या दक्षिणाकाली मंत्र परमाद्भुतम् वर्तते । यतस्तस्य बोधात्=सिद्धमंत्रस्य जपनात्-भाग्यहीनोऽपि मूर्खोऽपि भाग्ययान् वाग्मी च भूत्वा अमरो भवेत् अपमृत्युं निवार्यते । अस्मात् अस्मिन् तंत्रे-उपदिष्टमंत्रान् साधयित्वा सकलान् कामान्-साधयेत् । सर्वसिद्धीश्वरो भवेत्=अणिमाद्यष्ट सिद्धीश्वरो भवेच्च । यथा-भाग्यहीनः-भाग्यम्=प्रोक्त न शुभाशुभ कर्म फलम् । शुभ कर्मफलं-सौभाग्यम्, अशुभकर्मफलम् दुर्भाग्यम् भवति । देवा अपि सौभाग्यमिच्छन्ति—

भग एव भगवाँ अस्तु देवः,
तेना वयं भगवन्त स्याम ।
तं त्वाभग सर्व इज्जोहवीमि,
स नो भभग पुर एता भवेह ।।

—अथर्व ३।१६।५

मूर्खः—"अज्ञे मूढ यथा जात मुर्ख वैधेयवालिशाः" ।

—इत्यमरः

"मूर्खः क्रिया रहितः ।" "मूर्खः=गायत्री रहितः" ।

—त्रिकाण्डशेषः

---

१. "साधयेद् सिद्धि सकलान् साक्षात् सिद्धीश्वरोभवेद्"—ख ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

व्यवसायत्मिकः, बुद्धिरहितरित्यर्थः । अतएव—

"आ दधामि ते पदं समिद्धे जात वेदसि ।
अग्निः शरीरं वेवेष्ट वसुं वागपि गच्छतु ।।"

—अथर्व० २।१२।८

सहस्रारे प्रतिष्ठितः वरुण सर्वेषामिन्द्रियाणां तर्पकः । तस्य व्यतिक्रमेण जडत्वं मूर्खत्वं जायते । मंत्रजाप्येन वरुणस्य, इन्द्रिय प्राणधारकस्य रसस्य प्रवाहो यथावज्जायते, नश्यते च मूर्खत्वम् । तथा जाते सति मंत्री प्रज्ञावान्-वाग्मी च जायते । यतः ज्ञानेन्द्रियाणां अभिवोढा रसः-सरस्वत्यां नाड्यां यथावत् प्रवहति । मंत्रजाप्येन प्रवाहो सम्यक्तया प्रभवति ।

"वरुणस्य वा अभिषिच्यमानस्याप इन्द्रियं वीर्यं निरध्नन् । तत्सुवर्णं हिरण्यमभवत् ।" —तै० १।८।६।१

आपो भद्रा घृतमिदाप आसन्नग्नीषोमौ विभ्रत्याप इत् ताः ।
तीव्रो रसो मधुष्टचामरंगम आ मा प्राणेन् सह वर्चसा गमेत् ।।

—अथर्व० ३।१३।५

आप भद्रा ता एव घृतम् आसन् । ता एव आप अग्नीषोमौ विभ्रति-धारयन्ति । तादृशीनाम् अपाम् मधुपृचाम्=मधुना रसेन सम्पृक्तानां तीव्रः उद्भूतो रसः अरंगमः-पर्याप्तगमनः न कदाचिदपि क्षीण प्राणेन-चक्षुरादिना वर्चसा वलेन च सह मा माम् आगन् आगच्छतु । रस प्राणेन सह आगच्छतु । —सायणः

आदित् पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ् मासाम् ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः ।।

— अथर्व० ३।१३।६

अनन्तरमेव अहं पश्यामि उत वा शृणोमि । घोषः-उच्चार्यमाणश्च शब्दः मा माम् आ गच्छति तथा वाक् वागिन्द्रयम्-आसाम् रसागमनेन मा=माम् आगच्छति । तदानीम् अमृतस्य

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भेजानः अहं मन्ये । यदा हे हिरण्यवर्णा आपः वः युष्मत्सेवनेन अतृपम् । —सायणः

"ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत ।"

—अथर्व० ११।७।१६

एवम्-मृत्युरपि निवारयति । अतएव साधकः, अजरामरो भवति ।

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूत दक्षः ।
नाचीनाः स्थुरुपरि बुध्नः एषामस्मे अन्तर्निहिताः केतवः स्युः ।।

—ऋग्० १।२४।७

शुद्धबलः वरुणः राजा मूलरहितेऽन्तरिक्षे तिष्ठन् वनीयस्य तेजसः स्तूपम्=संघम् ऊर्ध्वं उपरि देशे ददते-धारयति । ते च रश्मयो नीचीनाग्रा तिष्ठन्ति । एषाम् मूलम् उपरि भवति । तथा सति केतवः-प्रज्ञापकाः प्राणाः, अस्मासु अन्तः निहिता स्थापिताः स्युः । मरणं न भविष्यत्यीत्यर्थः । —मुद्गलः

यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।

—ऋग्० ८।४१।६

यस्य श्वेतानि तेजांसि तिस्रः भूमीः, अधः स्थिता प्रययन्ति अन्तरिक्षे अधिवसतः ।

अयं भावः—

विन्दुमूलं शरीराणां शिरास्तत्र प्रतिष्ठताः ।
भावयन्ति शरीराणामापादतल मस्तकम् ।।

—गो० सं०

तद् "वरुणः" बिन्दुर्वा स्वरूपेण त्रिविधः—

स्थूलं सूक्ष्मं परं वेति त्रिविधं ब्रह्मणोवपुः ।
स्थूलं शुक्लात्मकं विन्दु सूक्ष्मं पञ्चाग्निरूपकम् ।।
सोमात्मकः परः प्रोक्तः सदा साक्षी सदाऽच्युतः ।

—यो० शि० ५।२८

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कार्यरूपेणापि त्रिविधो भवति—

महामाया महालक्ष्मीर्महादेवो सरस्वती।
आधारशक्तिरव्यक्ता यया विश्वं प्रवर्तते॥
अत्र–"सूक्ष्माभा विन्दुरूपेण पीठरूपेण वर्तते।"

—यो० शि० २।११–१२

अत्र—"या च दुर्गा-लक्ष्मी-सरस्वतीत्वेन व्यवह्रियते येयमाधारशक्तिरव्यक्त रूपा भवति। —ब्रह्मयोगी

केनरूपेण व्याक्ताव्यक्तस्वमित्यत्र–"स्थूलं सूक्ष्मं परं वेति।" पर-अच्युतः सूक्ष्मः-मनः, स्थूलः-कामरूपः। व्यक्ताव्यक्तः व्याख्यातः।

अदित् पश्चामुत् वा शृणोम्या मा घोषो गच्छति वाङ् मासाम्।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः॥

—अथर्व० ३।१३।६

मंत्र प्रक्रिया—

ज्ञानशक्तौ स्थिता मन्त्रास्तज्ज्ञानं चेतसि स्थितम्।
तच्चेतः पूजितं तुष्टं सात्त्विकं तु भवेत् सदा॥
सत्त्वस्या तु श्रियो नित्यं लक्ष्मीस्तयैव वर्तते।
रजस्तमोविनाशेन मन्त्रा सत्त्वोदये स्थिताः।
सिद्धिप्रदा भवन्त्याशु यतोऽतीव सुनिर्मला॥

—ने० त० १५।२६-२७

सिद्धि-किं नाम सिद्धि ? "यद् यद् कामयते तत्तदेव सद्यैव प्राप्नोति।"

यथा—"अणिमा लघिमा प्राप्तिः प्राकाम्य महिमा तथा।
ईशिता वशिता चैव तथा कामावशायिता॥

—अमरकोषे

तेषामष्टानामीश्वरो-स्वामी सिद्धीश्वरो भवति। यतः सा भगवती—

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

"एवं सर्वगत शक्तिः सा ब्रह्मेति विविच्यते।
सगुणा निर्गुणा चेति द्विविधोक्ता मनीषिभिः।
सगुणा रागिभिः पूज्या निर्गुणा तु विरागिभिः॥
धर्मार्थकाममोक्षाणां स्वामिनी सा निराकुला।
ददाति वाञ्छितानर्थानर्चिता विधिपूर्वकम्॥

— देवीभागवते

आदौपुरस्क्रियां कुर्यात् नियमेन यथा विधि[1] ॥२॥

आदावित्यादि—आदौ-प्रयोगकरणात्पूर्वं, नियमेन=पुरश्चरणनियमेन, यथाविधिः—विधिपूर्वकं पुरस्क्रियाम्-पुरश्चरणम् कुर्यात्। यथासिद्धमंत्री एव प्रयोगार्हो भवति। किं नाम पुरश्चरणम्?

"जपहोमौ तर्पणं चाभिषेको विप्रभोजनम्।
पञ्चांगोपासनं लोके पुरश्चरणमुच्यते॥"

—ल० तं० ८२ तमे पटले

"पूजा ध्यानं जपं होमं पञ्चमं विप्रभोजनम्।
प्रत्यहं साधकः कुर्यात् स्वयं च सिद्धिमिच्छता॥"

—वि० सं०

परन्त्वत्र नात्र तेषामावश्यकता। अस्मिन् मार्गे तैर्विनापि पुरश्चरणं सम्पद्यते। एतदेवपरमाद्भुतत्वम्। तथाचात्र मूर्खोऽपि नाना साधनहीनोऽपि सिद्धि-प्राप्नोति। सिद्धमनुर्मंत्री-सकलान् कामान् साधयेत्। नियमस्त्वग्रे वक्ष्यते—

लक्षमेकं जपेद् विद्यां[2] हविष्याशी दिवा शुचिः।
रात्रौ ताम्बूलपूरास्यः[3] शय्यायां लक्षमानतः ॥ ३ ॥

१. समाहितः-घ २. जपेन्मंत्री-ग-घ। ३. पूर्णास्य-ख।

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

लक्षमेकमित्यादि – लक्षमेकम्-आलक्षं निश्चित संख्यया, विद्याम्-दक्षिण-कालिकामनुम्, हविष्याशी सन्-शुचिर्भूत्वा, दिवा-दिने जपेत्।

रात्रौ च ताम्बूलपूरास्य सन् शय्यायाम्=लतया सह लक्षमा-नतश्च जपेत्। अर्थात् प्रतिदिनं हविष्याशी सन् नियतसंख्यया शुचिर्भूत्वा-दिव्याचारेण आलक्षं लपेत्। रात्रौ तु-तथैव वामाचा-रेण आलक्षं जपेत्। यथा—

वशीलक्षं मंत्रं प्रजपति हविष्याशन रतो,
दिवा मातर्युष्मच्चरणकमल ध्याननिरतः।
परं नक्तं नग्नो निधुवन विनोदेन च मनुं,
जपेल्लक्षं स स्यात् स्मरहरसमानः क्षितितले॥

—कर्पूरस्तवे

दिनम्—"प्रातःकालं समारभ्य जपेन्मध्यदिनावधि।
प्रथमेऽहनि यज्जप्तं तत् जप्तव्यं दिने दिने॥"

—मुण्डमाला

रात्रिः—"अर्धरात्रात्परं यच्च मुहुर्तद्वयमेव च।
सा महारात्रिरुद्दिष्टा तत्र कृत्वाक्षयं व्रजेत्॥"

—बृ॰ नी॰ तं॰ १। ६३

अत्र किमावश्यकं वर्तते ?—

"तत्र वस्तु द्वयं वक्ष्ये दुर्लभं यस्य कस्यचित्।
क्षीरं चैकं द्वितीयं तु नारी च वशवर्तिनी॥"

तथा च विन्दुयोगसिद्धिः—परमावश्यकं वर्तते। तेन विना सिद्धिर्न जायते। यथा—

"नारीभगे पतन्बिदुमभ्यासेनोर्ध्वमाहरेत्।
चलिते च निजं विन्दुमूर्ध्वमाकृष्य रक्षयेत्॥
एवं संरक्षयेद्विन्दुं मृत्युं जयति योगवित्।
मरणं विन्दुपातेन जीवनं विन्दुधारणात्॥"

सिद्धे विन्दुयोगे—"परिवार नियोजनं" भवत्येव। तथारोग्य-मपि प्राप्यते। कृत्रिमोपायेन कृतं परिवारनियोजनं प्रायशः नाना-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रोगकरं हानिप्रदञ्च भवति । किन्तु एतद् विधिना कृतं सम्भोगं किमपि विकारं न करोति, परिवारनियोजनमपि भवति । सिद्धे- मंत्रे सांसारिककार्येष्वऽपि साफल्यमाप्नोति । अतएवोक्तम्—

"एवं तु प्रत्यहं जप्यात् यावल्लक्षं समाप्यते ।
निश्चितं मंत्र सिद्धिस्याद् इत्युक्तं तंत्रवेदिभिः ।।
पुरश्चर्याशतेनापि प्रयोगविधिना तथा ।
कल्पकोटिजपेनापि पूजायाः शतकेन च ।।"

—बृ० नी० तं० ४ । १११-११२

अतएवोक्तम्—

अनया सदृशीविद्या त्रैलोक्ये चातिदुर्लभा ।
जपमात्रेण सर्वेषां साधकानां विमुक्तिदा ।।
अतिरिक्तः श्रमो ह्यत्र नास्ति हे सुरपूजिते ।
सारात् सारतरं देवि सर्वतंत्रेषु गोपितम् ।।

ये च ब्रह्मचर्यादि व्रतपरायणाः साधका सन्ति तेषां कृते तु दिव्याचरं सर्वोत्कृष्टतरं मार्ग विद्यते । यथा—

"अथवा मुक्तकेशश्च हविर्भुक्त्वा सुसंयतः ।
जपेत् लक्षप्रमाणेन स तु विद्या निधिर्भवेत् ।।

नियमानाह—

नानाचारो न कर्त्तव्यो न चारणमितस्ततः[1] ।
भूतहिंसा न कर्त्तव्या पशुहिंसा विशेषतः ।।४।।

बलिदानं विना देव्या हिंसां सर्वत्र वर्जयेत्[2] ।
अन्य मंत्रपुरष्कारं निन्दाञ्चैव विवर्जयेत् ।।५।।

१—नानाचरणभिष्यते—ग । नानाचरणमितस्ततः—घ ।
२—श्लोकार्धमेतत्—ख—ग पुस्तकयोर्नास्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नानेति– नानाचारो न कर्त्तव्यः–"यस्मिन्मंत्रे य आचारः–तत्र धर्मस्तु तादृशः ।" इत्यनुसारेण कालीमनुपुरश्चरणे कालीतंत्रोक्त नियमपालनमेवावश्यकं नान्यत् । न चारणमितरत्ततः—गुरूमंत्र देवता पादपद्मे भक्तिपूर्वकं स्वात्मानं निवेद्य शान्तचित्तेन पुरश्चरणं सम्पादनीयम् । अन्यमंत्रस्य स्तुतिनिन्दापि न कार्या ।

ततः सिद्धमनुर्मंत्री प्रयोगार्हो न चान्यथा ।
जीवहीनो यथा देही सर्वकर्मसु न क्षमः ॥६॥
पुरश्चरण हीनोऽपि तथा मंत्र प्रकीर्तितः ।
तस्मादादौ पुरश्चर्यां कृत्वा साधकसत्तमः ॥
प्रयोगञ्च ततः कुर्यात् सर्वं साधकसत्तमः[1] ॥७॥

तत इति—सिद्ध मनु साधक एव प्रयोगार्हो भवति, नान्यः । अतएव पुरश्चरणमवश्यमेव कर्त्तव्यम् । युगानुसारमित्यर्थः । मंत्रसिद्धेश्च लक्षणम्—

"मनोरथानामक्लेशसंसिद्धि सिद्धिरीरिता ।
राज्ञः प्रसादः सर्वेषां मान्यत्वं पुण्यसिद्धयः ॥
ख्यातिः वाहनभूषादि लाभः सुचिरजीवितम् ।
आरोग्यमविसंवादी सच्छिष्यत्वं कृतज्ञता ॥
विषाणो जरणज्ञानं स्वस्थस्यावेदनं तथा ।
प्रत्यक्षाः सिद्धयः प्रोक्ता मनोसिद्धस्य सर्वतः ॥
एतास्युः सिद्धय प्रोक्ता सिद्धमंत्रस्य सूचकाः ।
सिद्धमंत्रेण कर्त्तव्यः प्रयोगो नान्यथाप्रिये ॥

—तं० तं० ३५ । ७६-७६

इति श्री कालीतन्त्रे—पुरश्चरणविधि
द्वितीयः पटलः[2]

१–प्रयोगञ्च सदा कुर्यात् सर्वविधिविधानतः–क ।
२–पुरश्चरण द्वितीयपटलः–च ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एकेनैव पुरश्चरणेन सिद्धिः प्राप्यते क्वचित्-क्वचित्तु नापि प्राप्यते । अतःएव आसिद्धिः पुनः पुनः पुरश्चरणमाचरेत् । इत्यस्माकमनुभवः । तथा च शास्त्रेऽपि—

"सकृत् द्विधा त्रिधा वापि चतुर्धा युगभेदतः ।
कर्त्तव्यञ्च प्रयत्नेन पुरश्चरणमुत्तमम् ।।"

—पूजापद्धति

आगमोक्ताभ्यन्तरी प्रक्रिया—

"शक्त्याचाधो यदागच्छेत्-अबुधस्तु तदा भवेत् ।
हृद्गतः पुनरुत्तिष्ठेत्-बुध्यमानः स उच्यते ।।
शक्ति प्राप्य बुधो ज्ञेयः व्यापिन्यंशे प्रबुद्धता ।
अतीतः सुप्रबुद्धस्तु उन्मनस्त्वं तदाभवेत् ।।"

—स्व० तं० ४ । २३८-२३९

"अधो यात्यधर्मेण धर्मेणोर्ध्वं व्रजेत्पुनः ।
विज्ञानेन द्वयं त्यक्त्वा सर्वगस्तु भवेदिह ।।"

—स्व० तं० ४ । २५०

"रुद्रशक्तिसमावेशस्तत्र नित्यं प्रतिष्ठितः ।
सति तस्मिंश्च चिह्नानि तस्यैतानि विलक्षयेत् ।।
तत्रैतत्प्रथमं चिह्नं रुद्रशक्ति सुनिश्चला ।
द्वितीयं मंत्रसिद्धिस्यात्सद्य प्रत्ययकारिका ।।
सर्वतत्त्ववशित्वञ्च तृतीयं लक्षणं स्मृतम् ।
प्रारब्धकार्य निष्पत्तिश्चिह्नमाहुश्चतुर्थकम् ।।
कवित्वं पञ्चमं ज्ञेयं सालङ्कारमनोहरम् ।
सर्वशास्त्रार्थ वेत्तृत्वं अकस्माच्चास्य जायते ।
रुद्रशक्ति समावेशः पञ्चधा परिपठ्यते ।।"

—मा० वि० तं० २ । १३-१६

वाह्यचिह्नानि पूर्वोक्तान्येव ।

एवं सिद्धमनुर्मंत्री प्रयोगार्हो भवति । असिद्धमंत्री प्रयोगे सफलं न भवति । यदा कदा भवेदपि तत्तु काकतालीयेन न्यायेन पूर्वजन्मार्जित संस्कारेण वा जायते । इत्यनुभवः ।

इति श्री कालीतन्त्रे जपाख्यायाम्
द्वितीयः पटलः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तृतीय: पटल:

भैरव उवाच—

ततो होमविधिं वक्ष्ये सर्वसिद्धिप्रदायकम् ॥१॥

ततश्चेति—ततः—मंत्रसिद्धे सति—"सद्यफलाकांक्षी-सर्वसिद्धि-प्रदायकम् हुनेत्" अतः होमविधिं वक्ष्ये। होमकर्मसम्पादने को हेतुः ? एकैवाग्निः-वाडवाग्निः वैद्युतरूपेण-वैश्वानररूपेण च सर्वत्र व्याप्यते।

भौमाप्याग्नेय वायव्याः पञ्चोष्माणः सनाभसाः।
पञ्चाहारगुणानस्वान्स्वान् पार्थिवादीन्पचन्ति हि॥

—अ. तं. चि. १५।१३

दिवं पृथिवीमन्वन्तरिक्षं ये विद्युतमनुसञ्चरन्ति।
ये दिक्ष्वऽन्तर्ये वाते अन्तस्तेभ्योऽग्निभ्यो हुतमस्त्वेतत्॥

—अथर्व. ३।२१।७

अस्मदादीनां शरीरं स्वचालितं यंत्रं—क्षणे-क्षणे शीर्णतां याति। तस्यैतत् स्वाभाविकी स्थितिः। तच्छीर्णत्वं-क्षयत्वं क्षणे-क्षणे पूर्णतामपि च एति। क्षयत्वं शीघ्रमेव पूर्णार्थं यज्ञं-होमं क्रियते। तथा वैशिष्टयार्थमपि होमं क्रियते। समष्टि-व्यष्टि रूपेण च तद्द्विविधम्। समष्टि होमञ्च प्रकृत्या एव भवति—

हिरण्यपाणिं सवितारमिन्द्रं वृहस्पतिं वरुणं मित्रमग्निम्।
विश्वान् देवानङ्गिरसो हवामह इमं क्रव्यादं शमयन्त्वग्निम्॥

—अथर्व. ३।२१।८

यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः॥

—अथर्व. २।३५।५

यथास्वं स्वञ्च पुष्णन्ति देहे द्रव्यगुणाः पृथक्।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च कृत्स्नशः॥

—अ. तं. चि. १५।१४

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यद् आयुर्विज्ञाने जाठराग्निः सैव उपनिषदि वैश्वानरः——

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥
——गीता १५।१४

एवं सन्तर्पणप्रक्रिया भवति । किन्तु विशेष गुणाधानाय होममाचरेत् । विशेष गुणैर्हि शारीरिक-मानसिक-सांसारिक-पारलौकिक दुःखत्रयोपशमो भवितुमर्हति ।

दुःखत्रयाभिघातात् प्राणीमात्रं सन्तप्यते तत्र प्रज्ञापराध एव कारणम् । यथा——

प्रज्ञापराधात्सम्प्राप्ते व्याधौ कर्मज आत्मनः ।
नाभिशंसेद्बुधो देवान् न पितृन् नापि राक्षसान् ॥
आत्मानमेव मन्येत कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत नो त्रसेत् ॥
देवादीनामपचितिर्हितानां चोपसेवनम् ।
ते च तेभ्यो विरोधश्च सर्वमायत्तमात्मनि ॥"
——अ. तं. नि. ७।२४-२६

दुःखस्य मूलकारणं प्रज्ञापराध एवेतितात्पर्यम् । इदमपि सत्यं यज्जगति न कोपि स्वेच्छया कष्टं-रोगं-हानिं वा वाञ्छति । अतएवाशङ्क्यते——

अथ केन प्रयुक्तोऽयं पापं चरति पुरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥
——गीता ३।३६

तत्र प्रज्ञापराध एव मूलम् । प्रज्ञापराधो कथं सञ्जायते ?

दुराचारं दुरात्मानं अशुचिं पुरुषाधमम् ।
मातापित्रोरसम्मानात्तथाध्ययन वर्जनात् ॥
अति स्त्रीगमनाच्चैव क्लीवत्वाच्च विशेषतः ।
अकाले मैथुनात् मोहभयात् सम्भ्रमणात्तथा ॥
——ने. तं. १९.३४–३५

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्सम्प्राप्तिश्च :—

मलत्रयनिरोधेन नानाकर्म फलोदयात् ।
शब्दादि विषयाणां य इन्द्रियाणां प्रवर्तते ॥
हृत्पुण्डरीक मध्यस्थो धर्माधर्म प्रवर्तकः ।
रागद्वेषाभिभूतस्य त्रिधान्तःकरणावृतः ॥
प्रलुप्तनिजचैतन्यो जीव इत्यभिधीयते ।

—ने. तं. १६।१६३-१६४

ततश्च—

"अनेक शत संख्यातैर्दोषैर्वुष्टं शरीरकम् ।
तच्च हिंसन्ति वहवो हिंसका दुष्टबुद्धयः ॥"

—ने. तं. १६।१७३

ततश्च द्विविधा हि कर्म प्रवृत्तिर्भवति-आहारनिमित्ता, पापकर्म निमित्ता च । तद्द्वयं मंत्रहोम-भैषज्यादिभिः कर्मभि शमयेत्—

तेषां हि शमनार्थाय जगतो रक्षणाय च ।
मंत्रौषधि क्रियायोग शतशोऽथ सहस्रशः ॥

—ने.तं. २०।७२

औषधि प्रयोगादपि होमं श्रेष्ठतमं व्यवायि-विकाशि गुणत्वाच्च । अग्नौ प्रक्षिप्तं द्रव्यं-आहुतिः--सद्यैव सर्वांशे च वायव्यं भूत्वा-गैसीयं स्वरूपं प्राप्य शरीरमनुप्रविशति ।

अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टि वृंष्टिरन्नं ततः प्रजा ॥

अन्नम्—शरीरोत्पादक-पोषकद्रव्यमिति ।
प्रजाः--शरीरनिर्माता सूक्ष्म Cells इत्याख्याः घटकाः । अतएवोक्तम्--

इमं होमा यज्ञमवतेमं संस्रावणा उत ।
यज्ञमिमं वर्धयता गिरः संस्राव्येण हविषा जुहोमि ॥

—अथर्व, १६।१।२

रूपंरूपं वयोवयः संरभ्यैनं परिष्वजे ।
यज्ञमिमं चतस्रः प्रदिशो वर्धयन्तु संस्राव्येण हविषा जुहोमि ॥

—अथर्व. १६।१।३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मनसा होमैर्हरसा घृतेन शर्वायास्त्र उत राज्ञे भवाय ।
नमस्येभ्यो नमः एभ्यः कृणोम्यन्यत्रास्मदघविषा नयन्तु ॥
—अथर्व, ६।९३।२

अत्र--मनसा सङ्कल्पमात्रेण हरसा-हरणशीलेन तेजसा तेजोरूपेण घृतेन, क्षरणशीलेन आज्येन, क्रियमाणैर्होमैः सह शर्वाय अस्त्रे-क्षेप्त्रे एतनाम्ने देवाय । उत-अपि च राज्ञे एतेषाम् ईश्वराय, भवाय-महादेवाय, एभ्य नमस्येभ्य-नमस्कारार्हेम्यः नमस्कृणोमि-नमस्करोमि मंत्रजपं करोमि । होमे नमस्कारेण-जपेन प्रीतास्ते, अस्मत्-अस्मत्तः, अघविषा-अघं पापमेव विषं विषवन्मृतिकरं यासु ताः, अन्यत्र नयन्तु-नाशयन्तु" --सायणः

आयुर्विज्ञानेऽपि व्याधिनाशाय होमकर्म सम्पाद्यते । यथा--

आयुर्वेदेषु यत्प्रोक्तं यस्य रोगस्य भेषजम् ।
तस्य रोगस्य शान्त्यर्थं तेन तेनैव होमयेत् ॥
—प्र. सा. सा. तं. ३० तमेपटले

महारक्षाविधानेन जुहुयात् यस्य नामतः ।
महाशान्तिर्भवेत्क्षिप्रं गतस्यापि यमक्षयम् ॥
—ने. तं ६।१२

लतापुष्पान्वितं कृत्वा पर्णानां शतकं सुधीः ॥१॥
तानि सम्मन्त्र्य विधिवदसकृत्[1] साधकोत्तमः ।
ततो वै होमयेत् तानि संस्कृतेऽग्नौ यथाविधि ॥२॥
युगानामयुतं तेन पूजनं जायते शिवे[2] ।
अनेन क्रमयोगेन यश्चरेद् भुवि साधकः[3] ॥३॥

लतापुष्पान्वितमिति-स्पष्टम्

होमफलमाह--

न तस्य दुर्लभं किंचित् त्रिषुलोकेषु विद्यते ।
धीरो[4]भवति वाग्मी च सर्वसिद्धिमुपालभेत् ॥४॥

---

१. विधिवदाहुय, ग घ । २. जायतेऽचिरात् ख, दक्षिणापूजिता भवेत् ग, कालिका पूजिता भवेत् घ । ३. भुवि दुर्लभम् ख, भुविहोमकम् ग । भुविहोमतः घ । ४. मूको क ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

न तस्येति—न तस्य मंत्रसिद्धोन्तरम् यथाविधि पूजा-जप-होम-तर्पणादि कृते सति, साधकस्य किञ्चिदपि दुर्लभं न विद्यते, त्रिषु-लोकेष्विति । तत्र—"स्वर्ग कामो यजेत" इति प्रमाणम् । वस्तुतस्तु सर्वे यजंते मुमुक्षुवः प्राणाग्नि होत्रं कुर्वन्ति । अतएवोक्तम्--

"नाजप्त सिद्धयते मंत्रो नाहुतश्चफलप्रदः ।"

—सोम. मु.

त्रिषु लोकेषु—

पृथव्यादयस्त्रयः अधिष्ठातार-अग्नि-वायु-आदित्याः सत्व-रज तमस्त्रयोगुणाः, ब्रह्मा-विष्णु-महेश्वराः त्रयोदेवाः आयुर्विज्ञानोक्त वात-पित्त-कफाः त्रयोदोषाः तंत्रयोगोक्त नाडीत्रय—इडा-पिङ्गला-सुषुम्ना चेति, ब्रह्मा-विष्णु-रुद्र-ग्रन्थित्रयः—इत्येवं त्रिसंख्याक्रान्ता ये सन्ति ते सर्वेऽत्र त्रिशब्देन विवक्षिताः । तत्समन्वितं लोकं तेषु—त्रिलोकेषु —अर्थात् तेषु सर्वेषु सिद्धिसाधकः साधिकार सम्पन्नो भवति । स्वस्य परस्य च । अतएव प्रार्थयति—हे वाचस्पते ! मे तज्ज्ञानं अद्यैव दधातु ।

"ॐ ये त्रिसप्ताः परियन्ति विश्वा रूपाणि विभ्रतः ।
वाचस्पतिर्बलं तेषां तन्वो अद्य दधातु मे ॥"

—अथर्व. १।१।१

होमद्रव्यप्रयोगाः——

हुनेदाज्येन भक्तेन मांसेन रुधिरेण च ।
कृष्णपुष्पेण साज्येनसरक्तेन विशेषतः ॥५॥
आमिषादिभिरप्येवं श्मसाने जुहुयात्सुधीः ।
महाकालं हुनेद् यत्नात् पश्चाद्देवीं विशेषतः[1] ॥६॥
त्रिधा विभज्य विद्यां वै साधकः शुद्धमानसः[2] ।
मांसं रक्तं त्वचं[3] केशं नखं भक्तं च[4] पायसम् ॥७॥

१. प्रयत्नतः क । प्रपूज्यते ख । २. सिद्धमानसः ग । ३. तिलं क । ४. भोज्यञ्च घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आज्येनैव[1] विशेषेण जुहुयात् सर्वसिद्धये ।
एवं कृते तु सर्वत्र लभते सिद्धिमुत्तमाम् ॥८॥
यद्यत् कामयते कामी[2] तत्तदाप्नोति निश्चितम् ।
देववन्मानवो भूत्वा भुनक्ति बहुलं सुखम् ॥९॥

हुनेदित्यादि–सार्वभौमिकं हि विज्ञानम् । तथैव आयु-मंत्र-तंत्र-योग प्रभृतिषु विज्ञानेषु सम्प्रदाय विशेषस्य देशविशेषस्य वा अधिकारो नास्ति । तेऽपि सार्वदेशिकाः, सार्वभौमिकाः, सर्वजन-हिताय च भवन्ति । पदार्थ–गुण-दोष विवेचनं हि विज्ञानम् । यद्यपि बहुसंख्यकाः खाद्यपदार्थाः, औषधयश्च विद्यन्ते किन्तु तेषा-मुपयोगं तु देश काल पात्रानुसारेण सद्भिषक् परामर्शेनैव भवति । न च सर्वेषां पदार्थानामुपयोगो सर्वेषां सुखावहो भवति । होम-तर्पणादिष्वपि एवमेव ।

"मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु ।
असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ॥
लोम लोम्ना सं कल्पया त्वचा संकल्पया त्वचम् ॥"
——अथर्व ४।१२।४

अस्थि लोम त्वचायुक्तं मासं मार्जार भेषयोः ।
उष्ट्रस्य महिषस्यापि बलिं यस्तु समर्पयेत् ॥
——म. भ. ३।३०

केश होमेन शक्तिपातो भवति । यथा–

"चिकुरं योगमासाद्य शुक्रोत्सारणमेव च ।
जप्त्वा श्री दक्षिणाकाली शक्तिपातः शतं भवेत् ॥"

केश-शुक्रयोः सम्बन्ध विशेषः । तच्च वराहोपनिषदि काक-चण्डीश्वरतंत्रेऽथर्ववेदे च प्रपञ्चितम् । अतस्तयोर्होमेन शक्तिपातं वर्णितम् ।

अतएव ऋषिः प्रार्थयति–

ये कीलालेन तर्पयन्ति ये घृतेन ये वा वयो मेदसाय संसृजन्ति ।
ये अद्भिरीशाना मरुतो वर्षयन्ति ते नो मुञ्चन्त्वंहसः ॥
—अथर्व. ४।२७।५

१. साज्यञ्चैव ख । २. कामं ख-ग ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मुञ्चन्तु अंहस-पापात् शरीर मानसरोगान् निवारयन्तु–

एवं होमं द्विज कुर्यात् तर्पणं जपमेव वा।
आयुः–अरोग्य सिद्धयर्थं आत्मनो वा परस्य वा ।।

—प्र. सा. सा. ३० तमे पटले

नित्य होमविधिः–

"नित्य होमं प्रवक्ष्यामि सर्वार्थं येन सिद्धयति ।
सपर्या सभ्यगापाद्य बसेः पूर्वं चरेद्विधिम् ।।
ततो जपं तर्पणञ्च चरन् साधकसत्तमः ।
बलिवैश्वादिकं चैव ब्राह्मणश्च समाचरेत् ।।
विधिवदग्निमानीय क्रव्यादेभ्यो नम इति ।
मूलमंत्रं समुच्चार्य कुण्डे वा स्थण्डिलेऽपि वा ।।
भूमौ वा संस्सरेद्वह्नि व्याहृतितृतयेन च ।
स्वाहान्तेन त्रिधा हुत्वा षडङ्ग हवनं तथा ।।
ततो देवीं समावाह्य मूलेन षोडशादुतिम् ।
हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले ।।"

—बृ. नी तं. २।१००–१०४

अत्रायं विशेषः–

"वामे नाडीमिडां भागे दक्षिणे पिङ्गलां पुनः ।
सुशुम्णायां मध्यतोध्यात्वा कुर्याद्धोयं यथाविधिः ।।"

—शा. ति. ५।५४

पूर्णविधिस्तु तत्रैव द्रष्टव्यः ।

"जपान्ते प्रत्यहं मंत्री होमयेत्तद्दशतः ।।"

—बृ. नी. ४।७०

तर्पण विधिः–

तर्पणस्य विधिं वक्ष्ये येन कार्याणि साधयेत् ।
तर्पयेच्च पयोभिश्च रक्ताधारायुतैस्तथा ।।१०।।
[१]मज्जाभिश्च तथा पद्वत् स्वकीयेन परेण च[२] ।
आकर्षितायाः कन्यायाः कुल प्रक्षालनेन च ।।११।।

१. रेतोभिश्च ख-ग। २ कचेन च-ख-ध। फरेण च ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मेष माहिष रक्तेन नररक्तेन चैव हि ।
मूषमार्जाररक्तेन तर्पयेद्देवतां पराम् ॥१२॥
एवं तर्पण मात्रेण साक्षात् सिद्धीश्वरो भवेत् ।
कविता जायते तस्य द्राक्षारसपरम्परा ॥१३॥
वृहस्पति समोभूत्वा देववद भुवि मोदते ।
न तस्य पाप पुण्यानि जीवनं मुक्तो भवेद्ध्रु वम् ॥१४॥

इति श्री कालीतन्त्रे नैमित्तिक विधिस्तृतीय पटलः ।

तर्पणस्येति—तर्पणस्य विधिः प्रयोगाश्च कथ्यन्ते । तर्पयित्वा कार्याणि साधये० । तत्र किं नाम तर्पणम् ? इत्यत्र "तृप् प्रीणने भावे ल्युट्। " "तृप्ति प्रीणिनम्" इत्यामरः । तर्पण क्रियायाः महत्वं सम्प्राप्तिम्च कथ्यते ।

त्वग्धातुर्हि सर्वव्यापको वर्तते । तथा च–त्वग्धातुरेव रोम-कूपेभ्य त्वरितमेव गृह्यते शोष्यते च । अतएव हुत् द्रव्यश्च त्वरितमेव शोषणं फवति । तस्य प्रर्भावेण च प्रथमोधातुः—रसः शुद्धयते । सर्वतः शुद्धरसेन रक्तादयोऽपि निर्मलानि एव उत्पद्यन्ते । चरम धातु ओजोऽपि संशुद्धः–सवंगुणसम्पन्नो भवति ।

येनोजसा वर्तयन्ति प्रीणिता सर्वजन्तवः ।
यस्य नाशस्तु नाशोऽस्ति धारि यद्द हृदयाश्रितम् ॥
—अ. तं. सू. ३०।६

तदोजः—एव सोमः । "शुक्रः [रूपमिति] –ता. ६।६।६ वाह्याग्नि सम्पर्कात्–तथा सर्वधातु विशुद्धे सति कायाग्निरपि बलवान् भवति ।

कायाग्निभेदास्तु–आयुर्वेद विज्ञाने प्रपञ्चिताः यथा–

१. दोषाग्नयः–अ वाताग्निः, आ--पित्ताग्निः, इश--लेष्माग्निः ।

२. मलाग्नयः–अ पुरीषाग्निः, आ--मूत्राग्निः। इ–स्वेदाग्निः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३. धात्वग्नयः—अ. रसाग्निः, आ. रक्ताग्निः, इ. मांसाग्निः
ई. मेदोग्निः, उ. अस्थ्यग्निः, ऊ. मज्जाग्निः
ऋ. शुक्राग्निः ॠ. ओजोग्निः=तेजः

४. भौतिकाग्नयः अ. नाभसाग्निः, आ. वाय्वग्निः, इ. तेजोऽग्निः
ई. जलाग्निः, उ. पृथिव्यग्निः

होमाग्निना—अग्नि-वायु-आदित्यस्वरूपात्मकं-यत्काये प्रतिष्ठितं अग्निस्तत्वम् वर्धते । तदग्निरेव सर्वविधसिद्धिप्रदायकः । अग्निरेव सर्वत्र व्याप्यते । यथा--

"अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।"
—वृ. जा. २।२

सैवाग्निः शरीरे ओजः --

जरायुजः प्रथम उस्रिया वृषा वाताभ्रजा स्तनयन्नेति वृष्टया ।
स नो मृडाति तन्वः ऋजुगो रुजन् य एकमोजस्त्रेधा विचक्रमे ॥
—अथर्व. १।१२।१

अत्र--"य एक ओजस्त्रेधा विचक्रमे" यः-सूर्यः, एकम्=अभिन्नम् ओजः--आत्मीयं तेजः, त्रेधा=अग्निवायुसूर्यात्मना, विचक्रमे विविधम् आक्रान्तवान् । पृथिव्यादि लोकत्रयम् आक्रम्य अधिपतित्वेन स्थितवान् इत्यर्थः ।

अत्र विचारणीयम्--दुर्गासप्तशतेः विनियोगत्रये-अग्नि-वायु-सूर्यास्तत्त्वानि क्रमशोपदिश्य सृष्टिरहस्यं उद्घाटितम् । एतदेव "दुर्गायाः" दुर्गमत्वम् ।

पुनश्च--यः सूर्यः, एकमेव स्वकीयम् ओजः तेजः, त्रेधा--त्रिप्रकारेण वायुः-अग्निः चन्द्रात्मना विचक्रमे कृत्स्नशरीराणि आक्रम्य वर्तते ।

एतत्सोमात्मकम्--

"सोमो वै पवमानः ।" ——श. २।२।३।२२
"श्रीर्वै सोमः ।" ——श. १४।१।३।१२
"चन्द्रमा वै सोमः ।" —श. १२।१।१।२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तथा च--स एव वात-पित्त-श्लेष्मलक्षणदोषत्रयकारि देवात्मना सर्वत्र वर्तते ।

अयं भावः--सोमस्तु द्विविधः–सोमात्मानलात्मा चेति स एव रसशक्तिः अग्निश्चापि द्विविधः–सूर्याग्निभेदेन स एव प्राणशक्तिः । एवम्–"अग्निषोमात्मकं विश्वम्" वृ. जा. २।३

यथा–रक्तमांसादिधातवः तथैव त्वगपि धातुः । तान्त्रिकवाङ्मये तु स्पष्टमेव–"त्वगादिधातुः"– यो. हृ. तं. मं. स. ६०

अस्योपरि–"त्वगसृङ्मांसमेदोमज्जाशुक्राणि धातवः ।" –अमृतानन्दः । किं नाम धातुः ? "धारणाद् धातुः"

किञ्च तत्कर्म ? "प्रीणनं जीवनं लेपस्नेहो धारणपूरणे ।" प्रभृति तेषां कर्म । त्वगपि–एतानि कर्माणि साधयति । वृक्षादयस्तत्र प्रमाणम् । त्वचि प्लुष्टे मानवोऽपि म्रियते ।

हवनकर्माणि–हव्यगुणानि वायव्यभूतानि त्वचा गृह्यन्ते । तथैव तर्पणकर्मण्यपि । होमतर्पणसंख्याविषये तु–

जपान्ते प्रत्यहं मंत्री होमयेत् तद्दशांशतः ।
तर्पणं चाभिषेकञ्च तत्तद् देशाशतो मनोः ॥
—वृ नी. तं. ४।७०

होमतर्पणयोः स्वाहा, न्यासपूजनयोर्नमः ।

मंत्रान्ते नाम चोच्चार्य तर्पयामि ततः परम् ॥
स्वाहान्ते तर्पणं त्वेवम् ।" —वृ. नी. तं. ४।८७

अभिषेकम्——

"मंत्रान्ते नाम चोच्चार्य सिञ्चामीति पदं ततः ।"

ब्राह्मणभोजनम्——

"तद्दशांशं ब्राह्मणानां भोजनञ्च समाचरेत् ।
इत्येवं सिद्धमंत्रः सन् सर्वान् कामांश्च साधयेत् ॥"

अशक्तस्तु मंत्रजपमेव पर्याप्तं भवति । शेषं गुरुमुखाद् ज्ञेयम् ।

इति श्रीकालीतंत्रे प्रसादभाष्ये नैमित्तिकविधिर्नाम
तृतीयः पटलः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चतुर्थः पटलः

भैरव उवाच--

अथ काम्यविधिं वक्ष्ये येन सर्वत्र सर्वगः ।
साधकः साधयेत् सिद्धिं देवानामपि दुर्लभाम्[1] ॥१॥

अथेति–अथ–मन्त्रसिद्धीश्वरो भूत्वा, काम्यविधिम्--षट्कर्माणि साधयेत् । शेषं स्पष्टम् ।

प्रथमः प्रयोगः–

कुलागारं पुष्पितायाः दृष्ट्वा यो जपते नरः ।
अयुतैकं प्रमाणेन साधकः स्थिरमानसः ॥२॥
केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत्[2] ।
संस्कृताः प्राकृताः शब्दा लौकिका वैदिकाश्च ये[3] ॥३॥
वशमायान्ति ते सर्वे साधकस्य च नान्यथा ॥३॥

कुलागारमिति--अत्र अन्यतन्त्रेषु पाठान्तरेण विशदीकृतम्

"पुष्पितायाः कुलागारं स्पृष्ट्वा जपति यो नरः ।
अयुतैकप्रमाणेन साधकः स्थिरमानसः ॥
केवलं शुद्धभावेन स तु विद्यानिधिर्भवेत् ।"
शेषं समानम् । —बृ. नी. तं. ८।२८–३०

"रजः कीर्णभगं नार्या ध्यायन् योऽयुतम् जपेत् ।
स कवित्वेन रम्येण जनान् मोहयति ध्रुवम् ॥"
—मं. म. ३।२७

१–सर्वं देवानामपि दुर्लभम्–ख ग २–वैदिका अपि ख-ग । ३. वैदिकास्तथा–ख ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रहस्यं शृणु चार्वङ्गि येन सिद्धयति सुन्दरि ।
रजस्वलां स्त्रियं वीक्ष्य सहस्रं प्रजपेद्यपि ।।
तदैव मंत्रसिद्धिः स्यान्नात्र कार्या विचारणा ।।

—बृ. नी. तं. ७–१२७

अत्र–स्थिरमानसत्वमेव सिद्धिरहस्यम् । तेनाधोगामिवीर्यस्योर्ध्वीकरणं भूत्वा सरस्वत्या नाड्या विकाशो भवति, तेन विद्वान् वाग्मी च जायते ।

"चित्तायत्तं नृणां शुक्रं शुक्रायत्तं च जीवितम् ।
तस्माच्छुक्रं मनश्चैव रक्षणीयं प्रयत्नतः ।।",

—गो. सं.

द्वितीयः प्रयोगः–

अथवा मुक्तकेशश्च हविष्याशी सुसंयतः[1] ।।४।।
प्रजपेदयुतं प्राज्ञ एतदेव फलं लभेत् ।।[2]।।

अथवेति—मुक्तकेशः–विगलितचिकुरः, विगलित-केशयुक्त-इत्यर्थः । किं नाम केशः ? "के जले शेते" केशः । किञ्चात्र जल शब्देन व्यवह्रियते ? "मज्जा" इति । "मज्जाजातोपधातु-विशेषः" केशः–शब्दकल्पद्रुमे । एवं मुक्तकेशाः–अन्तरिक्षे प्रवाहित-ममृतं आकर्षयन्ति ।

"अप्स्वन्तरमृतमप्सु भेषजम् ।"

—अथर्व. १।५।४

तेनामृतेन–अमरणसाधनेन देवोपभोग्येन पीयूषेण पारम्पर्यात् वीर्यमभिवृद्धिं गच्छति । वीर्यातिशयेन-प्रज्ञापराधो न भवति । यथा पूर्वमुक्तम्—प्रज्ञापराध एव शारीरिकमानसिकरोगाणां कारणम् । अत एवोक्तम्–

१–हविष्यं भक्षयेन्नरः । ख-ग । २–प्रजप्य चायुतं प्राज्ञस्तदेव हि फलं लभेत् । ख-घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जन्मान्तरकृतं पापं व्याधिरूपेण जायते ।
तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः ॥ इति

यथा च श्रुतिः–

यदुक्थानृतं जिह्वया वृजिनं बहु ।
राज्ञस्त्वा सत्यधर्मणो मुञ्चामि वरुणादहम् ॥

—अथर्व. १।१०।३

अत्र वरुणः–

"वरुणोऽपामधिपतिः स मावतु"

—अथर्व. ५।२४।४

अयं भावः–स्कन्धपर्यन्तलम्बमानोन्मुक्तकेशा अन्तरिक्षादमृतं आकर्षयन्ति ।

हविष्याशी––किं नाम हविष्यम् ? "हविषे हितम् हविष्यम् । अर्थात्–ये आहाराः–रस्याः-स्निग्धाः-स्थिराः-हृद्याः, अत एव तं सत्त्व-गुणोत्पादका भवन्ति तेषां हविष्यसंज्ञा इति । यथा–

गोधूम-शालि-यव-षाष्टिक-शोभनान्नम्-
क्षीराज्य-खण्ड-नवनीत - सितामधूनि ।
शुण्ठी पटोलक-फलादिक-पञ्चशाकं-
मुग्दादि-दिव्य-मुदकञ्च यमीन्द्र पथ्यम् ॥

--ह. प्र. १।६२

तथा–श्यामाकनीवारादयः । पञ्चशाकम्–

"सर्वशाकमचाक्षुष्यं चाक्षुष्यं शाकपञ्चकम् ।
जीवन्ती वास्तु-मत्स्याक्षी मेघनादपुनर्नवा ॥"
लवणे सैन्धवसामुद्रे गव्यञ्च दधि सर्पिषी ।
पयो वृत्तानुसारञ्च पनसाम्रहरीतकी ॥
तिन्तडी जीरकञ्चैव तथा तारङ्ग पिप्पली ।
कदली-लवली धात्री फलानि गुडमैक्षवम् ॥
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥

—अगस्त्य संहिता

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अयं भावः—यो रसः सात्त्विकगुणप्रदो भवति स एव मंत्रसिद्धि-प्रदायको भवति। अत एव मन्त्रिणा माधुर्यरसः सेवनोयः। तेन मंत्राः शीघ्रं सिद्ध्यन्ति।

"मधुररसास्वादनं सात्विकगुणहेतुकम्" ——आ.सू. ३।७

हविष्यान्नमपि मात्रया भुञ्जीत। यथा——

सुस्निग्धो मधुराहारी चतुर्थांशविवर्जितः।
भुञ्जते स्वरसप्रीत्यै मिताहारी स उच्यते॥

—गो. सं. १।५५

आचाररसायनसेवनेन स एव मंत्रसिद्धिर्भवति। इत्यनुभवः।

सत्यवादिनमक्रोधं निवृत्तं मद्यमैथुनात्।
अहिंसकमनायासं प्रशान्तं प्रियवादिनम्॥
जपशौचपरं धीरं दाननित्यं तपस्विनम्।
समजागरणस्वप्नं नित्यं क्षीरघृताशिनम्॥
देशकालप्रमाणज्ञं युक्तिज्ञं अनहङ्कृतम्।
उपासितारं वृद्धानां आस्तिकानां जितात्मनाम्॥
गुणैरेतैः समुदितैः प्रयुङ्क्ते यो रसायनम्।
रसायनगुणान् सर्वान् यथोक्तान् सः समश्नुते॥

——अ. तं. चि. १

ये च हतात्मानः सन्ति तेषां मंत्रसिद्धि र्न भवति। के च हतात्मानः—अश्रद्धालुः-लोलुपः दीन-हीनभावापन्नाहङ्कारी-प्रभृतयः इति। ये च मन्यन्ते।

"नास्ति दत्तं न लोकोऽस्ति हिंसाविरतिचेतसा।
नामाभ्युदय हेतुत्वे तैरात्मा निहतः परम्॥
ये देवान्न चेच्छन्ति कृतघ्नाश्चिरजीविनः।
निष्फलत्वादतस्तत्र न वाच्यं स्याद्रसायनम्॥"

—जेज्जटः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुसंयुतः—जितेन्द्रियः ।

नग्नां परलतां पश्यन्नयुतं यस्तु साधकः ।
प्रजपेत् स भवेत्सद्यो विद्याया वल्लभःस्वयम् ॥५॥
तस्य दर्शनमात्रेण वादिनः कुण्ठतां गताः[१] ।
गद्यपद्यमयी वाणी तस्य वक्त्रात् प्रवर्तते[२] ॥६॥
तत्पदे[३] सुधियः सर्वे प्रणमन्ति मुदान्विताः ।
तस्य वाक्य[४] परिचयाज् जडा भवन्ति वाग्मिनः[५]॥७॥

नग्नामिति—अत्रापि जितेन्द्रियः सन् प्रजपेत् । यथा—

"नग्नां परस्त्रियं दृष्ट्वा प्रजपेत्स्थिरमानसः ।
तस्यालोकनमात्रेण वाग्मिनो निष्प्रभतां गताः ।
राजानोऽपि हि दासत्वं भजन्ते किं परे जनाः ॥
—वृ. नी, तं, ८।३१

अष्टनवमात्मकपद्ये ऽनुवृत्तिमात्रत्वात् न पठितौ । ८।९

प्रयोगान्तरम्—

धनकामस्तु यो विद्वान् महदैश्वर्यकामुकः ।
वृहस्पतिसमो यस्तु भवितुं कामयेन्नरः[६] ॥१०॥
अष्टोत्तरशतं जप्त्वा कुलभामंत्र्य मंत्रवित् ।
मैथुनं प्रयात्येव[७] स तु सर्वफलं लभेत् ॥११॥

धनमिति—स्पष्टम्—वृ. नी. तंत्रेऽपि पठितम्

प्रयोगान्तरम—

१. निष्प्रभां गता—क । २. प्रजायते—क । तनाम्ना—घ । ४. काव्य—घ । ५. जडो भवति वाल्मीकः—क । ६. कामयते स्वयम्—क । वृहस्पतिसमो भूत्वा कवित्वं कारयेत्तथा—ख । ७. प्रयत्नतः—ग घ । करोत्येव ।ख। प्रयात्येप ।क।

Digitization by Hindu-Heritage-Foundation-of America. HHFA(USA)

लतारतेषु जप्तव्यं महापातकमुक्तये ।
लता यदि न लभ्येत तदा मज्जां[1] प्रयत्नतः ।।
समुत्सार्य जपेन्मंत्री सर्वकार्यार्थसिद्धये ।।१२।।

लतारतेष्वित्यादि-स्पष्टम् । वृ. नी. तंत्रेऽपि पठितम् । विधिस्तु गुरुमुखात् ज्ञेयः ।

सदाचारमाहः—

तासां प्रहारं निन्दाञ्च कौटिल्यमप्रियता ।
सर्वथा नैव कर्त्तव्यमन्यथा सिद्धिरोधकृत् ।।१३।।
स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणम्[2] ।
स्त्रीसंगिना सदा भाव्यमन्यथा स्वस्त्रियमपि[3] ..१४।

तासामित्यादि=अयं भावः—हिन्दू-जीवन-दर्शने नारी भोग्या नास्ति अपितु पूज्या आदरणीया अस्ति । तत्र प्रमाणम्—

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता ।"

--मनु. ३।५६

तत्किमेतत्—एकतः—"स्त्रियो देवाः" "स्त्रिय समस्तास्तवदे-विभेदाः ।" तथा तत्रैव—"मैथुनं प्रत्यात्येव" "नग्नां परलता मित्यादि"

अस्मिन् शङ्कायाम् विचारणीयम्——

"यह केवल सेक्सुअल साइंस या "इरोटिक्स" नहीं है । कामकला अभिव्यक्ति के साथ इसका घनिष्ट सम्बन्ध है । पुरुष तथा प्रकृति अर्थात् नायक एवं नायिका किस प्रकार मिलित होने पर दोनों के अर्धाङ्ग यथावत् मिलकर पूर्णाङ्ग अखण्ड ब्रह्मरूप में प्रतिष्ठित हो सकते हैं । इसी का रहस्य इस कामकला-विलास में है । --भा. सं. सा. पृ. २१५

१. लता यदि न सङ्गच्छेत्तदा शुक्रम् । ख । लता यदि संसर्गस्तदा शुक्रम् । ग घ ।
२ धर्म सेवा।ख। ततो जप्यं सर्वं ।ग। स्त्रियो देव्यः स्त्रियः पूज्याः स्त्रियः एव हि भूषणम् ।ख। ३. स्वस्त्रिया अपि ।क।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत्र प्रमाणम्—"सस्त्रीको धर्ममाचरेत् ।" — मनु.

वस्तुतस्तु—

"सच कहा जाय तो प्राचीनकाल में कामशास्त्र भी ब्रह्मविज्ञान का का ही रूप रहा है । भा. सं. सा. पृ. २१५

तंत्रसाधनायां तत्प्रत्यक्षमुपलभ्यते ।

प्रयोगान्तरम्—

विपरीतरता सा तु भविता[1] हृदयोपरि ।
अष्टोत्तर शतं जप्त्वा नासाध्यं विद्यते क्वचित्[2] ॥१५॥
तद् हस्तावचितं पुष्पं तद् हस्तावचितं जलम् ।
तद् हस्तावचितं भोज्यं देवताभ्यो निवेदयेत् ॥१६॥

विपरीतरतेति—अष्टोत्तरशतमिति क्रमेण आलक्षं जपेद् । किन्तु सहस्रपरमिते प्रयोग दिवसे—वीर्यं न स्रवेत्, स्रवणात् सिद्धिहानिःस्यात् अर्थात् त्रिभिर्वर्षैर्यतात्मानो जपेत् । तत्र नियमः—

"मिताहारो यताहारो तन्मनस्कः समाहितः ।"

जप एष विपरीतरतौ भवेत् ।

महाचीनद्रुमलतावेष्टितः साधकोत्तमः ।
रात्रौ यदि जपेन्मंत्रं[3] सैव कल्पलता भवेत् ॥१७॥
महाचीनद्रुमलतावेष्टनेन च यत् फलम् ।
तस्यापि षोडशांशेन कलांनार्हन्ति ते शवाः ॥१८॥
शवासनाधिकफलं लतागेहप्रवेशनम् ॥१८½॥

महाचीनेति—महाचीनाचारं--महाचीनक्रमं वा वाममार्गीयसाधनपद्धतिविशेषः । येनाचिरादेव मंत्रसिद्धिर्भूत्वा शिवत्वं प्राप्यते ।

यथा—

---

१. विपरीतरता सक्ता भविता ।ख। विपरीतरता मत्ता भविता ।ग।
२. श्लोकार्द्धमेतत् केवलं ख पुस्तके दृश्यते । ३. मन्त्री ।घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"यत्कृत्वा साधकाः सर्वे शिवत्वं यान्ति तत्क्षणात् ।
"मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ॥"

—वृ. नी तं. ७

तन्महाचीनक्रमस्य सारात्सारतरं लिख्यते—

शृणु देवि परं ज्ञानं सर्वज्ञानोत्तमोत्तमम् ।
येन विज्ञानमात्रेण शीघ्रं विद्या प्रसीदति ॥
मूलकन्दे च या शक्तिर्जगदाधाररूपिणी ।
तदभ्रमावर्तवातो यः प्राण इत्युच्यते बुधैः ॥
झिल्लीशब्दा व्यक्ततरा कूजन्ती सततोत्थिता ।
गच्छन्ती ब्रह्मरन्ध्रेण प्रविशन्ती स्वकेतनम् ॥
यातायातक्रमेणैव तत्र कुर्यान् मनोलयम् ।
तेन मंत्रे शिखा जाता सर्वमंत्रप्रदीपिका ॥
तमःपूर्णे गृहे यद्वद् न किञ्चिदपि भासते ।
शिखाहीनास्तथा मंत्रा न सिद्धयन्ति कदाचन ॥

—वृ. नी. तं. ७।१७२-१७६

महाचीनक्रमे सदाचारमाह—

स्नानादि मानसं शौचं मानसः प्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं कल्पनादिकम् ॥
सर्व एव शुभः कालो नाशुभो वर्तते क्वचित् ।
न विशेषो दिवारात्रौ न संध्यायां महानिशि ॥
नात्र शुद्धयाद्यपेक्षास्ति न चामेध्यादि दूषणम् ।
य एवं चिन्तयेन् मंत्री सर्वकामफलप्रदम् ॥

—वृ. नी. तं. ७।१०४-१०६

महाचीनाचारपद्धत्या लतावेष्टनेन यत्फलं भवति, तस्य षोडशांशमपि शवाः=शवासनेन न जायते । अत एवोक्तम्—शवासनाधिकफलमिति । यदुक्तं—"महाचीनक्रमं देवि विविधं कथितं शिवे ।" अत एव—तेपु विविधप्रयोगेषु कतिपयानि कथ्यन्ते—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शवासनालयमागत्य मुक्तकेशो दिगम्बरः ॥१६॥
जपेदयुतसंख्यन्तु सर्वकामार्थसिद्धये १६॥½॥

प्रयोगान्तरम्–

महाचीनद्रुमलतामज्जाभिर्विल्वपत्रकम्[1] ॥२०॥
सहस्रं देवीमभ्यर्च्य श्मसाने साधकोत्तमः।
तदा राज्यमवाप्नोति[2] यदि सा न पलायते ॥२१॥

महाचीनेति–वृ. नी. तंत्रेऽपि ७।१४१ पठितः स्पष्टम्।

प्रयोगान्तरम्–

स्वगात्ररुधिरैश्चैव विल्वपत्रैः सहस्रशः।
श्मसानेऽभ्यर्च्य कालीन्तु[3] वागीशसमतांव्रजेत् ॥२२॥

स्वगात्रेति–वृ. नी. तंत्रेऽपि–७।१५० पठितः। स्पष्टम्।

अनादिकां तथा[4] दृष्ट्वा लक्षं जपति भूमिपः।
निर्मलाञ्च[5] तथा दृष्ट्वा वश्यार्थमयुतं जपेत् ॥२३॥

अनादिकामिति—अदृष्टपूर्व—रजोकीर्णभगाम्। निर्मलाम्-शुद्धाम्।

इति श्री कालीतन्त्रे कामनाविधिः प्रसादभाष्ये
चतुर्थ पटलः।
इति

---

१. पत्रकैः ।क। २. तदा तु राज्यभाप्नोति ।ग। ३. देवीञ्च ।ग। ४. मूलविद्यां लताम् ।ख। अनादितां तथा ।ग। अनुदितां यथा ।घ। ५. विमलाञ्च । ग घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पञ्चमः पटलः

भैरव उवाच—

अथातः सम्प्रवक्ष्यामि मन्त्रं कल्पद्रुमं परम् ।
येन जप्तेन विधिवत् सिद्ध्योऽष्टौ भवन्ति हि ॥१॥

अथेति--कल्पद्रुमसदृशं परं मंत्रं सम्प्रवक्ष्यामि । येन विधिवज्जप्तेन अष्टौ सिद्धयो भवन्ति । हि निश्चयेन । यथा--

यामाद्यां प्रकृतिं प्राहुः कालीं कालरूपिणीम् ।
तस्या मंत्रं महामंत्रं मंत्रसारमिमं प्रिये ॥

—वृ. नी. तं. १३।३

विधिवत्—युगप्रभावात् काल्यार्चने-वाममार्गीयविधिना एव सिद्धिर्भवति । मंत्रसाधनं द्विधा भवति--१. दक्षिणमार्गतः, २. वाममार्गतश्च । तत्र--

"पुरुषः दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते ।"

—नि. त.

योगिराज-अरविन्दमहाशयस्य शब्देषु--

"मूलतः तन्त्र एक बलवती योग पद्धति थी । इसके दक्षिण एवं वाम दोनों ही मार्ग एक बड़ी गम्भीर अनुभूति के फल थे । दक्षिण और वाम--इन दोनों शब्दों के जो प्राचीन लाक्षणिक अर्थ हैं—वे ये ही है कि एक है ज्ञान का मार्ग और दूसरा आनन्द का मार्ग है । मनुष्य में जो प्रकृति है उसका अपनी शक्तियों, अपने हृत्तत्वों और सम्भावनाओं के बल सञ्चय और प्रयोग में विवेक से चलना और इस प्रकार अपने आपको मुक्त करना ज्ञानमार्ग--दक्षिणमार्ग है । और उस प्रकृति का अपनी शक्तियों, अपने हृत्तत्वों तथा सम्भावनाओं के बल सञ्चय एवं प्रयोग में आनन्द की स्थिति बनाये रखना और इस प्रकार अपने आपको मुक्त करना आनन्द मार्ग--वाममार्ग है ।" —क.श. पृ. ३२ "तंत्र और वेदान्त"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संक्षेपतः--सात्त्विकगुणसम्पन्नेन दिव्याचारेण या ज्ञानप्राप्तिर्भवति स दक्षिणमार्गः। तमोगुणसम्पन्नेन पश्वाचारेण या ज्ञानप्राप्तिर्भवति स वाममार्गः। रजोवीर्य-आहार-विहारप्रभावात् अद्यतनीये वातावरणे सात्त्विकगुणसम्पन्नानां मानवानां पूर्णत अभावो दृश्यते। अतः वाममार्ग एव श्रेष्ठः। अनेनापि ज्ञानप्राप्तिर्भवति। यथा--

"महाकाल्या परं मंत्रं सर्वसारस्वतप्रदम्।"

—बृ. नी. तं. १३।१

विधिवत्--पश्वाचारेण वीर्ये स्थैर्यं सम्पाद्य, वीराचारेण—आरोहावरोहणं सम्पादयेत् ततश्च ऊर्ध्वरेतो भूत्वा दिव्याचारे स्थित्वा सिद्धिं लभेत। यद्यपि वीर्यं पञ्चभूतात्मकं तथापि पृथ्व्यांशं जलीयांशं जलीयांशस्याधिक्येन निम्नगामित्वेन शीघ्रमेव स्खलति। तथाहि शीतलं हि वीर्यं, सौम्यगुणत्वात्। आग्नेय गुणत्वाच्च अत्युष्णा हि योषित्योनिः। एतदपि शीघ्रस्खलने कारणम्। वीर्ये ऊर्ध्वगामित्वोत्पादनाय—

पृथ्वी तत्त्वस्य जले विलयनं कुर्यात्। अनेन काठिन्यं भार-राहित्यञ्च जायते। जलतत्त्वस्य तेजसि विलयनात्--तारल्यं नश्यते। तेजसो वायौ विलयनात् तेन वीर्ये विकाशीगुण मायाति। वायुं विजित्वा स्वेच्छो विहरेत्। अनेन मनसश्चाञ्चल्यं नश्यते। यतः—

"इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः।"
"चले वाते चलो विन्दुर्निश्चले निश्चलो भवेत्।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत्।"

—गो. सं.

वायुः केन निरुध्यते ? ध्यानेन। कथमित्याहः—

"ध्यानमेव हि जन्तूनां कारणं बन्धमोक्षयोः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मर्मस्थानानि नाडीनां संस्थानं व पृथक् पृथक् ॥
वायूनां स्थानकर्माणि विदित्वा ध्यानमाचरेत् ॥"

—व. सं. ४।१८–१९

"अशोधित वीर्य उतरकर वज्रमणि पर गिरता है। साधना-मार्ग के अकुशल योगी उसको धारण नहीं करते। किन्तु जिन्होंने गुरुपरम्परा द्वारा योग के रहस्य को प्राप्त किया है, वे देहवृक्ष के इस फल का भक्षण करते हैं।

—मा. सं. सा. भाग १ पृष्ठ २६४

वीर्यस्योर्ध्वीकरणविधिः—

"पृथ्वी जलतां याति जलं तेजोमयं भवेत्।
तेजो वायुं तथा वायुराकाशं तत्प्रकाशकम् ॥"

—बृ. नी. तं. ७।९७

एतच्च भूतशुद्धिविधिना साधयेत्। भूतशुद्धिर्नाम साधकस्य प्राकृतदेहस्थानां मांसमेदोऽस्थिभूयिष्ठानां भूतानां शुद्धिकरणम्। तत्प्रकारश्च प्राकृतानां तेषां स्वस्वकारणेषु लयचिन्तनपूर्वकंभगवति समर्पणम् कृत्वा पुनस्तत्सकाशात् भगवन्मायाप्राकृतभूताविर्भाव-पूर्वकं तदारब्धदेहावस्थितिभावनम्। इति प्रथमविधिः।

द्वितीयो विधिः—योनिमुद्रया विन्दुर्धार्यते। योनिमुद्राविधिस्तु—

"सिद्धासनं समासाद्य कर्ण-चक्षुर्नसोर्मुखम्।
अंगुष्ठ-तर्जनी-मध्यमानामिकाभिश्च साधयेत् ॥
प्राणं संकृष्य काकाभिरपाने योजयेत्ततः।
षट्चक्राणि क्रमाद् ध्यात्वा हुं हंस मनुनासुधीः ॥"

—घेरण्ड सं.

चलितोऽपि यथा विन्दुः सम्प्राप्तश्च हुताशनम्।
व्रजत्यूर्ध्वं गतः शक्त्या निरुद्धो योनिमुद्रया ॥

—यो. च. ५९

चलितोऽपि यदा विन्दुः सम्प्राप्तो योनिमण्डलम्।
व्रजत्यूर्ध्वं हृतः शक्त्या निबद्धो योनिमुद्रया ॥

—घे. सं. ३।४३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चलितोऽपि स्खलितो विन्दुर्यदा—यस्मिन् काले योनिमन्डलं सम्प्राप्तः सद्य एव योनिमुद्रया लिङ्गाकुञ्चनरूपया योनिमुद्रया शक्त्या-यथावलं निरुद्धः सन् ऊर्ध्वमेव व्रजति नाधः पतति । सुषुम्णा मार्गेण विन्दुस्थाने शिरसि गच्छति ।

अयं भावः—योनिमुद्रया सम्यगभ्यस्य पश्वाचारेण मंत्रजपं कुर्यात् । तस्मिन् काले दैवात् प्रचलितं वीर्यं धारयेदिति ।

तृतीयो विधिः—अश्विनीमुद्रया अपि वीर्यस्योर्ध्वीकरणं भवति ।

आकुञ्चयेद्गुद्वारं प्रकाशयेत्पुनः - पुनः ।
सा भवेदश्विनो मुद्रा शक्तिप्रबोधकारिणी ॥
अश्विनी परमा मुद्रा गुह्यरोगविनाशिनी ।
बलपुष्टिकरी चैव अकालमरणं हरेत् ॥

चतुर्थो विधिः—भस्त्रिका प्राणायामः—कुम्भकमित्यर्थः—

"स्तयोरथ भस्त्रेव लोहकारस्य वेगतः ।
रेचयेत्पूरयेद्वायुमाश्रमं देहगं धिया ॥
यथा श्रमो भवेद्दे्हे तथा सूर्येण पूरयेत् ।
कण्ठसङ्कोचनं कृत्वा पुनश्चन्द्रेण रेचयेत् ॥
वातपित्तश्लेष्महरं शरीराग्नि विवर्धनम् ।
कुण्डलीबोधकं वक्त्रदोषघ्नं शुभदं सुखम् ॥"

शुभदं वीर्यस्थिरीकरम् ।

सिद्ध विद्यायाः फलश्रुतिमाह—

यस्याः स्मरणमात्रेण वाचश्चित्रायते[1] नृणाम् ।
यज्ज्ञानादमरत्वञ्च[2] लभेन्मुक्ति चतुर्विधाम् ॥२॥

यस्येति--वाचश्चित्रायते-वाग्भिरिन्द्रियसिद्धिर्भवति । अर्थात् स्थिरवीर्येण सरस्वतीनाडी विकसति--तेन--वाग्मित्वं-पाण्डित्यं-कवित्वञ्च सम्पद्यते । शरीरसौन्दर्यं मेहनञ्चापि वर्धते ।

---

१. मुक्तिस्तु जायते ।क। २. यजना ।ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यस्ते स्तनः शशयुर्यो मयोभूर्यः सुम्नयुः सुध्वो य सुदत्रः ।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः ॥

—अथर्व. ७।११।१

अद्याग्ने अद्य सवितरद्य देवि सरस्वति ।
अद्यास्य ब्रह्मणस्पते धनुरिवा तानया पसः ॥

—अथर्व. ४।४।६

अमरत्वम्—अकालमृत्युहरणम् । "अमरधर्मः—सांसारिक दुःखा-संस्पृष्टः । प्राणशक्तिः—रोगनिरोधकशक्तिः जीवनीशक्तिः वर्धते ।

क्रन्दाय ते प्राणाय याश्च ते भव रोपयः ।
नमस्ते रुद्रः कृण्मः सहस्राक्षायामर्त्य ॥

—अथर्व. ७।२।३

मंत्रजाप्येन—प्राणशक्तिः शीघ्रं वर्धते ।

चतुर्विधामुक्तिः—पुरुषार्थ चतुष्टये साफल्यमिति ।

ये जपन्ति परां देवीं नियमेन तु संस्थिताः[१] ।
देवा सर्वे नमस्यंति किं पुनर्मानवादयः ॥३॥

ये इति—परां देवीम्—"परमात्मविद्या"—ब्रह्मयोगी ।

"अथ परा यया तदक्षरमधिगम्यते"

—मुण्डक. १।१।५

वृहस्पतिसमो वाग्मी धने धनपतिर्भवेत् ।
काम-तुल्यञ्च नारीणां रिपूणां अनलोपमः[२]॥४॥
तस्य पादाम्बुजद्वन्द्वं राज्ञा-किरीट-भूषणम्[३] ।
तस्य भूतिं विलोक्यैव कुबेरोऽपि तिरस्कृतः ॥५॥
य एनां पूजयेद्देवीं नियमे[४] पितृकानने ।
तस्य चाज्ञाकराः[५] सर्वे सिद्धयोष्टौ भवन्ति हि ॥६॥

१ नियमेन शवे स्थिताम् ।ख। यदा देवीं नियमेन नरस्थिताः ।ग। नियमेन नराः स्थिताः ।घ। २. शमनोपमः ।ख। रिपूणाञ्च यमोपमः ।ग–घ। ३. मुकुट भूषणम् ।ग। ४. य एनान्तु जपेद्देवीं नियमे ।ख। य एनां चिन्तयेद्देवीं नियतः ।ग। य एनां चिन्तयेन् मन्त्री नियतः ।घ। ५. तस्येवाज्ञकराः ।ग–घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तस्यैव जननी धन्या पिता तस्य सुरोपमः[१] ।
सम्प्रदायविदां वक्ता य एनां वेत्ति तावतः ॥७॥
अस्या विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ।
नन्दन्ति पितरः सर्वे गाथां गायन्ति ते मुदा[२] ॥८॥
अपि नः स्वकुले कश्चित् कुलज्ञानी भविष्यति ।
स धन्यः स च विज्ञानी स कविः स च पण्डितः॥९॥
स कुलीनः स सुकृती स वशी स च साधकः[३] ।
स ब्राह्मणः स वेदज्ञःसोऽग्निहोत्री स दीक्षितः॥१०॥
स तीर्थसेवी पीठानां स निवासी स सर्वदः ।
[स सोमपायी स वृती स यज्वा स च साधकः[४]॥११॥
स संन्यासी च योगी च स मुक्तः स च ब्रह्मवित्[५]।]
स वैष्णव स शैवश्च स सौरः स च गाणपः ॥१२॥
स च विज्ञानवेत्ता च य एनां वेत्ति तत्त्वतः ।
तस्मात्सर्वप्रयत्नेन सर्वावस्थासु सर्वथा ॥१३॥
एनां ज्ञात्वा यजेन्मंत्री[६] सुखमोक्षफलप्रदाम्॥१३½॥

मन्त्रान्तरमाह—

[नमः पाशांकुशे द्वेधा फट् स्वाहा कालि कालिके ॥१४॥
दीर्घतनुच्छदः कालीमनुः पञ्चदशाक्षरः ।
अनया सदृशी विद्या त्रैलोक्ये नापि विद्यते[७] ॥१५॥]

प्रसाद भाष्यम्—नमः इति-नमः स्वरूपम् । पाशांकुशे द्वेधा, पाशः=आं, अंकुश=क्रों—"अंकुशाभिधः"—भूतडामरः । इत्येतौ द्वेधा, फट् स्वाहा

---

१. पिता तस्य शिवोपमः ।घ। । २. सर्वदा ।ख। ३. सर्वदीक्षितः ।ख। स च भूमिपः ।घ।४. स व्रती सोमपायी स च दीक्षितः ।ख। ५. क पुस्तके बन्धनीस्थश्लोकार्द्ध-द्वयस्थले "स मोमपायी सन्यासी स भोगी स च ब्रह्मवित्" इति। श्लोकार्द्ध-मेतत् । ६. जपेन्मंत्री ।क। ७ महालयाम् ।ख। महाफलाम् ।ख। ८. वन्धनीस्थः सार्द्ध श्लोकः केवलं ।ग। पुस्तके विद्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काली कालिके स्वरूपम् । दीर्घतनुच्छदः—हूं । एतेन—नमः आं आं क्रों क्रों फट् स्वाहा कालि कालिके हूं" इति पञ्चदशाक्षरः काली-मनुः आयातः ।

मन्त्रान्तरमाह—

विद्यारत्नं प्रवक्ष्यामि श्रुत्वा कर्णावतंसगात्[1] ।
मायाद्वयं कूर्च-युग्म-मैद्रान्तं मादनत्रयम्[2] ॥१६॥
माया विन्द्वीश्वरयुतं दक्षिणे कालिके पदम् ।
संहारक्रमयोगेन वीजसप्तकमुद्धरेत् ॥१७॥
एकविंशत्यक्षराढ्यस्ताराद्यः[3] कालिकामनुः ।
पूर्वोक्तमंत्रवत् कुर्यात् पूजां सर्वां विचक्षणः ॥१८॥

इति श्रीकालीतंत्रे सिद्धविद्याविधिः पञ्चमः पटलः ।

विद्यारत्नमिति—विद्यारत्नम्=विद्यासु रत्नमिव इति विद्यारत्नम् । किं नाम विद्या ? विद्यतेऽसौ इति विद्या । विद्+संज्ञायां समजनि ।

"विद्या वै धिषणा" —तै. ६।२।२।२
"निषद निपतेति" —३।३।६६ इति क्यप्

विद्या=दुर्गा इति शब्दरत्नावली । ज्ञानम्=मोक्षे धीः—जटाधरः । "परमोत्तमपुरुषार्थसाधनीभूता-विद्या—ब्रह्मज्ञानरूपा, इति नागोजीभट्टः । "विद्या=मंत्रः" इति यथा—

"अष्टाक्षरी समाख्याता विद्या महिषमर्दिनी"—विश्वसारे । मायाद्वयम्—ह्रीं ह्रीं । कूर्चयुग्मं—हूं हूं । ऐन्द्रान्तम्—इन्द्रस्य लकारस्य समीपं ऐन्द्रं रेफः तत् अन्ते यस्य तादृक्,; माया ईकारः विन्दुः, ईश्वरो नादः एतैयतं; मादनः ककारः तस्य त्रयं तेन क्रीं क्रीं इत्यायाताम् । दक्षिणे कालिके इति स्वरूपम् । तत्पश्चात् संहार-

१. श्रोतुः कर्णावतंसकम् ।ख। २. मदनत्रयम् ।ख। ३. द्वयः प्रोक्तोऽयम् ।ग घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

क्रमयोगेन-विलोमेन उद्धरेत् । ताराद्यः तारः प्रणवः आद्यो यस्य तादृशः इत्येकविंशत्यक्षराढ्यः कालिकामनुर्भवेत् । यथा—ॐ ह्लीं ह्लीं हूं हूं क्रीं क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्लीं ह्लीं" इति ।

"महाशक्तिः द्वयं देवि शब्दबीजद्वयं ततः ।
निजबीजत्रयं चैव दक्षिणे कालिके पदम् ।।
संहारक्रमयोगेन पूर्वबीजानि चोच्चरेत् ।
वर्तुलाद्यं महामंत्रं वह्नि प्रियान्तकं शिवे ।।
त्रयोविंशत्याक्षरात्मा मनुः परमशोभनः ।
अनेन मन्त्रराजेन शिवोऽहम् नात्र संशयः ।।

—बृ. नी. तं. १३ ८-१०

अत्र—विचारणीयम्--यत्—"विद्यारत्नं प्रवक्ष्यामि" इत्युक्त्वा—"एक विंशत्यक्षराढ्यस्ताराद्यः कालिकामनुः ।"—इति उक्त-वान् तन्न संगच्छते । यतः "स्वाहान्ता स्त्री देवता मंत्रा "विद्या" शब्देन परिभाष्यन्ते । मंत्रोऽयं स्वाहान्तो न, उपदिष्टः तत्कथम् विद्यारत्नम् ? इत्याह—"परमोत्तमपुरुषार्थसाधनीभूता-विद्या--ब्रह्मज्ञानरूपा "विद्या" ब्रह्मज्ञानोपायत्वेनेयं "विद्या" तथा च श्रेयोविषया हि विद्या"—ब्रह्मयोगी ।

"यामाहुराद्यां प्रकृतिं वराङ्गनां,
प्रमातुराद्यां सकलां तुरीयाम् ।
परापराम्बां वरदां वरेण्यां,
वीरेश्वरीं साधकसिद्धिदात्रीम् ।।"

—बृ. नी. तं. १३-२

विनियोगस्तु—"भैरवोऽस्य ऋषिः प्रोक्तः" प्रथमपटले उपदिष्टः ।

ध्यानम्—

मेघाङ्गीं विगताम्बरां शवशिवारूढां त्रिनेत्रां परां ।
कर्णालम्बितबालयुग्म शुभदां मुण्डस्रजां मालिनीम् ।।
वामेऽधोर्ध्वकराम्बुजे नरशिरः खड्गं च सव्येतरे ।
दानाभीतिविमुक्तकेशनिचयां वन्दे महासुन्दरीम् ।।

—बृ. नी. तं. १३।१३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गायत्रीमाहः—

"गायत्रीं शृणु चार्वङ्गि जपात् सार्वज्ञदायिकम् ।
कालिकायै पदं चोक्त्वा विद्महे पदमन्तरम् ॥
श्मशानान्ते च वासिन्यै धीमहीति पदं ततः ।
तन्नो घोरा च देवेशि प्रचोदयादनन्तरम् ॥ इति

—बृ. नी. तं. १३।१४–१५

पुरश्चरण-विधिमाहः—

जपेद् विंशतिसाहस्रं पुरश्चरणसिद्धये ।
होमयेत् तद्दशांशेन तद्दशांशेन तर्पयेत् ॥
तद्दशांशेनाभिषेकञ्च भोजयेद् ब्राह्मणांस्ततः ।
तदन्ते महतीं पूजां कृत्वा सर्वं समाचरेत् ॥
ततो विसर्जयेद्देवि घटं चैव जले क्षिपेत् । इति

—बृ. नी. तं. १३।१७–१८

यद्यप्यत्र—

नात्र चित्तादि शुद्धिः स्यात् न चामित्रदूषणम् ।
न कालनियमस्तत्र महामन्त्रस्य साधने ॥
न वारं न च नक्षत्रं न च तिथ्यादिदूषणम् ।
गुरुचिन्ता न चैवात्र महाकाल्याश्च साधने ॥

इति बृ. नीलतन्त्रे पठितः । तथापि विना गुरुं सिद्धिहानि स्यादिति ।

—अनुभवः ।

इति श्रीकालीतन्त्रे प्रसाद भाष्ये पञ्चमः पटलः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

षष्ठः पटलः

भैरव उवाच--

श्रृणु देवि वरारोहे वीरसाधनमुत्तमम् ।
नृणां शीघ्रफलावाप्त्यै प्रकारान्तरमुच्यते ॥१॥

श्रृण्-इत्यादि-सद्यः फलप्रदाः प्रयोगा अस्मिन् पटले उपदिष्टाः ।

तत्रादौ—चतुष्पथसाधनामाह--

चतुष्पथे चतुर्दिक्षु पुरुषं हृदयं खनेत् ।
जीवितब्रह्मरन्ध्रे वै दीपा न् प्रज्वालयेत् सुधीः[1] ॥२॥
मध्ये च खनेदेकं तत्र मृद्वासनं[2] भवेत् ।
पूर्वोक्तेन च मार्गेण तत्र संस्कारमाचरेत्[3] ॥३॥
महाकालादिदेवेभ्यो बलिं पूर्ववदाहरेत् ।
कल्पोक्तपूजां सम्पूज्य जपेत्प्रयतमानसः[4] ॥४॥
दन्ताक्षमालया चैव राजदन्तेन मेरुणा ।
दिग्वासा प्रजपेन्मंत्रमयुतं सर्वदैवतम् ॥५॥
जपान्ते च बलिं दत्त्वा दक्षिणां विभवावधि ।
सर्वसिद्धीश्वरो विद्वान् सर्वदेव नमस्कृतः ॥६॥

चतुष्पथे इत्यादि स्पष्टम्—

द्वितीय प्रकार मुच्यते—

अथवा विजनेऽरण्ये स्थिरयोगासनो नरः[5] ।
उदयास्तं दिवा जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥७॥

---

१. लयेदिति क-ग। लयेद्विति ।ख। २. मूर्धासनं भवेत् ।ख। तत्र शुद्धासनं भवेत् ।ग घ। ३. मारभेत् ।घ। ४. जपेन्नियतमानसः ।घ। ५. स्थिरशय्यासनो ।क। अस्थिशय्यासनो ।ग-घ ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विल्ववृक्षे निजकोडे शवमारोप्य यत्नतः ।
नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया नराः ॥८॥
सहस्रं तत्र जप्त्वा वै सर्वसिद्धीश्वरो भवेत् ।
वटमूले शवं नीत्वा तत्र देवीं प्रपूजयेत् ॥९॥

विल्ववृक्षेत्यादि स्पष्टम् ।

स्थित्वा[1] तत्र मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
करकाञ्चीं समादाय मुण्डमालाविभूषितः ॥१०॥
तेनैव तिलकं कृत्वा[2] तत्तद्भस्मविभूषितः ।
श्मसाने च सकृज्जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥११॥
कुङ्कुमागुरुकस्तूरी रोचनागुरु चन्दनम् ।
कर्पूरं पद्मरागञ्च केशरं हरिचन्दनम् ॥१२॥
एकत्रं साधितं कृत्वा प्रत्येकं साधयेत्ततः[4] ।
एतत्तिलकमात्रेण राजानं वशमानयेत्[5] ॥१३॥

विल्ववृक्षे इत्यादि—शवसाधनं तिलकसाधनमुपदिश्य तद्द्वारा लोकवशीकरणमुपदिष्टम् । नृसिंहमुद्रा—

> मुखं च विवृतं कुर्यात् लेलिहानश्च जिह्विकाम् ।
> एषा मुद्रा नारसिंही प्रधानेति प्रकीर्तिता ॥
>
> —प्र. सा. सा. सं.

चतुर्थं प्रकारमुच्यते—

जिह्वाग्रे रुधिरं कृत्वा आकाशे च समाहरेत् ।
तेनैव गुटिकां[6] कृत्वा भद्रकालीं[7] ततो जपेत् ॥१४॥
नीलां नीलपताकाञ्च ललज्जिह्वां करालिकाम्[8]
ललाटे तिलकं कृत्वा साधको वीतभीः स्वयम् ॥१५॥

---

१. सुप्त्वा ।ग। २. जिह्वाग्रे कृत्वा ।क। ३. श्लोकार्द्धमेतत् केवलं ।ग। पुस्तके विद्यते। ४. साधयेत्सुधीः ।ख-घ। ५. श्लोकार्द्धमेतत् केवलं ।ग। पुस्तके विद्यते । ६. वटिकाम् ।ग-घ। ७. तत्र कालीमनुं जपेत् ।घ। ८. करालिनीम् ।क।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

महाष्टमीनवम्योस्तु संयोगे पुरुतः स्थितः ।
छागमहिषमेषाणां चतुर्दिक्षु शरान् क्षिपेत् ॥१६॥
कबन्धात्[1] मुण्डपुंजञ्च दीपादिभिरलंकृतम्[2] ।
मध्ये कबन्धमास्तीर्य तत्र गन्धर्वरूपधृक् ॥१७॥
ताम्बूलपूररक्तास्यमंजनांचितलोचनम् ।
कृत्वा कालीमनुं जप्त्वा[3] सर्वसिद्धीश्वरो भवेत् ॥१८॥

जिह्वाग्रे इत्यादि--कालीमनुम्--अस्मिन् तंत्रे---उपदिष्टानां उपदिष्टानां मंत्राणां कश्चिदेकम् । शेषं स्पष्टम् ।

पञ्चमं प्रकारमुच्यते—

वियद्रवियुतंदेवि नेत्रान्तं चन्द्रभूषितम् ।
वीजं प्रत्येकद्रव्याणां मिलितनाञ्च पार्वती ॥१९॥
मूलमंत्रेण मंत्रं यो[4] जपेत् साष्टशतत्रयम्[5] ।
जिह्वाग्रे रुधिरं गृह्ण चामुण्डे घोरनिःस्वने ॥२०॥
वलिं गृह्ण वरं देहि रुधिरं गगनेऽमले ।
कालि कालि प्रचण्डोग्रे ततोऽस्त्रं[6] कवचं ततः ॥२१॥
कलिकेयं समाख्याता वीराणां हितकाम्यया ।
कूर्चयुग्मं महादेवि नीलायाः कथितं तव ॥२२॥
वियद्भृगुयुतं देवि कलमिश्रं रवी रतिः ।
चन्द्रखण्डसमायुक्तं ततो नीलपदं ततः ॥२३॥
पताके हूं फडन्ते[7] स्यात् पूर्वकूट मनुर्मतः[8] ।
सुगुप्तेयं महाविद्या तत्र स्नेहादिहोदिता[9] ॥२४॥

---

१. कबन्धमुण्डपुञ्जञ्व ।ख। कबन्धान् मुण्डपुञ्जादीन् ।ग-घ। २. कृतः ।क। कृतान् ।ग-घ। ३. तत्र मनुम् ।ग-घ । ४. मन्त्रज्ञो ।ख-ग-घ। ५. सार्द्धशतद्वयम् ।ख-ग। सार्द्धशतत्रयम् ।घ। ६. ततः फट् ।ग। ७. हूं फडन्तम् ।क। ८. पूर्वकूर्चं ।ग-घ। ९. न्मयेदिता ।ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जयश्रीकरणी[1] देवी पताकेव रणस्थले ।
तेन नीलपताकेयं[2] विद्या वै वीरसाधनी[3] ।।२५।।
उग्रचण्डा महाविद्या या पुरा कथिता प्रिये ।
ललज्जिह्‌वा तु सा प्रोक्ता योज्या वै वीरसाधने[4]।२६
या[5] ऽसौ विद्या महातारा सा करालेति कीर्तिता ।
भूमिपुत्रसमायुक्ता यामावस्था शुभोदया[5] ।।२७।।

वियत्यादि—अत्र—भद्रकाली-नीला-नीलपताका-ललज्जिह्वा-करालिकाचेति महादेवीनाम् मंत्रोद्धारः कृतः । शेष स्पष्टम् ।

षष्ठः प्रकारमुच्यते—

भूमिपुत्रसमायुक्ता अमावस्या शुभप्रदा[6] ।
भाद्रे पुष्पकरयोगेन[7] तस्यां वीरवरोत्तमः ।।
विष्णुक्रान्तां समानीय निक्षिपेन्मृतभूमिषु ।।२८।।
तत्र तां साधितां कृत्वा तद्दिने मृत हट्टके[8] ।
तत्र तां साधितां मत्स्यत्वक् स्नेहेन दापयेत् ।।२९।।
तज्जलेनाभिषेकञ्च पूर्ववच्च शवोपरि[9] ।
साधितां विजयां तस्य उदरे मुखवर्त्मना ।।३०।।
क्षिप्त्वा तत्र खनेन् मत्स्य मज्जानांचितलोचनः ।
पूर्वद्रव्येण तिलकमुत्थाय[10] च मनुं जपेत् ।।३१।।
स्वयं[11] वै तत्र भगवान् भैरवो लगुडान्वितः ।
गतभीतिस्ततो वीरस्तं विलोक्य जपेन्मनुम् ।।३२।।

---

१. कारिणी ।क। २. पातकेयं ।क। ३. योज्या वै नीलसाधने ।ख-ग-घ। ४. नीलसाधने ।ग-घ। ललज्जिह्‌वा मयोक्ता वै संयोज्या नीलसाधने ।ख। ५. आदिविद्या ।ख। मा सा विद्या ।ग-घ। ६. शुभप्रदा । ७. शुभोदया ।क। ८. पुभृक्षयोगेत :ग। पुष्पर्क्षयोगेन ।घ। ९ मत्स्यहट्टके :क-घ। मृतपूतक १०. तत्र प्रसारिवम् ।ख घ। ११ शवोपरि ख-ग-घ। १२. तिलकं पूर्वद्रव्येण उत्थाय च ।ख-ग। तिलकी सर्वद्रव्येण उत्थाय च । स्वयमायाति ।ख।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यदि भाग्यवशाद्देवि लगुडस्तत्र लभ्यते ।
तदा स्वयं भैरवोऽसौ स्वयं वीरेश्वरो भवेत् ॥३३॥

प्रसादभाष्यम्--भूमिपुत्रेत्यादि--"भूमिपुत्रम्--भौमवासरं मङ्गल-वासरमित्यर्थः । "अमाभौमसमायुक्ता" इति । अत्र लगुडसाधन-मुपदिष्टम् ।

सप्तमं प्रकारमुच्यते---

मत्स्यमानीय देवेशि निक्षिपेत् पितृकानने ।
तत्रासकृज्जपित्वा तु देवतामेलनं भवेत्[1] ॥३४॥
तत्र नत्वा महादेवं महादेवीञ्च भाविनि[2] ।
तद् भस्मतिलकं कृत्वा स्वयं वीरेश्वरी भवेत् ॥३५॥

मत्स्यमानीयेत्यादि--स्पष्टम्---

अष्टमं प्रकारमुच्यते---

निशायां मृतहट्टे च उन्मत्तानन्दभैरवः ।
दिग्वासा विमली भस्मभूषणो मुक्तकेशकः ॥३६॥
कपाली खड्गहस्तश्च जपेन्मातृकया यदि ।
तदा तस्य महादेवि सर्वसिद्धिः करे स्थिताः[3] ॥३७॥

निशायामित्यादि स्पष्टम् ।

नवमं प्रकारमुच्यते---

डाकिनीं योगिनीं वापि अन्यं वा भूतलांगनाम् ।
तत्राप्यानीय[4] सम्पूज्य सर्वसिद्धीश्वरो भवेत् ॥३८॥

डाकिनीमित्यादि--स्पष्टम् ।

---

१. तत्र सकृज्जपित्वा तु देवतामिव लङ्घयेत् ।ग। २. भामिनि ।घ। ३. प्रजायते ।ग। ४. तत चानीय ।घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वीरसाधने सदाचरमाह---

सर्वेषां जीवहीनानां जन्तूनां वीरसाधने[1] ।
ब्राह्मणं गोमयं त्यक्त्वा[2] साधयेद्वीरसाधनम् ॥३९॥
मृतासनं विना देवि पूजयेत् पार्वतीं शिवाम् ।
तावत्कालं वसेद् घोरे यावदाहूतसंप्लवम् ॥४०॥
महाशवाः प्रशस्ताः स्युः प्रधानवीर साधने[3] ।
क्षुद्राः प्रयोगकर्तॄणां प्रशस्ताः सर्वसिद्धिदाः ॥४१॥
एवं वीरक्रमं[4] देवि कथितञ्च तनानघे ।
न कस्यचित् प्रवक्तव्यं[5] मम प्रीत्या[6] महेश्वरि ॥४२॥

प्रसादभाष्य--वीरा उपासका अशुद्धमिश्रशुद्धभेदेन त्रयः । वीरेन्द्राः--प्रकाशांशभूत वामा ज्येष्ठा रौद्रचभिन्ना ब्रह्मविष्णुरुद्रा-स्त्रयः । "त्रितयभोक्तावीरेशः" इति शिवसूत्रे, जागरादि धामत्रयेऽप्य प्रच्युत-स्वात्मानुसन्धानो वीरेशः"--इति तंत्रराजेऽप्ययमेवार्थ उक्तः । तेन--तादृश वासनादार्ढ्यशीला वीरेन्द्राः । तादृश वासनाशैथिल्य-त्तारतम्येन त्रिविधा वीरा उच्यन्त इत्युक्तं भवति," --योगानन्दनाथः

क्रियात्मकविधिस्तु परिशिष्टे प्रपञ्चयिष्ये ।

इति श्रीकालीतन्त्रे वीरसाधने षष्ठः पटलः[7] ।
प्रसादभाष्ये षष्ठः पटलः

---

१. नीलसाधने ।ग-घ। २. गोमये कृत्वा ।ग। ३. कालिका वीर ।ग-घ। ४. नील-क्रमं ।ख-ग-घ। ५. प्रयोक्तव्यम् ।क। ६. तव प्रीत्या ।ग। ७. इति वीरसाधनः सपर्या पटलः ।ख। इति श्रीकालीतन्त्रे वीरसाधने षष्ठः पटलः ।ग। इति श्रीकालीतन्त्रे वीरसाधनविधौ मुप्र षष्ठः पटलः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सप्तमः पटलः

देव्युवाच---

ज्ञातमेतन्मया[1] देव ! त्वत्प्रसादान्महेश्वर[2] !
अशक्तानान्तु मे देव ! पुरश्चरणमुच्यताम् ।।
सिद्धयन्ते च यथा मंत्रा लभंते सिद्धिमुत्तमाम्[3]।।१।।

ततः "सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा" एतद्वचनानुसारेण पुरश्चरणमावश्यकं वर्तते । किन्तु ये साधकाः–"जप-होममित्यात्मकस्य पञ्चाङ्गस्वरूपाख्यस्य पुरश्चरणस्य करणेऽशक्ताः, तेषां कृते, भैरवं प्रति देव्या निवेदनम्--ज्ञानमेतदिति--

अस्मिन् पटले–एकादश संक्षिप्तपुरश्चरणविधयः प्रकाशिताः । ते सर्व एव क्रियाकुशलैरनुभूताः । अकृते पुरश्चरणे सिद्धिर्न जायते । यथा–

"अकृत्वा च पुरश्चर्यां मंत्रं जपति नित्यशः ।
कल्पकोटिशतेनापि तस्य सिद्धिर्न जायते ।।

—बृ. नी. तं.

किं नाम पुरश्चरणं ?

साध्यं पुरतः कृत्वा, यत्–चरणम् पूजनादिकं क्रियते, तत्–पुरश्चरणम् । यथा–"पुरः" "चरणम्" चेत्येतौ शब्दावपि पश्यत । अथैतं विष्णुयज्ञम् । एतैर्यजुभिः पुर इवैव विभ्रति तस्मात् पुरश्चरणं नाम । –श. ४।६।७।४ यथा च–"तद्वाऽतदेव पुरश्चरणम्–य एष-सूर्यः तपति ।" श. ४।६।७।२१

---

१. ज्ञातमेतन्महादेव ।क–ग। २. श्लोकार्धमेतत् ।ख। पुस्तके नास्ति । ३. श्लोकार्धमेतत् केवलं–न पुस्तके विद्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत्र जिज्ञासा भवति–साध्याः–देवाः, साधकस्य सम्मुखेऽऽगत्य पूजादिकं स्वीकुर्वन्ति न वा ? अवश्यमेव गृह्यन्ते । तत्र प्रमाणम्–

"ब्रह्मचारिणं पितरो देवजनाः,
पृथग् देवा अनुसंयन्ति सर्वे ।
गन्धर्वा एनमन्वायन् त्रयस्त्रिशत् त्रिशताः ।
षट्सहस्राः सर्वान्त्स देवांस्तपसा पिपर्ति ॥"

—अथर्व. ११।७।२

ब्रह्मचारिणम्–ब्रह्मचर्यमाचरन्तं पुरुषं पितरः–पितृगणाः, देवजनाः, देवगणाः अन्ये च सर्वे देवाः=इन्द्रादयः पृथग् अनुसयन्ति= तस्य रक्षणार्थं पृथक् पृथक् तम् अनुगच्छन्ति, इत्यर्थः ।" —सायणः

सर्वमेतत्–ब्रह्मचर्येणैव भवितुमर्हति । वीर्यस्योर्ध्वीकरणेनैव सम्पद्यते । यथा–"ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" --पा. यो. २।३८

किं नाम वीर्यम् ?

"मन्त्रप्रभावजनितसामर्थ्यम् शरीरबलम्" —सायणः

किं नाम ब्रह्मचर्यम् ?

"देहवीजत्वनिरोध एव ब्रह्मचर्यत्वम् ।" न तु अष्टाङ्गमैथुन-निवृत्तिरेव ब्रह्मचर्यम्–तत्तु नपुंसकेऽपि भवति । न च आहार-विहारमात्रमेव ब्रह्मचर्यम्–तत्तु रुग्णावस्थायामपि भवति । अथाशक्तेऽपि भवति । अर्थात्–"आहार-विहारनिग्रहः", "इन्द्रिय-निग्रहः", अष्टाङ्गमैथुननिवृत्तिमात्रमेव ब्रह्मचर्यं न भवति । अपितु–मानवीयदेहे यत्–स्वाभाविकवृत्त्या देहवीजत्वं वर्तते, तस्य देहवीजस्य–धृतिसंकल्पशक्त्या-निरोध एव ब्रह्मचर्यत्वम् । "यस्य लाभात् अप्रतिघातान् गुणान्–अणिमाप्रभृतिसिद्धान्-उत्कर्षयति । सिद्धश्च विनयेषु शिष्येषु ज्ञानमाधातुं समर्थो भवति ।" इति व्यासभाष्ये । तस्योपरि–

"अब्रह्मचर्य से शरीर के स्नायु आदि सबकी सारहानि होती है । वृक्षादि भी फलित होने के पश्चात् निस्तेज हो जाते हैं, यह देखा जाता है । ब्रह्मचर्य द्वारा सारहानि रुद्ध हो जाने के कारण वीर्यलाभ होता है । उससे

Digitization by Hindu-Heritage Foundation of America. HHFA(USA)

क्रमशः अप्रतिघगुण का उपचय होता है। अणिमादि सिद्धियाँ प्राप्त हो जाती हैं और ज्ञानादि लाभ में सिद्ध होकर उस ज्ञान को शिष्य के हृदय में आहित-आरोपित करने की सामर्थ्य होती है। अब्रह्मचारी का ज्ञानोपदेश शिष्य के हृदय में आहित नहीं होता, जैसे दुर्बल धानुष्क द्वारा प्रक्षिप्त शर से केवल चर्ममात्र ही विद्ध करता हैं। —श्रीहरिहरानन्द

इस प्रकार का ब्रह्मचर्यलाभ ही वाममार्ग का लक्ष्य है। उसके साधन अमैथुन हों या मैथुन। प्रयोजन मनोनिग्रह द्वारा वीर्यलाभ से है अर्थात् वाममार्ग में वीर्यलाभ का महत्त्व है--साधन का महत्त्व नहीं। अपितु जो नारीमैथुन, पतन-अब्रह्मचर्य के कारण हैं उन्हीं के द्वारा पुरुषार्थ की सिद्धि, इस मार्ग की विशेषता है। "सस्त्री को धर्ममाचरेत्" का यही अर्थ है।

एतादृशं ब्रह्मचर्यं मैथुनेन कथं सम्पद्यते। या मैथुनक्रिया– अब्रह्मचर्यस्य कारणम्, वीर्यनाशस्य कारणम्, तया कथं ब्रह्मचर्यं सिद्धयति। तस्य सिद्धान्तपक्षः–"यदि दो भिन्न धातुओं के तारों को जोड़कर एक पूर्ण परिपथ बनाया जाय और धातुओं के एक संगम को उष्ण तथा दूसरे को शीत रखा जाय तो परिपथ में विद्युत्धारा प्रवाहित होने लगती है। इसका सूत्र–"Iron To Cooper Through Cold junction" है। अर्थात्–कम तापवाले संगम तथा अधिक तापवाले संगम के युग्म बनाने से विद्युत्धारा प्रवाहित होने लगती है। दो विभिन्न धातुओं के बने इस प्रकार के युग्म को तापवैद्युत्युग्म [Thermo Couple] कहते हैं। तापवैद्युत्-युग्म में संगमों के तापान्तर के कारण प्रवाहित होने वाली विद्युत्-धारा को तापवैद्युत्धारा [Thermo Electric Current] कहते हैं तथा परिपथ में उपस्थित विद्युत्वाहकबल तापविद्युत्वाहकबल [Thermo e. m. f.] कहलाता है।" —सीबैक प्रभाव [भौतिकी]

प्रकृतप्रकरणे---अग्निः-प्रकृतिः, सोमः-पुरुषः=युग्मम् जायते शीतोष्णयुग्मसंगमेन वैद्युतयुग्मधारा प्रवाहिता भवति।

प्रजापतिः–तान् (देवान्) व्यधत्त।
यत् व्यधत्त, तस्मात् विद्युत्। —तै. ३।१०।६१

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत् विद्युदुष्मणा वीर्यस्य जलीयांशं विशुष्यते। ततश्च–क्रमेण--प्रकाशस्वरूपे परिणतो भूत्वाऽवतिष्ठते। तत्रायं क्रमः–

पृथिवी जलतां याति जलं तेजोमयं भवेत्।
तेजो वायु तथा वायुराकाशं तत्प्रकाशकम्॥"

—वृ. नी. तं ७।६७

अर्थात्–शीतोष्णसंघर्षजन्योष्मणा वीर्यस्य पृथ्व्यंशो जले, जलं तेजसि, तेजः–वायौ, वायुराकाशे, परिणत्य प्रकाशस्वरूपो-जायते। पशुसाधनायाः परिणामोपि ब्रह्मचर्यं भवति। इति पिण्डार्थः

भैरव उवाच[1]—–

श्मसाने च पुरश्चर्या कथिता भुवि[2] दुर्लभा॥२॥

श्मसानेति—--श्मसाने श्मसानपीठे। तत्र कृता पुरश्चर्या क्षिप्रमेव फलवती भवति। यतः सिद्धपीठे कृता साधना शीघ्रं सिध्यति। यथा—-

"साधनाल्लभते सिद्धिं सिद्धक्षेत्रेष्वदीर्घतः।"

—वृ. नी. तं. ५।२१३

इति वचनात्। श्मसानम्---पितृकाननम्। तत्रत्याः सूक्ष्मशरीराः--प्रेताः अदृश्याः प्रविचरन्ति। तेषां मध्ये केचिदात्मानः शुभोदया अपि भवन्ति। ते साधनायां सहायतां दत्वा, साधकं पोषयन्ति रक्षन्ति च। एतेन तेषामपि कल्याणं जायते। अत एव श्मसानं "सिद्धिक्षेत्रमिति" कथ्यते।

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते।
त्वं तान् वेत्थ यदि ते जातवेदः स्वधया यज्ञं स्वधितिं जुषन्ताम्॥

—अथर्व. १८।२।३५

दिव्याचारेतु--श्मसानं नामः सुषुम्णा नाडी--इति कथ्यते। तस्मिन् मंत्रजपात् शीघ्रमेवावश्यञ्च सिद्धिर्भवति। यथा--

१. भगवानुवाच।ख। २. देवि।ग–घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कण्डदेशे स्थिता मन्त्राः केवला वर्णरूपिणः।
सौसुम्णाध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवन्ति हि ॥
—वृ. नी. तं. ४।५

सुषुम्णायां मंत्रजप, सिद्धिश्च--गुरुकृपयैव जायते। अत-एवोक्तम्--कथिता भुवि दुर्लभा। तमोगुणी साधनायामपि—रौद्र-भयानक-वीभत्सादयः सर्वे भावा श्मसानसाधनां दुर्लभां कुर्वन्ति। भयात्तत्र साधकाः पदनिक्षेपमपि न कुर्वन्ति। तत्र धीरवोर-महानात्मान एव साधनां कुर्वन्ति। सामान्यजनस्य तत्र प्रवेशोऽपि दुष्करः।

अथवान्यप्रकारेण पुरश्चरणमिष्यते[1]।
कुजे वा शनिवारे वा नरमुण्डं समाहृतम् ॥३॥
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषतः।
निक्षिप्य भूमौ हस्तार्धमानतः कानने वने ॥४॥
तत्र तद्दिवसे रात्रौ सहस्रं यदि मानवः।
एकाकी प्रजपेन्मंत्रं स भवेत् कल्पपादपः ॥५॥

द्वितीयः--अथवान्येति--वीरसाधनाविधिः--इष्यते। कुजे--भौमवारे तस्य तंत्रसाधनायां श्रेष्ठत्वात्। यथा--"मङ्गले वासरे-निशि," इति। तथा च—

"मङ्गलो भौमपुत्रश्च ऋणहन्ता धनप्रदः।
स्थिरासनो महाकायः सर्वकामफलप्रदः॥ इति-श. क. द्रुमे

शनिवारे—मंत्राभिमानी देवतावशीकर्तु श्रेष्ठत्वात्। "शनो-वश्यम्" क. र. ११८

नरमुण्डम्- अन्य मुण्डापेक्षया नरमुण्डस्य श्रेष्ठत्वात्।

पञ्चगव्येन--पञ्चगव्येन स्नापितं नरमुण्डम्। चन्दनाद्यैर्मि-लितम्--

---

१. मुच्यते ।ग—घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत्र आदिशब्देन "रजतादि।" तेन तत्रस्था भूतागणवः शुद्धचन्ति तृप्यन्ति च। तत्र पञ्चगव्यम्--

"गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तथैव च।"

तान्त्रिकविधौ स्वीकृतं पञ्चगव्यम्--

"गोमयाद् द्विगुणं मूत्रं मूत्रात्सर्पिश्चतुर्गुणम्।
दधि पञ्चगुणं प्रोक्तं क्षीरमष्टगुणं तथा॥"
—प्र. सा. सा. सं. २८ तमे पटले

प्रसंगोपात्त कृत्या-नाशनविधिरुच्यते--पञ्चगव्ये चरुसम्पाद्य, आज्ययुतेन तेन चरुणा अष्टोत्तरसहस्रं जुहूयात्। सम्पातञ्च गृहीत्वा साध्यं प्राशयेत्। द्वारे चाङ्गणेऽन्तःपुरे च निखनेत्। तेन कृत्याद्यो नश्यन्ति। "जुहूयात्"--"जातवेदसे"--इत्यनेन मंत्रेण इति शेषः। बृहन्नीलतन्त्रे तु--

इदानीं शृणु चार्वङ्गि येन सिद्धो भवेन्मनुः।
शवमुण्डं समादाय मङ्गले वासरे निशि॥
पञ्चगव्येन मिलितं चन्दनैकेन संयुतम्।
अर्धहस्तमिते गर्ते हरिद्रारोचने युते॥
क्षिपेत् तत्र शवमुण्डं रजतेन समन्वितम्।
मृत्तिकया पूरयित्वा सर्वं संस्कृत्य शोधयेत्॥
तत्रोपरि विशद्देवि क्रमेण हि समन्वितः।
सहस्रस्य प्रमाणेन जपं कुर्यात् समन्वितः॥
समाप्ते तु जपे तत्र पूजयेत् परमेश्वरीम्।
एवं त्रिदिन मध्ये तु सिद्धो भवति मानवः॥
—बृ. नी. तं. १०।१--५

निशि--मध्यरात्रौ, महारात्रौ वा। मध्यरात्रिः प्रसिद्धा।

अर्धरात्रात्परं यच्च मुहुर्तद्वयमेव च।
सा महारात्रिरुद्दिष्टा तत्र कृत्वाक्षयं व्रजेत्॥
—बृ. नी. तं. १।६२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दिव्यसाधनायाम् तु--

"तालुके चार्धरात्रस्तु पुनरेव विधीयते ।
हृत्पद्मं तु यदा प्राप्तः प्रभात समयस्तदा ।।"

—स्व. तं. ७।३८

अथवान्यप्रकारेण पुरश्चरणमुच्यते[1] ।
शवमानीय तद्द्वारे तेनैव परिखन्यते[2] ।।६।।
तद्दिनान्तद्दिनं यावद् अष्टोत्तरं शतम् ।
स भवेत् सर्वसिद्धीशो नात्रकार्या विचारणा ।।७।।

तृतीयः—अथवान्येति—तद्द्वारे—साधना गृहस्य द्वारे ।

तद्दिनान्तद्दिनान्तम्—यस्मिन् दिवसे प्रारभ्यते तस्मिन्नेव परिसमाप्यते ।

अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ।।८।।
सूर्योदयात् समारभ्य यावत्सूर्योदयान्तरम् ।
तावज्जप्त्वा निरातंक सर्वसिद्धीश्वरो भवेत् ।।९।।

चतुर्थः—अथवान्येति-स्पष्टम् । दिव्यसाधनाम्—

"हृत्पद्मं तु यदा प्राप्तः प्रभातसमयस्तदा ।
त्रुट्यर्धं तु वरारोहे पूर्व सन्ध्या भवेत्ततः ।।
पूर्ववत्क्रमयोगेन स चरेद्धि सदा शुभे ।
वासरे तु चरेत्सूर्यो धारायां सञ्चरेच्छशी ।।
चन्द्रसूर्योदयो ह्येष मया परिकीर्तितः ।।"

—स्व. तं. ७।३९—४१

अत्र—प्राण एव सूर्यः, अपानस्तु चन्द्रः । अथ च सूर्य इन्द्रिय वर्गः "वासरे"—प्राणोदये 'चरति' समुल्लस्य वाह्यं प्रकाशयति । "धारायां" निशायाम् अपानोदये—'शशी' मेयग्रामरूपः—"चरेत्" प्रमाण प्रकाशमाविष्य प्रमात्रैकात्मतामेति । साधकानां सौम्येतरे सिद्धचर्थमुक्तम् पक्षयोः—

१. इष्यते ग घ। २.। परिखन्य च ,ख।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"अहोरात्रस्तु यः प्रोक्तः प्राणेस्मिन् सुरसुन्दरि !
स एव पक्ष द्वितीयं मासं च कथयामि ते ॥"
—स्व. तं. ७।६१

अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
चन्द्रसूर्यग्रहेचैव[1] ग्रासावधि विमुक्तितः ॥१०॥
यावत्संख्यं मनुं जप्या[2]त्तावद्धोमादिकञ्चरेत् ।
सूर्यग्रहण कालाद्धि नान्यकालः प्रशस्यते[3] ॥११॥
तत्र यद्यत् कृतं कर्म तदनन्तफलं लभेत्[4] ॥११½॥

पञ्चमः—अथवान्येति--स्पष्टम् ।

चन्द्रग्रहणे-सूर्यग्रहणञ्च-लोके प्रसिद्धौ । तत्र ग्रासावधि-विमुक्तितः मोक्षपर्यन्तम् । "पीत्वा त्यजति तद्बिम्बं तदा मुक्त स उच्यते ।" इति । तस्मिन्काले जपमाचरेत् । यथा—

"स कालः सर्वलोकानां महापुण्यतमो भवेत् ।
तत्र स्नानं तथा दानं पूजा होम जपादिकम् ॥
यत्कृतं साधकैर्देवि तदनन्तफलं लभेत् ॥
—स्व. तं ७।७४

तान्त्रिकयोगे—चन्द्रग्रहण-सूर्यग्रहण-अमा-प्रभृतीनां विवेचनमुपलभ्यते । तत्र चन्द्रग्रहणम्—

"रवि बिम्बान्तरे देवि चन्द्रबिम्बं यदा भवेत ।
तदन्तरे भवेद्राहुः अमृतार्थो वरानने ॥
अमृतं स्रवते चन्द्रो राहुश्च ग्रसते तु तम् ।
पीत्वा त्यजति तद्बिम्बं तदा मुक्त स उच्यते ॥
——स्व. तं. ७।७०—७१

---

१. चन्द्र सूर्योपरागे च ।ख। २. जप्त्वा ताव ।ख—घ। यावत्संख्यं जपेन्मंत्रं ताव ।ग।
३ कालो विशिष्यते ।ग। ४. तत्र यद् यत्कृतं सर्वं अनन्त फलप्रदं भवेत् ।ख।
अत्र यद् यत्कृतं कर्म तदानन्ताय कल्पते ।ग।

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

तदेति—प्रतिपदोऽमावस्याभागसंघट्टे— "रविबिम्बान्तरे"— प्राणमध्ये सूर्यसंस्पर्शविलीनं चान्द्रामृतं—"पीत्वा" कंचित्कालमास्वाद्य अपानरूपं चन्द्रबिम्ब स्वसम्बन्धात् मुञ्चति । इदमत्र सतत्त्वम्-

प्राणार्कमानहठघट्टितमेयचन्द्र-
विद्रावितामृतरसोत्सुकितः खमाता ।
स्वर्भानु रावृणुत एव रविं रसं तु
पुण्ये गृहेऽत्र रसयेत् त्रयघट्टनज्ञः ॥

—स्व. तं. ७:७१ टीकायाम्

एवमन्तरिव बहिरपि अनयैव युक्त्वा भवेत् । "यत्पिण्डे तद्ब्रह्माण्डे" इति न्यायात् । उपनिषद् योगे तु—

"इडया कुण्डलीस्थानं यदा प्राणः समागतः ।
सोमग्रहणमित्युक्तं तदा तत्त्वविदां वरः ॥

—दर्श. उ. ४।४६

सूर्यग्रहणम्—

"अमावस्यार्धप्रतिपदा—
तिथिच्छेदेन वै तत्र सूर्यस्यग्रहणं भवेत् ॥"

—स्व. तं. ७।६६

तत्सम्बद्धः पक्षसन्ध्यार्धकालः स्वस्मिन् सन्ध्यातुटिभागे प्रतिपत्कालेन सह भवति, तदा सूर्यग्रहणं भवति ।

उपनिषद् योगे तु—

यदा पिङ्गलया प्राणः कुण्डलीस्थानमागतः ।
तदा-तदा भवेत् सूर्यग्रहणं मुनि पुङ्गवः ॥

—दर्श. उ. ४।४७

अमावस्या—

शक्ति वै विशति प्राणे या तुटिस्तु विधीयते ।
अमावस्या तु सा ज्ञेया कृष्णपक्षे वरानने ॥

—स्व. तं. ७।६८

"शक्तिः" ब्रह्मरन्ध्रस्थानं "तुटिः" इति प्रक्षीणचन्द्रा पञ्चदशी । अतएव अमाख्यां षोडश्यां तुटौ वसनात् तद्भित्त्यवलम्बनाद्—अमावस्या सा ज्ञेया ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उपनिषद् योगे तु–

"इडा पिङ्गलयोः सन्धि यदा प्राणः समागतः।
अमावस्या तदा प्रोक्ता देहे देहभृतां वरः॥"

—दर्श. उ. ४।४२

पक्षसन्धिमाहः–

"शक्तेर्मध्योर्ध्वभागे तु तुटचर्धं यत्प्रकीर्तितम्।
पक्षसन्धिस्त्वसौ ज्ञेयः।"

——स्व. तं- ७।६६

"ब्रह्मरन्ध्रात् उत्थितताया शक्तेर्मध्यं त्वक्स्थानं त्वक्शेषस्तु केशस्थानमूर्ध्वमेकमेव तुटचर्धं यत् स पक्षयोः–कृष्ण शुक्लयोः–सन्धिः। यदेव हि प्राणस्यान्त्यं तुटचर्धं, तदेव अपानस्य आद्यं भवति, इत्येतत् उभयोः तुटचर्धात्मकं देशत एकमेव तत् तुटचर्ध-द्वयप्रवाहकालं सन्धि पदम्।"

उपनिषद् योगे तु--

मूलाधारं यदा प्राणः प्रविष्टः पण्डितोत्तमः।
तत्राद्यं विषुवं प्रोक्तं तापैसस्तापसोत्तमः॥
प्राणसंज्ञो मुनिश्रेष्ठः मूर्धानं प्राविशद् यदा।
तदन्यं विषुवं प्रोक्तं तापसैस्तत्त्वचिन्तकैः।
निःश्वासोच्छ्वासनं सर्वं मासानां संक्रमो भवेत्॥

—दर्श. उ. ४।४३–४४

तत्क्रिया विधिरुच्यते–-

नमस्कारेण योगेन मुद्रयाऽऽरभ्य चार्चयेत्।
सूर्यस्य ग्रहणं वत्स ! प्रत्यक्ष यजनं स्मृतम्॥

—ब्रह्म. उ. ५६

महाग्रहणम्—

"राहुरादित्यचन्द्रौ च त्रय एते ग्रहा यदा।
दृश्यन्ते समवायेन तन्महाग्रहणं भवेत्॥"

—स्व. तं. ७।७३

दिनम्—

"प्रथमोदयते हृत्पद्मात्ततुटचर्धं तु दिनं भवेत्।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रात्रिः—

"द्वितीये चैव तुटचर्धे यदा चरति शर्वरी।"

——स्त्र. तं. ७।६३

दिनं प्रकाशरूपम्। रात्रिः—परं तु विश्रान्ति, आत्मा रात्रिः अत्र—आयुर्विज्ञानोक्त प्रकरणमपि द्रष्टव्यम्। यथा—

"पुण्डरीकेण सदृशं स्यात् हृदयमधोमुखम्।
जाग्रतस्तद्विकसति स्वपतश्च निमीलति॥"

—सु. शा. ४।३२

यत इयं भगवती संवित्प्रकाशानन्दमयी, ततो यत्र यावन्तानया वेद्यवेदकविश्रान्तिरूपौ प्रकाशानन्दावाभास्येते, तत्र तावद्रूपे एव दिन-निशे। तथा च मशकादौ सदाशिवादौ चात्यल्प-अतिवितत-कालत्वं तयोर्युक्तमेव। एवं च प्रतितुटचर्धं वक्ष्यमाणक्रमेण तदंशांशकेपि वा तावाभासमानौ दिननिशाभेदं समुचितं प्रमातारं प्रतिभासयत एव। कदाचिच्च प्रकाशस्याधिक्यं, कदाचिच्च विश्रान्तेः, कदाचित् तयोः साम्यमिति कृत्वादिन-निशयोर्वैषम्यं च भवति, अन्तर्वहिश्च। पारमेश्वर्या हि संविदा या यादृशी दिनादि व्यवस्था क्रियते, तां सर्वँ ग्रहादयो—यथाक्रममिति अनुवर्तन्ते।

—श्री कामिका उद्धृतवचनं स्व. तं. ७।६६

पक्षः—

अस्मिन्नेवमहोरात्रे पूर्वञ्च वरानने।
तुटिभिः पञ्चदशभिः पक्षः स तु विधीयते॥

–स्व. तं. ७।६४

तंत्रेऽमाया वैशिष्टचम्। तत्कथम्?

अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः।
पिवन्ति च सुराः सर्वे दशपञ्च पराकलाः॥
अमाशेषं गुहान्तस्थां विश्वतर्पिणी॥

अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥१२॥
शरत्काले चतुर्थ्यादि नवम्यन्तं विशेषतः।
भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकम्॥१३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

जपेदेकाकी विजने केवलं तिमिरालये।
अष्टम्यादि नवम्यन्तमुपवासपरो भवेत् ॥१४॥
अन्यच्च गुरुर्मार्गस्य लङ्घनं नैव कारयेत् ॥३॥

षष्ठः—अथवान्येति। शरत्कालम्—

"ऋतु विशेषः—"स आश्विन कार्त्तिकद्वयात्मकः" इत्यमरः।
काल विशेषः—"अर्धरात्रे शरत्कालः।" —वृ. नी. तं. ६।१५४

उपवासपरः—उपवासं प्रकुर्वतः। किं रूपमुपवासम् ?

"उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयः सर्वभोग विवर्जितः॥"

तत्र किं सेवनीयम्—

अष्टौ तावत् अव्रतघ्नानि आपो मूलं फलं पयः।
हवि ब्रह्मणिकाम्या च गुरोर्वचनमौषधम्॥
—बोधायन

नक्तं हविष्यान्नमनोदनञ्च,
फलं तिला क्षीर मथाम्बु चाज्यम्।
यत्पञ्चगव्यं यदि वाथ वायुः,
प्रशस्त मुत्तरोत्तर मुत्तरञ्च॥
—वायुपुराणे

अयं भावः—अष्टम्यादि नवम्यान्तम्—उपवासं प्रकुर्वतः—शरत्काले, प्रत्यहं अष्टोत्तर जपेत्—तेन मंत्रप्रत्यक्षं भवति। का तत्र प्रक्रिया ?

ऊर्ध्वं शक्ति निपातेन अधः शक्तेर्निकुञ्चनात्।
मध्यशक्ति प्रबोधेन जायते परमं सुखम्॥
—यो. रा. उ. २१

इति संक्षिप्तः। पुनश्चतमेव प्रकारान्तरेण—

"प्रत्यक्ष जननं देहे संक्षेपाच्छृणु गौतमः।
तेनेष्ट्वा स नरो याति शाश्वतं पदमव्ययम्॥
स्वयमेव कृतः पश्येद्देहे विन्दुं च निष्कलम्।
अयने द्वे च विषवे सदा पश्यति मार्गवित्॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृत्वा यामं पुरा वत्स रेचपूरक कुम्भकान् ।
पूर्वं चोभयमुच्चार्य अर्चयेत्तु यथाक्रमम् ॥
नमस्कारेण योगेन मुद्रयाऽऽरभ्य चार्चयेत् ।
सूर्यस्य ग्रहणं वत्स प्रत्यक्ष जननं स्मृतम् ॥"

—बृ. वि. उ. ५३--५६

तत्र—(i) यदा प्राणः पिङ्गलया कुण्डलिनी स्थानं प्रविशति तदेव सूर्यग्रहणम् ।

(ii) इडा पिङ्गलयोः, पिङ्गलेड्योः क्रमशः उत्तरदक्षिणायने भवतः ।

(iii) मूलाधारे मूर्धनि च यदा प्राणः प्रविशति तदा द्वे विषये भवतः । एवं अयन विषवद्वये च प्राणमार्गवित् स्वयमेव देहे विन्दुं सकलं निष्कलञ्च पश्येत् । कथं पश्येदित्याह—आदौ रेचक पूरक कुम्भकान् सहितान् केवलान् वा अह-रहःयाममात्रं कृत्वा । ह्लीं क्रीं यन्मंत्रद्वयमुक्तम्--तदुभयम्--अर्थानुसन्धानपूर्वकं उच्चार्य--सा--अहमेव--इत्यनुभावनपूर्वकं नमस्कारयोगः--प्रकुर्वत--भावयेत् । इत्थं नमस्कारयोगेन स्वातिरिक्तं नेति चिन्मुद्रया शाम्भवी खेचरी मुद्रया वा युक्तः सन् यथाक्रमम् आत्मानं अर्चयेत् । सदा सा अहमेव इति ध्यायेत् ।

खेचरीमुद्राः--वाह्याभ्यन्तरभेदत द्विविधा हि खेचरी भवति । तान्त्रिक-योगे प्रसिद्धाभ्यन्तरखेचरी हि अत्र उपयुक्ता ।

"सुषिरो ज्ञान जनकः पञ्चस्तोत्रः समन्वितः ।
तिष्ठते खेचरी मुद्रा त्वं हि शाण्डिल्य तां भज ॥

—शा. उ. १। ७।३६

मंत्रोद्धारः—"खेचरावसथं वह्निमम्बु मण्डलभूषितम् ।"

--योग. कु. उ. २।१७

शाम्भवीमुद्रा—"अन्तर्लक्ष्यं वहिर्दिष्टिः निमेषोन्मेष वर्जितम् ।
एषा सा शाम्भवी मुद्रा सर्वतंत्रेषु गोपिता ॥"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अतर्लक्ष्य विलीन चित्त पवनो योगी यदा वर्तते,
दृष्टचा निश्चलतारया वहिरधः पश्यन्नपश्यन्नपि ।।
मुद्रेयं खलु शाम्भवी भवति सा लब्धा प्रसादाद् गुरोः,
शून्याशून्य विलक्षणं स्फुरति तत्तत्त्वं परं शाम्भवम् ।।
—ह यो ४।३६–३७

अथवान्यप्रकारेण पुरश्चरणमिष्यते[1] ।।१५।।
अष्टमीसन्धिवेलायामष्टोत्तरलतागृहम् ।
प्रविश्य मंत्री विधिवेत्ताः समभ्यचर्ययतनतः ।।१६।।
पूर्वोक्तकल्पमासाद्य पूजादिकं समाचरेत् ।
केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतम् ।।१७।।
तासान्तु पत्रमूलेषु उल्कां संगृह्य मस्तके[2] ।
मंत्रसिद्धिर्भवेत्सद्यो लतादर्शन[3]पूजनात् ।।१८।।

अथवान्येत्यादि—अष्टमी सन्धिवेलायाम्—मध्यरात्रौ । तंत्रशास्त्रे—ऽष्टमी-नवमी-चतुर्दशी तिथयः पर्वविशेषानि, यथा—

"तयाष्टम्यां नवम्याञ्च पूजाकार्या विवृद्धये ।"

तथा—"कृष्णाष्टमी चतुर्दश्यौ पुण्यात् पुण्यतरेस्मृते ।" इति ।

किमर्थमेतत् वैशिष्टचम् ? विविच्यते—

शरीरमेतत् चतुर्दशनाडी-नवद्वार-अष्टचक्रेण च समन्वितम् यंत्रविशेषम् । एतच्च पुरुषार्थ चतुष्टयस्य साधनं वर्तते. न तु केवलं पञ्चाभूतानां पिण्डमात्रम् । अतएवोक्तम्—

"पुनर्ग्रामा पुनर्क्षेत्रं पुनर्वित्तं पुनर्ग्रहम् ।
पुनः शुभाशुभं कर्म न शरीरं पुनः पुनः ।।
—कु. तं. १।२०

वैदिक वाङ्मयेऽपि—

अष्टचक्रा नवद्वारा देवानां पूरयोध्याः ।
तस्यां हिरण्ययः कोशः स्वर्गोज्योतिषावृतः ।।
—अथर्व. १०।२।३१

---

१. मुच्यते ।ग-घ। २. तासान्तु पदमूलेन उक्त्वा संगृह्य कर्णके ।ख। तासां तु पादमूलेन उग्रां सम्पूज्य यत्नतः ।ग-घ। श्लोकार्धमेतत् क पुस्तके नास्ति । ३. तस्य ।घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अष्टचाक्र--नवद्वार-समन्वितम्-देवानां-पूरि अयोध्या-अस्ति । तस्यां अयोध्यायाम्=शत्रुभिः काम-क्रोध-शोक-दुःख-दैन्यादिभिः । अपराजितायाम्-हिरण्ययः=हिरण्यं स्वर्णं तन्मयं कोशं स्थापितामस्ति । ज्योतिषावृता एषा अयोध्या पुरि=शरीरम् देवालयम्=स्वर्गो वर्तते । अस्मिन् स्वर्गे देवा निवसन्ति । अताएवोक्तम् ।

"गायन्ति देवाः किल गीतकानि ।"

अष्टचक्रा—त्वग्सृगाद्या सप्त धातवः, ओजो नाम अष्टमो धातुः । तेऽत्र रथात्मना वर्णनीयस्य शरीरस्य चक्रत्वेन निरूप्यन्ते । अष्टौ चक्राणि यस्य तत् अष्टचक्रं शरीरम् । सा एव "पूरि" अष्टचक्रा, इति सायणाचार्यः । धातवश्चक्रत्वेन कथं निरूप्यन्ते ? रक्तादयोधातवः शरीरेऽस्मिन् चक्रवत् भ्रमन्ति, निरन्तम्, अतएव चक्रसदृशत्वात्—"चक्रम्" इति कथ्यते ।

नवद्वारा— सा पुरि नवद्वारायुता, अस्ति । यथा—

"तेन नवरन्ध्ररूपो देहः ।" —भावनो. २

"नवरन्ध्र स्थितात्मनां नवरन्ध्राणि नवधाराणि सुषुम्नान्तर्गत गगनभागरूपाणि ।"—अमृतानन्द । यो.हृ. ३।१४६ ते च नवाधाराः—

"आधारं स्वाधिष्ठानञ्च मणिपूरमनाहतम् ।
मध्यमं वज्रकण्ठञ्च लम्बिका च विशुद्धिकम् ॥"
"आज्ञा च नवमं विद्धि" —स्व. संग्रहे

यतस्तेषां स्वरूपं पुण्डरीक सदृशं, संकोचविकासित्वात्—अतस्तेषां—पुण्डरीकाभिधानां भवति । तथा च ते नाडीनां चक्रवत्केन्द्रं भवति, अतस्तेषां "चक्र" इति संज्ञा जायते । तेषां चक्राणां वहिर्मुखानि--नेत्र-श्रोत्र-नासिका-उपस्थ-गुद-मुखकुहरादीनि भवन्ति । तान्येव नवद्वाराणि, अस्य पूर्यां सन्ति, अतस्तस्या--"नवद्वारा" इति संज्ञा जाता । तेषां वहिर्द्वाराणां संकोचविकासादय क्रिया विषयग्रहणञ्च सुषुम्नान्तर्गत नवचक्रेष्वेवावस्थिता । अतएव—इन्द्रियाणां

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आरोग्यमनारोग्यञ्च तदाधीनम् । तेषु—श्रोत्रद्वयं वाक्-दिव्यौघः । दृगद्वयमुपस्थस्सिद्धौघः । नासा पायवो मानवौघः, इति । तेनैव—

गुरुराद्या भवेच्छक्तिस्सा विमर्शमयी मता ।
नवत्वं तस्य देहस्य रन्ध्रत्वेनावभासते ॥

—भावनोप. भास्कररायोधृतवचनम् ।

"पुण्डरीकं नवद्वारं त्रिभि गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ।

—अथर्व. १०।८।४३

पूः, पुरि-शरीरम् । "पू. शरीरे पत्तने च" अमरकोष टीकायाम् "हृत्पुण्डरीकं पुरमध्य संस्थम् ।" इति श्रुत्युक्तरीत्या पुरम् शरीरम् ।

—अमृतानन्द

"पुरम्—सूक्ष्मदेहस्य आरम्भकं—तन्मात्र मनोऽहंकृति बुद्धिरूपम्"

—स्व. तं. ४।१३८ टीकायाम्

"खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाष्टमः ।"

—अ. तं. शा. १।६३

"प्रकृतिश्चाष्ट धातुकी" —अ. तं. शा. १।१७

अत्र—'खादीनि-सूक्ष्मभूत खादीनि तन्मात्र शब्दाभिधेयानि ।"

—चक्रः

अ-योध्या—अपराजिता ।

तस्यां हिरण्ययः—तस्यामयोध्यायाम्—पुर्याम् ।

हिरण्यकः—"हिरण्मय सुवर्णमय"
हिरण्यय हिरण्येन भूषितः"

"शुक्रं हिरण्यम्" —तै. १।७।६।३

"ज्योतिर्वै हिरण्यम्" —ता. ६।६।१०

ज्योतिः—"ज्योतिर्वै शुक्रं हिरण्यम्" —ऐ. ७।१२

कोशः—"हिरण्मय कोश ज्योतिषावृतः ।" इति

स्वर्गः—"देवतानामालयः" —शब्दकल्पद्रुमः

"नव स्वर्गा लोकाः" —ऐ. ४।१६

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इन्द्रियाणां वैकल्यमेव नरकम् ।
इन्द्रियाणां वैमल्यमेव स्वर्गम् । इति

अष्टा चक्रं वर्तत एक नेमि सहस्राक्षरं प्रपुरो निपश्चा ।
अर्धेन विश्वं भुवनं जजान यदास्यार्ध कतमः स केतु ॥

– अथर्व. ११।६।२२

अपि च उभौ ऋचौ उपसंहरति–

"नगरी नगरस्येव रथस्येव रथी यथा ।
स्वशरीरस्य मेधावी कृत्येष्वहितो भवेत् ॥"

--अं. तं. सू. ५।१८३

ज्योतिषावृतः–"एतद्विमर्श-नवकस्य मूलभूता सुषुम्ना नाड्येव नवरन्ध्र सुषुम्नामूलभागे–श्रोत्रादिनाडीनां मिलितत्वेन सुषुम्नावच्छिन्नचिच्छक्तेरेव तत्तत् नाडीद्वारा तत्तत् विषयावभासकत्वात् । नाडीनामवस्थानप्रकारो यथा–

"प्रागुक्तमूलाधारस्य मध्यस्थत्र्यस्त्र मध्यतः ।
सुषुम्ना पृष्ठवंशाख्य वीणादण्डस्य मध्यगा ॥
मूर्ध्नि ब्रह्मरन्ध्रान्ता नासाग्राद् द्वादशांगुला ।
तन्मूलात्पायुगा प्रोक्ताऽलम्बुसाख्या तु नाडिका ॥
त्र्यासाग्रादुत्थिता नाडी कुहुर्नाम ध्वजान्तगा ।
तद्वाम दक्ष पार्श्वाभ्यां द्वे विश्वोदर वारुणे ॥
जठरान्ता सर्वगा च प्रोक्ते तद्वदनन्तरे ।
हस्ति जिह्वा यशस्विन्यौ पादांगुष्ठान्तविस्तृते ॥
तथैवेडापिङ्गले द्वे नासारन्ध्रद्वयान्तगे ।
गान्धारी च तथा पूषा नेत्रद्वय गते क्रमात् ॥
तथैव कर्णगामिन्यौ शङ्खिनी च पयस्विनी ।
जिह्वाग्रगा सरस्वत्याख्यैवं नाड्यश्चतुर्दश ॥"

--तन्त्रराज तन्त्रे

मूलाधारे नाडीनां स्थितिक्रमो यथा–

मूलाधारे त्र्यस्त्रमध्ये सुषुम्नाऽलम्बुसे उभे ।
प्राक् प्रत्यगास्थिते अन्यास्त्रिकोणाग्रात्प्रदक्षिणाः ॥
या लेखा संस्थिता नाड्यः कुहुश्चैव तु वारुणा ।
यशस्विनी पिङ्गला च पूषा नाम्नी पयस्विनी ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सरस्वती शङ्खिनी च गान्धारी तदनन्तरे।
इडा च हस्ति जिह्वा च ततो विश्वोदरामिधा ।।
रन्ध्रपायुध्वजा शेष यन्नासा नेत्र कर्णयोः।
जिह्वा कर्णाक्षि नासाङ्घ्रि जठरान्ताश्चतुर्दश ।।

—भास्कररायः

इत्थं प्रकारेण ज्योतिषावृतः। एवमुक्तं समीचीनं भवति—
अष्टचक्र-नवरन्ध्रमयम्-शरीरम्,
श्रीचक्रम्।

एवं ज्योतिः, हिरण्यम्, शुक्रम्, वीर्यम्, विन्दुर्वा समानार्थ-द्योतकाः—पर्याया। तं सम्पाद्य—स्थिर-वीर्यो भूत्वा मंत्रं साधयेत्।

अयं भावः—तामसिक साधनया वीर्यस्थैर्यं सम्पाद्य, वीरसाधनया यथेच्छ स्तम्भनं शक्ति प्राप्य दिव्याचारे प्रवेशं कुर्यात्।

शुक्रोऽसि भ्राजोऽसि स्वऽसि ज्योतिरसि।
आप्नुहि श्रेयसमति समं क्राम ।।

—अथर्व. २।११।५

लतागृहाम्—लतायाः गृहम् लतागृहम्। अत्र लता शब्देन "नारी" "सुषुम्णा" च गृह्यते। तामसिक साधनायां नारी, अथ च दिव्य-साधनायाम् सात्त्विक-साधनायाम् सुषुम्णा गृह्यन्ते।

लता इव लता। "लतति वेष्ठयते या अन्यमिति।" लता= नारी—तंत्रसारे। लता सादृश्यात् सुषुम्णा अपि लता शब्देनाभि-धीयते। लतागृहेप्रविश्य जपं कुर्यात्। इति समानम्। नापि विंदु स्रुतिस्यात्, इति तामसिक साधनायाम् अधिकम्। दिव्याचारे तु योनिभुद्रया प्रवेशो भवति। पुरं बन्धनकारणं योनिमुद्रा—

खेचरीमुद्रा च कथिता। तदभावे—आज्ञाचक्रे ध्यानेनापि मनो स्थैर्यं भूत्वा वीर्य-स्थैर्यं भवति, इत्यनुभवः। मैथुन प्रवृत्तोऽपि वीर्यच्युति न भवति।

कामदेवः—कामः="फलविषयोऽभिलाषः कामः" —सायणः

द्विविधश्च तत्कामो भवति। प्राकृतिकोऽप्राकृतिको वा। प्राकृतिकः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कामः मलिनो भवति । अप्राकृतिकश्च निर्मलो भवति । प्राकृतिको कामः त्रिगुणात्मकः भवति । अप्राकृतिकश्च त्रिगुणातीतो भवति ।

प्राकृतिक कामस्वरूपमाह—

अंहोमुचे प्र भरे मनीषामा सुत्राव्णे सुमतिमावृणानः ।
इममिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु यजमानस्य कामः ॥
—अथर्व १६।४२।३

अप्राकृतिक कामस्वरूपमाहः--

कं इदं कस्मा अदात् कामः कामायादात् ।
कामो दाता कामः प्रतिगृहीता काम समुद्र मा विवेशः ।
कामेन त्वा प्रति गृह्णामि कामैतत् ते ॥
—अथर्व. ३।२६ ७

प्राकृतिक कामस्य विरोधी ज्ञानं भवति । अतएव शिवस्य तृतीय नेत्रः—ज्ञाननेत्रः तं--दह्यते । किन्तु अप्राकृतिक कामेन-- ज्ञानस्य विरोधो न भवति । यतः ज्ञानस्य सविशेष घनीभूतावस्था एवं आनन्दं भवति । उदये सति च अप्राकृतिक कामस्य ज्ञानं निष्प्रभं सञ्जायते । अतएवोक्तम्—"केवलं कामदेवोऽसौ" इति ।

अयं भावः—अष्टमी नवमी मध्यनिशायान्—स्वस्थसाधकः स्थिरवीर्यश्च केवल कामदेवोऽसौ लतागृहे-प्रविष्य विधिवत् समभ्यचर्य पूर्वोक्त कल्पमासाद्य पूजादिकं समाचरेत् । ततश्च अष्टोत्तर शत जपेनापि मंत्र सिद्धिर्भवति ।

अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
आकृष्टायाः कुलागारे लिखित्वा[1] मंत्रमेव च ॥१६॥
सम्पूज्य[2] तत्र संस्कारं कृत्वा तस्यै निवेद्य[3] च ।
किंचिज्जप्त्वा मनुं नीत्वा देवताभावतत्परः ॥२०॥
तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः ।
प्रातः स्त्रीभ्यो वलिंदत्वा मंत्रसिद्धिर्न संशयः ॥२१॥

१. कतिलतागारे लिखित्वा ।ख। भावयेत् ।ग घ। २. प्रपूज्य ।ख ग। ३. निवेदयेत् ।ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अष्टमः—

अथवान्य प्रकारेणेत्यादि—प्रकारान्तरेण तंत्रान्तरेऽपि—

अथवक्ष्ये महेशानि रहस्यं परमाद्भुतम् ।
युवतीनां योनौ तु लिखेन् मंत्रान् मनोरमान् ।।
संजप्य च महामंत्रं सर्वसारस्वतप्रदम् ।
सहस्रजपं प्रयोगञ्च समाचरेत् ।।
पश्चात् भ्रामणयोगेन ताडयेद् योनिमण्डलम् ।
सहस्रञ्च जपेत् तावत् यावत् रेतो न जायते ।।
तेन तत्त्वेन देवेशि तर्पयेत् यतमानसः ।।

—वृ. नी. तं. ७।१६५

तामसिक प्रयोगेष्वपि वैचित्र्यं वैशिष्ट्यञ्च द्रष्टव्यम् । अस्मिन् विधौ साधकः स्थिरमानस—स्थिर वीर्यश्च भवेत् । तदेव मंत्र सिद्धिर्भवति । अन्यथा कल्पपर्यन्तं जपेनापि सिद्धिर्न भवति ।

अत्र जिज्ञासा जायते—यत् ग्राम्यधर्मेण-भोगेन स्वर्गं मोक्षञ्च कथं प्राप्यते ? देवी भैरवं निवेदयति—

भगवन् भूतभव्येश भूताधिप महाबलः ।
प्रसीद देव देवेश सर्वप्राणहिते रतः ।।
येनावश्यं भवेत् सिद्धिस्तदुपायं वद प्रभो ।।

निग्रह मार्गमतिदुष्करं वर्तते । तथा च प्रपञ्चमये संसारे सरलतम मार्गोऽपि आवश्यकं भवति । तदैव सर्वेजना सुखमवाप्नुयात् । तेषां कृते ऽयं राजमार्गोऽन्वेषितः । मंत्रशिखा—मंत्र चैतन्यमेव मंत्रसिद्धौ हेतुर्भवति । यथा—

चैतन्य रहितं मंत्रं यो जपेत्स तु पापकृत् ।
मंत्राश्चैतन्यसहिताः सर्वसिद्धिकरामताः ।।

- भूतसिद्धि

मैथुनापि मंत्र शिखा जायते । मंत्रे चैतन्य शक्तिरुत्पद्यते—रहस्यमेतत्—किन्तु सत्यम् । तन्न तर्केण सिद्धयति । कथं जायते ? स्वापे-प्रहरे-महानिशि—तामसिक साधनायां-चारो-वानाचारः तत्र

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

वामनाड्यां वायोरुदयः । दक्षिणनाड्यां वायोरुदयः—दक्षिणाचारो-दिव्याचारो वा । यदा तु उभयनाडी प्रवाहो भवति तत्र सिद्ध-साधक स्वतंत्रो भूत्वा विचरति ।

युवती—कुण्डलिनी, योनिः=मूलाधारचक्रम् । लिखेत्=भावयेत् । संस्कारं कृत्वा—षोडशोपचारैर्र्चयित्वा । निवेद्य—काम-क्रोधौ बलिं दत्वा जपं चरेत् । तेन मूलाधारादारभ्य जिह्वान्तं गता सरस्वती—

"सरस्वती तु या नाडी जिह्वान्तं प्रसर्पते ।"

—यो.शि. ५।२३

प्रसीदति—विकसति । तेन—

कवित्वं जायते सुभ्रु वाग्मित्वं च तथैव च ।
पाण्डित्वं महत्त्वञ्च जायते नात्र संशयः ॥

—वृ. नी. तं. ७।१६८

तमेव विवृणोति—

शाखा पल्लवरूपेण ताल्वादि स्थान घट्टनात् ।
अकारादि क्षकारान्तान्यक्षराणि समीरयेत् ॥
अक्षरेभ्य पदानि स्यु पदेभ्यो वाक्य सम्भवः ।
सर्वे वाक्यात्मका मंत्रा वेदशास्त्राणि कृत्स्नशः ॥
पुराणानि च काव्यानि भाषाश्च विविधा अपि ।
सप्तस्वराश्च गाथाश्च सर्वे नादसमुद्भवा ॥
एषा सरस्वती देवी सर्वभूत गुहाश्रया ।
वायुना वह्नियुक्तेन प्रेर्यमाणा शनैः शनैः ॥

—यो. शि. ३।५–८

अत्र—"वायुना वह्नियुक्तेन प्रेर्यमाणा" इत्येव रहस्यम् ।

देवा अदुः सूर्यो अदाद् द्यौरदात् पृथिव्यऽदात् ।
तिस्र सरस्वतीरदुः सचित्ता विषदूषणम् ॥

—अथर्व. ६।१००।१

"देवाः--सूर्यः, द्यौ, पृथिवी, इन्द्रादयः—सर्वे सचित्ताः समनस्का सन्तः, विषदूषणम्—स्थावर जङ्गमोद्भवस्य दूषकं निवर्तके औषधं अदुः--दत्तवन्तः । तथा तिस्र--त्रिसंख्यकाः सरस्वती । सरस्वत्यः

Digitization by Hindu-Heritage Foundation of America. HHFA(USA)

त्रयीरूपाः--इडा सरस्वती भारतीति तिस्रो देव्यः-नाड्यः-साहचर्यात् सरस्वत्य उच्यन्ते ।" —सायणः

शाण्डिल्योपनिषदि--"गायत्री सावित्री सरस्वतीति तिस्रो देव्या व्याख्याता ।" —शा. १।६।३

अयं भावः--अभ्यासशीलः--श्रीगुरु मुखात्क्रमं ज्ञात्वा हूंकारेण मूलाधारस्थित वह्निपवनयोराक्रमेण तप्तां कुण्डलिनीं कृत्वा सहस्रारे प्रापयेत् । यथा--"हुङ्कारेण समुत्थाप्य शक्तिम्" —रुद्रयामले

कुम्भकेन--मंत्र चैतन्यं जायते । यतः--

यावत्यो नाडयो देवि तिर्यगूर्ध्वमधः स्थिताः ।
समानेन समाकृष्टा एकीभूता भवन्ति ताः ॥

— स्व. तं. ४।३००

कुम्भकेनैव-वीर्यस्य--स्तम्भनं स्थैर्यं ऊर्ध्वीकरणञ्च सम्पद्यते । एतादृशं कुम्भकम् अश्विनी मुद्रया सिद्ध्यति ।

"यन्मूलं सर्वलोकानां यन्मूलं चित्तबन्धनम् ।
मूलबन्ध सदा सेव्यो योग्योऽसौ राजयोगवित् ॥"

—ते बिन्दूपनि. १।२७

तेन—"मंत्र आत्मा तथा नाडी एवं समरसी भवेत् ।"

——स्व. तं. ४।३०३

एतदेव--सिद्धमार्गः--सर्वेषां सिद्धीनाम्-राजमार्गः--

तेन--

"रसं रसायनं दिव्यं सिद्धद्रव्यं लभन्ति ते ।"

—स्व. तं. १०।१०८

इति दिक् । शेषं गुरुमुखाज्ज्ञेयम् ।

अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
गुरुमानीय संस्थाप्य देववत् पूजनं विभोः ॥२२॥
वस्त्रालंकारहेमाद्यैः सन्तोष्य गुरुमेव च ।
तत्सुतं तत्सुताञ्चैव तत्पत्नीञ्च विशेषतः ॥२३॥
पूजयित्वा मनुं जप्त्वा स्वयं सिद्धीश्वरोभवेत् ॥१/२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नवमः---

अथवान्येति--गुरुपूजनात्सिद्धिः। यथा---

गुरोः परतरं नास्ति त्रैलोक्ये च विशेषतः।
गुरुणा परमेशानि दैवतैक्यं विभावयेत्॥
महादेवो गुरुसाक्षाच्छ्रीगुरुः सर्वदेवता।
गुरोश्च सन्निधाने तु नान्यदेवं प्रपूजयेत्॥

—बृ. नी. तं. ३।४७–४८

गुरुयजन-विधिः---

आदौ भद्रासनं दद्यात् पाद्यं दद्यात् ततः परम्।
अर्घ्यं दद्यात् विशेषेण तथा चाचमनीयकम्॥
धूपं दद्यात् विशेषेण दीपं दद्यात् सुशोभनम्।
चर्व्यं चोष्यं तथा लेह्यं पेयं दद्यान्मनोहरम्॥

—बृ. नी तं. ३।५०–५१

गुरवे दक्षिणां दद्यात्प्रत्यक्षाय शिवात्मने।
न चेत् सञ्चारिणी शक्तिः कथमस्य भविष्यति॥

—बृ. नी. तं. ३।३९

गुरुरपि मंत्रसिद्धौ कारणम्--

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः क्रिया।
मूलमंत्रं गुरोर्वाक्यं तस्मादादौ गुरुं यजेत्॥
तस्मात्सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत्।

—बृ. नी. तं. ३।१६

"गुरुर्मंत्रस्य मूलं स्यान्मूलशुद्धौ सदा शुभम्॥"

—क्रियासारसमुच्चये

किं नाम गुरुः--

"गिरति--अज्ञानम्, अन्तर्यामिरूपेण, अविद्यां नाशयति।" इति।

आचार्य उपनयमानो
ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति
तं जातं द्रष्टुमभि संयन्ति देवाः॥

—अथर्व. ११।५।३

चतुर्थे दिवसे जातं विद्यामयशरीरम् उत्पन्नं तं ब्रह्मचारिणं द्रष्टुम् अवलोकयितुं देवा अभिसंयन्ति अभिमुखं सम्भूय गच्छन्ति।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सायणः । "स हि विद्यातस्तं जनयति । तच्छ्रेष्ठं जन्म । शरीरमेव सम्भूय गच्छन्ति" —सायणः

"पाशबद्धः पशुर्ज्ञेयः पाशमुक्तो महेश्वरः ।
तस्मात् पाशहरो यस्तु स गुरुः परमो मतः ॥
—कु. तं. १३।६१

तंत्रे--गुरुरेव आचार्यः । यथा--"ज्ञान-दानसमर्थमित्येवं गुरो हि आचार्यः ।"

अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च ॥२४॥
केवलं देवत्त्वभावेन जप्त्वा सिद्धीश्वरो भवेत् ।
गुरवे दक्षिणां दद्यात्[१] यथाविभवमात्मनः ॥२५॥
गुरोरनुज्ञामात्रेण दुष्टमंत्रोऽपि सिद्ध्यति ।
गुरुं विलिंघ्य शास्त्रेऽस्मिन्नाधिकारःसुरैरपि ॥२६॥
एषाञ्च तंत्रमंत्राणां प्रयोगः क्रियते यदि ।
गुरुवक्त्रं विना देवि सिद्धिहानिः[२] प्रजायते ॥२७॥

दशमः--अथवान्येति--सहस्रारम्--"सहस्रं आराणि कोणा यस्येति । शिरोऽवस्थिताधोमुखसहस्रदलकमलम्--" —वाचस्पत्ये

"महाशून्ये सहस्रारं निशाकरसहोदरम् ।
अधोवक्त्रं कर्णिकायाश्चन्द्रोर्ध्वे शक्तिरूपिणी ॥"
—मायातन्त्रे

सहस्रारस्यावस्थितिः--सहस्रारं न मेरुदण्डस्य मध्ये, न वा षट्चक्रवत् चित्रिण्या ग्रथितम् । अपितु शङ्खिन्या नाड्याः शिखरे अग्रे शून्यप्रदेशे--चित्रिण्या मेरुदण्डस्य च शून्यप्रदेशेऽस्ति । तेन सुषुम्णाया अपि ऊर्ध्वं इति सूचितम् ।

स्वरूपम्--दशशतदलं पद्मम्--पूर्णचन्द्रातिशुभ्रम्-अधोमुखचक्रम्त रुणरविकलाकान्ति किञ्जल्कपुञ्जम् । केवलानन्दरूपम् शुक्लवर्णम्सहस्रार-मस्ति ।

१. दत्वा ।ग। २. नैन सिद्धिः ।ख।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्यस्य मण्डलञ्चैव चन्द्रमण्डलमेव च ॥
ततो वायुर्महानामा ब्रह्मरन्ध्रं ततः स्मृतम् ।
तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम् ।
तदूर्ध्वे शङ्खिनी देवी सृष्टिस्थिति कारिणी ॥

--कङ्कमालिनीतं.

तत्कर्णिकायाम्--सहस्रदलकर्णिकायां परमशिवनाम्ना ख्यातो देवः वर्तते इति । यथा--

इह स्थाने देवः परमशिवसमाख्यानसिद्धः प्रसिद्धः ।
स्वरूपी सर्वात्मा रसविरसमितोऽज्ञान मेहान्धहंसः ॥

—ष. च. नि ४२

अत्र--सर्वात्मा-सर्वेषां जीवनात्मा जीवात्मस्वरूपः जीवात्म-परमात्मनोर्वस्तुतो भेदाभावात्, य आत्मा स एव जीवः ।"—इति टीकायाम् तथा च--

जीवात्मा-परमात्मा च पर्यायो नात्र भेदधीः ।
आचार्यशास्त्रोपदेशादैक्यज्ञानं यदा भवेत् ।
आत्मनोर्जीवपरयोर्मूलाऽविद्या तदैव तु ॥

—अध्यात्मरामायणे

अयं भावः--"हृदि ह्येष आत्मा" हृदयाकाशेऽऽत्मा वर्तते ।

"मूर्धानमाश्रितो वह्निः शरीरं परिपालयन् ।
प्राणो मूर्ध्नि चाग्नौ च वर्तमानो विचेष्टते ॥"

—महा. वनपर्व २१३।३

अत्र--"मूर्ध्नि सहस्रारे" इति । --ब्रह्मयोगी

आधुनिकाः—वैज्ञानिका अपि मूर्ध्नि आत्मनो निवासस्थलमिति मन्यन्ते । यथा—

"आत्मा का वास मस्तिष्क में—

चार लोट्स विल—वर्जीनिया, २२ फरवरी १९६९ यू.पी.आई.-अमेरिका के एक दिल-बदल विशेषज्ञ डॉ. एम.डी. कूले का कहना है

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कि "मनुष्य की आत्मा का वास उसके मस्तिष्क में है।" डॉक्टरी का अध्ययन करने वाले सैकड़ों छात्रों के सामने बोलते हुए उन्होंने कहा कि--"मैं सोचता हूं कि हमें मृत्यु को एक अकेली घटना नहीं अपितु प्रक्रिया समझना चाहिये। यह प्रक्रिया मस्तिष्क के मरने से शुरू होती है। हमारी आत्मा का निवास मस्तिष्क में है। शरीर के दूसरे अङ्ग जैसे—दिल कई मिनट बाद तक भी जीवित रह सकते हैं।" —दैनिक हिन्दुस्तान नई दिल्ली, २४।२।६६ में प्रकाशित

"हमें मृत्यु को एक अकेली घटना नहीं, प्रक्रिया मानना चाहिये—यह प्रक्रिया मस्तिष्क के मरने से आरम्भ होती है।" ये वाक्य ध्यान देने योग्य हैं।

प्रश्नोपनिषद् में मृत्यु को प्रक्रिया इस प्रकार बतलायी है:—

"अग्निस्वरूप उदानवायु मस्तिष्क में स्थित प्राणी के शरीर को जीवित रखता है तथा मस्तिष्क में सहस्रार में रहता हुआ ही समस्त शरीर में जीवन का सञ्चार करता है। ज्यों-ज्यों अग्नि-स्वरूप उदानवायु जिसे वैदिक साहित्य में 'तेज' कहते हैं—उपशान्त होता जाता है—प्राणी मृत्यु की ओर अग्रेसर होता जाता है तथा उस तेज के पूर्णतया उपशान्त हो जाने पर मृत्यु हो जाती है।"

"तेजो ह वाव उदानस्तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः।"—प्रश्न प्र. ३।६. अत्र—"यस्मात् उदानस्य तेजस्वभावेन वाह्यतेजोऽनुगृहीतोत्पतनकर्तृत्वात् उत्क्रमणकर्त्ता ह्युदानः, तस्मात् यदा लौकिकः पुरुषः उपशान्तं उदानात्मकं तेजो यस्य स उपशान्ततेजाभवति, तं क्षीणायुषं विद्यात्। स शरीरान्तं प्रतिपद्यते।" —ब्रह्मयोगी

तस्मिन् यः संस्थितो ह्यग्निर्नित्यं स्थाल्यामिवाहितः।
आत्मानं तं विजानीहि नित्यं योगजितात्मकम्॥
—महा. वनपर्व २१३।१६

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एतादृशे सहस्रारे–गुरोः पादपद्मं ध्यात्वा पूजयेत् ।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं,
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं,
स्मरेच्छिरसि हंसगं तदभिधानपूर्वकं गुरुम् ॥

इति दिव्यसपर्याविधिः ।

अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
स्वकीयां परकीयां वा स्त्रियमानीय साधकः ॥२८॥
शतमष्टोत्तरं जप्त्वा योनिमामंत्र्य तत्त्ववित् ।
गच्छन् परमतत्त्वज्ञः सहस्रं जपते यदि ॥२९॥
तदा मंत्रो भवेत्सिद्धो दुष्टमन्त्रोऽपि पार्वति ।
एतत्प्रयोगं देवेशि न कस्मै दर्शयेत् क्वचित् ॥३०॥
एतन्मंत्रञ्च तन्त्रञ्च शिष्येभ्योऽपि न दर्शयेत् ।
यदि वा दर्शयेन्मोहात् कुबुद्धिः कुलनाशकः ॥
अथवा प्रेतराजस्य भवनं याति निश्चितम्[1] ॥३१॥

इति श्रीकालीतन्त्रे रहस्यपुरश्चरणविधिः
सप्तमः पटलः

एकादशः–स्वकीयामित्यादि–अत्र रहस्यम्–

यदि न प्रपतेद् विन्दुः परनारीषु पार्वति ।
सर्वसिद्धीश्वरो भूत्वा विहरेत् क्षितिमण्डले ॥
—का. वि. १०।२१

परनारीषु स्वकीयासु अपि च वीर्यपातेन सिद्धिहानिर्जायते । मैथुनेऽपि वीर्यधारणात् सिद्धिः स्यात् । एतदेव जीवनम्, अन्यथा मरणम् । यथा–

"मरणं विन्दुपातेन, जीवनं विन्दुधारणात् ।"
—गो. सं.

१. तस्य जायते ।ख।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शुक्रं वीर्यं वा सिद्धेर्मूलम्—

द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणया पिपर्तु ।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च ॥
—अथर्व. ६।५३।१

"वीर्यं वा अग्निः" —तै. १।७।२।२
—गो. ३०।६।७

"मरणं विन्दुपातेन" इति कथम् ?

नित्यकलास्वरूपचन्द्रविन्दुः=सोमो वीर्यं वा कालाग्निसंस्पर्शात् यदा सहस्रात्क्षरति तदा योषिद्योनौ पतति, गर्भस्थितिर्भवति, शुष्यते दह्यते वा । एतदेव जरा-रोग-मृत्युप्रभृतीनां कारणम् । तथा च लौकिक कार्येष्वसफलता, दुःख-दारिद्रयस्य च कारणम् । एतदपि मृत्युरेव । अत एवोक्तम्—

"यावद्बिन्दुः स्थितो देहे तावत्कालं भयं कुतः ।"
—गो. सं.

अत्र—विन्दुः रेतस्-वीर्यं शुक्रं वा । तदेव सोमः ।

"रेतो वै सोमः" —श. १।६।२।६
"शुक्रः सोमः" —ता. ६।६।६
"योषा वा अग्निः" —श. १४।६।१।१६

"जीवनं विन्दुधारणात् ।" इति कथम् ?

येन केनापि योगेन—जाठराग्निना वा वाष्पीभूतं वीर्यं—यावत्पर्यन्तं चित्रायां नाडयां तिष्ठति—तावदेव जीवनम् । यदा च वीर्यं चित्रात् क्षरति तावदेव मृत्युः । प्राकृतपुरुषे चित्रा-नाडी निम्नमुखा भवति शुक्रस्खलनं च करोति । —योगिजने च सा ऊर्ध्वमुखा जायते ।

"चित्राख्या सीवनी नाडी शुक्रमोच्नकारिणी ।"
—यो. शि नि. ५।२६

अतएव योगी—योगविदेव-येन केनापि योगेन वीर्यस्योर्ध्वीकरणं सम्पादयति, मृत्युञ्च जयति । एवं स्थिरवीर्यः साधकः दुष्ट मंत्र-मपि साधयति । तदेव—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"तदा मंत्रो भवेत्सिद्धो दुष्टमंत्रोऽपि सिद्धयति।"

अत एवोक्तम्—"नात्र सिद्धाद्यपेक्षाऽस्ति न वा मित्रारिलक्षणम्।
न वा प्रयासबाहुल्यं न कायक्लेशसम्भवः॥"

—प्र. प ७

अत्र—"शतमष्टोत्तरं जप्त्वा" इति।

"अष्टोत्तरशतं योनि, गर्तमध्ये जपेत्प्रिये।

—वृ. नी. तं. ६।४२

इतः पूर्वम्—"आमन्त्र्य" इति। न्यासार्थं जपेत्।

गच्छन्—नवपुष्पैरर्च्चयित्वा।

"संक्षिप्य लिङ्गं तद्योनौ घातं कुर्यात् शुचिस्मिते।"

वृ. नी. तं. १३-२६

"आलिङ्गनं चुम्बनञ्च स्तनयोर्मर्दनं तथा।
दर्शनं स्पर्शनं योनोर्विकाशो लिङ्गघर्षणम्॥
प्रवेश स्थापनं शक्तौ नवपुष्पाणि पूजने॥"

—कुलार्णवे

परमतत्त्वज्ञः—विन्दुयोगज्ञः। तथा च—

"सर्वहिंसा विनिर्मुक्तः सर्वप्राणिहितेरतः।
सोऽस्मिन् शास्त्रेऽधिकारी स्यात् अन्ये तु भ्रष्टसाधकाः॥"

—यो. हृदये

"परद्रव्येषु योऽन्धश्च परस्त्रीषु नपुंसकः।
परापवादे यो मूकः सर्वदा विजितेन्द्रियः॥
तस्यैव ब्राह्मणस्यात्र वामे स्यादधिकारणः॥"

—मेरुतन्त्रे

सहस्रं जपेत् यदि—

सहस्रस्य प्रमाणेन जपं कुर्यात् वरानने।
सप्तदिनप्रयोगेन मंत्रसिद्धिर्भवेत् प्रिये॥

—वृ. नी. तं. १३।३०

अभिघातं चुम्बनञ्च कुर्यात् स्वाभीष्टसिद्धये।
निर्लज्जकामवाणेन घृष्टं स्यात् मन्दिरं धनुः।
तस्मिन्काले साधकेन्द्रो जपेत् संशुद्धमानसः॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इत्थं कुर्वन्—"भोगेन मोक्षमाप्नोति ।"

—वृ. नी. तं. २१।३४

पशु साधनायाम् शक्तिः=नारी ।
वीर साधनायाम्—शक्तिः=प्रकृतिः ।
दिव्य साधनायाम्—शक्तिः=सुषुम्णा इति रहस्यत् ।

सर्वान्ते—

अथवा शृणु चार्वङ्गि कथयामि समासतः ।
अशुचिर्वा शुचिर्वाऽपि गच्छन् तिष्ठन् स्वपन्नपि ॥
मन्त्रैक स्मरणे विद्वान् मनसैव सदाभ्यसेत् ।
कलौ पुरश्चरो नास्ति क्षुधानिद्रातुरो यतः ॥

--का. विलास तं. ४।५-६

उपसंहरति—

पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन् स्वपञ्श्वसन् ।
प्रलपन्विसृजन्गृह्णन्नुन्मिषन् निमिषन्नपि ॥
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ।
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ॥

—गीता. ५।९-१०

तस्य निश्चयेन सिद्धिरित्यनुभवः ।
"तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।"

--गीता

सर्वरूपमयी देवी सर्वं देवीमयं जगत् ।
अतोऽहं विश्वरूपां त्वां नमामि परमेश्वरीम् ॥

इति प्रसादभाष्ये सप्तमः पटलः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अष्टमः पटलः

भैरव उवाच—

अथाचारं प्रवक्ष्यामि यत्कृते[1]ऽमृतमश्नुते ।
सर्वभूतहिते युक्तः समयाचारपालकः ॥१॥
अनित्यकर्मसन्त्यागी नित्यानुष्ठानतत्परः ।
मन्त्राराधनमात्रेण शिवभावेन[2] तत्परः ॥२॥

अथाचारमित्यादि—अस्य मन्त्रस्य आचारं वक्ष्यामि । विभिन्न-मंत्राणां आचारमपि भिन्नं भवति । अत एव उपदिशति । अनित्य-कर्म—अयमेव मंत्रः नित्यकर्म शेषास्तु सर्वे एव अनित्याः । अत एव ते त्याज्याः ।

किं नाम सदाचारः ?

साधवः क्षीणदोषास्तु स्वच्छन्द साधुवादकः ।
तेषामाचारणं यत्तु सदाचारः स उच्यते ॥
—वृ. नी. तं. १६।३

साधवः क्षीणदोषाः कथम् ? किं नाम्ना ज्ञायन्ते च ते ?

रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये ।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा ।
आप्ता शिष्टा विबुधास्ते तेषां वाक्यमशंसयम् ॥
—अ तं. सू. ११।१८

तेषामेव मार्गे प्रवेशो वाच्छन्ति गुरुजनाः । यथा—

सर्वहिंसाविनिर्मुक्तः सर्वप्राणिहितेरतः ।
सोऽस्मिन् शास्त्रेऽधिकारी स्यादन्ये तु भ्रष्टसाधकाः ॥
—यो. हृ. तं उद्धृतवचनम्

परस्यां देवतायाञ्च सर्वकर्मनिवेदकः ।
अन्यमंत्रार्चने श्रद्धामन्यमंत्रप्रपूजनम् ॥३॥

---

१. कृत्वा ।ग। २. भावन ।घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुलस्त्रीवीरनिन्दाञ्च तद्द्रव्यस्यापहारणम् ।
स्त्रीषु रोषं प्रहारञ्च वर्जयेन्मतिमान् सदा ।।४।।
स्त्रीमयं हि जगत्सर्वं स्वयं तावत्तथा[1] भवेत् ।
पेयं चर्व्यं तथा चोष्यं भक्ष्यं भोज्यं गृहं स्वयम् ।।५।।
सर्वं च[2] युवतीरूपं भावयेन्मतिमान् सदा ।
कुलजां युवतीं वीक्ष्य नमस्कुर्यात् समाहितः[3] ।।६।।
यदि भाग्यवशेनैव कुलदृष्टिस्तु[4] जायते ।
तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत् ।।७।।
बालां वा यौवनोन्मत्तां बृद्धां वा युवतीमपि ।
कुत्सितां वा महादुष्टां[5] नमस्कृत्य विभावयेत् ।।८।।
तासां प्रहारं निन्दां च कौटिल्यमपि वर्जयेत्[6] ।
सर्वथा नैव कर्त्तव्यमन्यथा सिद्धिरोधकृत् ।।९।।
स्त्रियो देवाः स्त्रियः प्राणाःस्त्रिय एव विभूषणम् ।
स्त्रीसंगिना सदा भाव्यन्यथा स्वस्त्रिया अपि[7] ।।१०।।
विपरीतरता सा तु[8] भविता हृदयोपरि ।
विपरीतरतासक्तोऽप्यष्टोत्तरसहस्रकम् ।।११।।
अष्टोत्तरशतं वापि तदा सिद्धिः प्रजायते ।।१२।।

विपरीतरता इत्यादि । अस्मिन् प्रकारे शीघ्रमेव मंत्रसिद्धिर्भवति । किन्तु विपरीतरतौ स्तम्भनस्य विशेषावश्यकता वर्तते । यथा–"विपरीत रति अपनाने से पहले इस महत्त्वपूर्ण बात पर ध्यान देना चाहिये कि–इस विधि से सम्भोग क्रिया पर पुरुष का अपना कंट्रोल नहीं रहता । उपसृतक में पुरुष का पूर्ण कंट्रोल रहता है तथा लगातार धक्के लगाने पर जब स्खलन तरंग पैदा

१. स्वयञ्चैव ।ग। २. स्वयञ्च युवतीरूपं भावयेद् यतगानसः ।ख। ३. सुसंयुतः । ४. दृष्टिः प्रजायते ।ग। ५. महानाष्टं ।ख। तथा दुष्टां ग घ। ६. मप्रियन्तथा, ख-ग-घ। ७. स्वस्त्रियामपि ख-ग। ८ विपरीतरतासक्ता ख ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

होती है तो पुरुष तुरन्त धक्के रोक देता है व लिङ्ग को बाहर खींच लेता है। सम्भोग को देर तक चलाने का यही प्रमुख उपाय है। परन्तु विपरीत रति में पुरुष का कंट्रोल नहीं रहता। अतः स्खलन की तरंग पैदा होने पर भी उसे स्त्री को रोकना कठिन हो जाता है तथा स्खलन हो जाता है।

—नरनारी पृष्ठ २५५

किन्तु जिस साधक को कम से कम तीन घण्टे का मैथुनाभ्यास है उसके लिए यह कठिन नहीं अपितु अधिक लाभप्रद है। दिव्याचारे तु—"आत्मनः पञ्च भेदाः।" यथा—

"आत्मा चैवान्तरात्मा च बाह्यात्मा चैव सुन्दरि।
निरात्मा परमात्मैतान्कथयामि समासतः॥

—स्व. तं. ११।८२

तत्र—आन्तर सूक्ष्म शरीरात्मक पुर्यारम्भक-तन्मात्र-पञ्चक मनो बुद्धयहंकारात्मकं पुर्यष्टकं, तत्सम्बन्धाद् वासनारूपैः शुभाशुभैः निबद्धः सन् योनेर्योन्यान्तरं प्रसरन्नात्मबाह्यात्मनोरन्तर्मध्ये अवस्थितत्वाद् अन्तरात्मा ज्ञेयः।

आयुर्विज्ञानेऽपि—

"प्रकृतिश्चाष्टधातुकी" —अ. तं. शा. १।१७

"खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाष्टमः।"

—अ. तं. शा. १।६३

"अत्र खादीनि सूक्ष्मभूतखादीनि तन्मात्रशब्दाभिधेयानि"

—चक्र:

"भोक्तान्तरात्मा च" —अमृतानन्दनाथ

"पुर्यष्टकसमायोगात्पर्यटेत् सर्वयोनिषु।
अन्तरात्मा स विज्ञेयो निबद्धस्तु शुभाशुभैः॥"

—स्व. तं. ११।८५

अन्तरात्मा एव कुण्डलिनीशक्तिः—प्रकृतिः इति। तस्य स्थानं स्वरूपञ्च—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नेयित्वा तं सुषुम्नाधः कन्दमूले च मारुतम् ।
इच्छा-ज्ञानक्रियारूपां कुण्डलिनीं परमेश्वरीम् ॥
प्रसुप्तां भुजगाकाराम् ।" —स्व. तं.

परमात्मा—"निर्मलत्वं यदा याति पदं परममव्ययम् ।
परमात्मा तदा देवि प्रोच्यते प्रभुरव्ययः ॥" —स्व. तं. ११।६०

परमात्मा एव प्रभुः शिवः, पुरुषः इति । तस्य स्थानं स्वरूपञ्च—

सरोरुहमधोमुखं प्रविलसत् सहस्रच्छदं—,
क्रमादरुणकेसरप्रकरभास्वरैर्निर्मलम् ।
तदन्तरपि चिन्तयेदमृतरोचिषो मण्डले,
पुराणपुरुषं परिगतं महामायया ॥ —तत्रान्तरे

इह स्थाने देवः परमशिव समाख्यातः प्रसिद्धः ।
स्वरूपी सर्वात्मा रस विरसमितोऽज्ञानमोहान्धहंसः ॥
—षट्. षच. नि.

अयं भावः—शिवः पुरुषः अधोमुखः सहस्रकर्णिकायां विराजते । शक्तिः प्रकृतिः कन्दमूले भुजगाकारा प्रसुप्ता प्राणशक्तिः कौटिल्य-धामानि हृदयादीनि ग्रन्थयः । संकोचविकासधर्मत्वात् पद्मानि तानि च अपान शक्ति प्रवाहात् अधोमुखानि सन्ति । यदा ते—

"यावत्यो नाड्यो देवि तिर्यगूर्ध्वमधः स्थिताः ।
समासेन समाकृष्टा एकीभूता भवन्ति ताः ॥
तासु ये वायवस्तेपि प्राणे समरसीगताः ।
नाड्यस्तु सुषुम्नायामेकीभूता व्यवस्थिताः ॥
—स्व. तं ४।३००-३०१

ताः कुम्भकेन रेचकेन वा समाक्षिप्ताः ऊर्ध्वस्रोता भवन्ति ।

"ते कुम्भकेन संरुद्धा विकसन्ति समन्ततः ।"
—स्व. तं. ३।३६४

"नाड्यो ग्रन्थिपद्माश्च देहे याः संव्यवस्थिताः ॥
रेचकेन समाक्षिप्ता ऊर्ध्वस्रोता भवन्ति ते ।"
—स्व. तं. ४।३६८

तत्प्रक्रिया—मंत्र आत्मा तथा नाडी एवं समरसी भवेत् ।
—स्व. तं. ४।३०२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अर्थात्—पुरुषः=शिवः ऊर्ध्वमुखो भवति—
प्रकृतिः=शक्तिः मूलकन्दादुत्थाय-सहस्रारे गत्वा,
शिवेन सह संमील्यते तदेव विपरीत रतिः ॥

मैथुनविधिः—

या नाडी सूक्ष्मरूपा परमपदगता सेवनीया सुषुम्णा,
सा कान्तालिङ्गनार्हा न मनुजरमणी सुन्दरी वारयोषित् ॥
कुर्याच्चन्द्रार्कयोगे युगपवनगते मैथुनं नैव योनौ,
योगीन्द्रो विश्ववन्द्यः सुखमयभवने तां परिष्वज्य नित्यम् ॥
—भैरवयामले

परशक्त्यात्ममिथुनसंयोगानन्दनिर्भरः ।
य आस्ते मैथुनं तत्स्यात् इतरे स्त्रीनिवेषिकाः ॥
—आत्मसार

तद् हस्तावचितं पुष्पं तद् हस्तावचितं जलम्[1]॥१२॥
तद् हस्तावचितं भोज्यं देवताभ्यो निवेदयेत् ।
सर्वं तदक्षयं प्रोक्तं देवतापूजनात् प्रिये ॥१३॥
स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियाः ।
जपस्थाने महाशंखं निवेश्योर्ध्वं जपं चरेत् ॥१४॥
स्त्रियं पश्यन् स्पृशन् गच्छन् विशेषात् कुलजां शुभाम् ।
भक्षन् ताम्बूलमत्स्यांश्च भक्ष्यद्रव्यं यथारुचि ॥१५॥
मत्स्यं मांसं तथा क्षौद्रं नानाद्रव्यसमन्वितम् ।
भक्ताद्यशेषभक्ष्याणि दत्त्वा द्रव्यं जपेन्मनुम् ॥१६॥
दिक्कालनियमो नात्र स्थित्यादिनियमो न च ।
सर्वथा पूजयेद्देवीमस्नातः कृतभोजनः ॥१७॥
महानिश्यशुचौ देशे बलिं मंत्रेण दापयेत्[3] ।
न जपे कालनियमो नार्चादिषु बलिष्वपि ॥१८॥

---

१. पय । तद्हस्तावचितमित्यादि ग-ख। पुस्तकयोर्नास्ति । २. केवलं क पुस्तके ।
३. श्लोकार्धमेतत् केवलं क पुस्तके ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वेच्छा नियमो उक्तोऽत्र महामंत्रस्य साधने ।
वस्त्रासनदेहागारस्थानस्पर्शादिवारिणाम् ॥१६॥
शुद्धि न चाचरेत्तत्र निर्विकल्पं मनश्चरेत् ।
सर्व[१] एव शुभः कालो नाशुद्धिर्विद्यते क्वचित् ॥२०॥

श्लोक प्रक्षिप्तः ।

न विशेषो दिवारात्रौ न सन्ध्यायां महानिशि ।
नात्र शुद्धेरपेक्षास्ति न चामेध्यादि दूषणम्[२] ॥२१॥
सुगन्धि शेषलौहित्यकुसुमैरच्चर्येद् दलैः ।
विल्वैर्मरूवकाद्यैश्च तुलसीविवर्जितैः शुभैः ॥२२॥
नाधर्मो विद्यते सुभ्रु किंच धर्मो महान् भवेत् ।
न स्वेच्छाचारोऽत्र गदितः प्रचरेद् हृष्टमानसः[३] ॥
कृतार्थं मन्यमानस्तु सन्तुष्टो हृष्टमानसः[४] ॥२३॥
इत्याचारपरः श्रीमान् जपपूजादितत्परः ।
पालकः कुलतत्त्वानां परतत्वे प्रलीयते ॥२४॥
उदिता कृतिरानन्दमयः[५] संसारमोचकः[६] ।
अणिमाद्यष्टसिद्धीशः साधको देवता भवेत् ॥२५॥

इति श्रीकालीतन्त्रे आचारविधिरष्टमः[७] पटलः

तदेत्यादि स्पष्टम् ।

समाप्तश्च प्रसादभाष्ये ऽष्टमः पटलः

१. श्लोकार्धमेतत् केवलं क पुस्तके । २. सर्व एवेत्यारभ्य, न चामेध्यादि दूषणम् इतः पर्यन्तं केवलं क पुस्तके विद्यते, ३. प्रचरेत् शुद्धमानसः, ख। ४. प्रचरेत् भ्रष्टमानसः, ।ख-घ। कृतार्थमित्यादि–श्लोकार्धमेतत् केवलं ।क। पुस्तके । ५. मदिरानन्दमानसः संसारमोचकः सदा, ग। मदिरानन्दचित्तस्तु संसारमोचकः सदा, घ। ६. सिद्धीनामाश्रयः साधका, ।ख। ७. आचारकथनं अष्टमः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नवमः पटलः

एवं समस्तविद्यानां राज्ञी स्तोतुं न शक्यते ।
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥१॥

एवमित्यादि–एवम्--वक्ष्यमाणस्वरूपेण विस्तृतवैभवम् । तद्वैभवं दर्शयितुमाहः–"एताः संज्ञास्तथा चान्यास्तत्र मे बहुधा स्मृताः ।
विकारयोगादन्याश्च तास्ता वक्ष्याम्यशेषतः ॥
--ल. तं. ४।४१

तत्र–निर्गुणनिर्विकाररूपमाहः—
निर्मलाकाशकल्पाहं निःसमानन्दचिन्मयी ।
अहं नारायणी नाम भावोऽहं तादृशो हरे ॥"
—ल. तं. ४।१

तथा सगुणं वैकारिकस्वरूपन्तु—
"अग्निषोममयौ भावौ दिव्यौ स्त्रीपुंसलक्षणौ ।
बिभ्रती चारु सर्वाङ्गी लोकानां हितकाम्यया ॥"
—ल. तं. ४।३७

अग्नीषोमावदधुर्या तुरीयासीद्,
यज्ञस्य पक्षावृषयः कल्पयन्तः ।
गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं,
बृहदर्कीं यजमानाय स्वराभरन्तीत् ॥
—अथर्व. ८।६।१४

ततश्च--
अग्निषोमाभ्यां कामाय मित्राय वरुणाय च ॥
तेभ्यो याचन्ति ब्राह्मणास्तेष्वावृश्चतेददत् ॥
--अथर्व. १२।४।२६

त्रिगुणात्मकं वैकारिकम् ऐश्वर्यम् ।
महालक्ष्मीः समाख्याता साहं सर्वाङ्गसुन्दरी ।
महाश्रीः सा महालक्ष्मीश्चण्डा चण्डी च चण्डिका ॥
भद्रकाली तथा भद्रा काली दुर्गा महेश्वरी ।
त्रिगुणा भगवत्पत्नी तथा भगवती परा ॥
-ल. तं. ४।३६-४०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नीमहमश्विनोभा ॥

——अथर्व. ४।३०।१

कथञ्चाहं काली—

"कल्याणरूपा भद्रास्मि काली च कलनात्सताम् ।
द्विषतां कालरूपत्वाद् अपि काली प्रकीर्तिता ॥"

—ल. तं. ४।४४

त्रैगुण्यस्वरूपमाहः—

"अऽनुज्झितस्वरूपाहं मदीयेनाल्पविन्दुना ।
महालक्ष्मीः समाख्याता त्रैगुण्यपरिवर्तिनी ॥
रजःप्रधाना तत्राहं महाश्रीः परमेश्वरी ।
मदीयं यत्तमोरूपं महामायेति सा स्मृता ॥
मदीयं सत्वरूपं यन्महाविद्येति सा स्मृता ॥"

——ल. तं. ५।३-५

सर्वसिद्धिपरा[1] भूमिरनिरुद्ध सरस्वती ।
तस्मादस्या ज्ञानमात्रात् सिद्धयोऽष्टौ भवन्ति हि ॥२॥

सर्वेत्यादि–अनिरुद्ध सरस्वती=अनिरुद्धा रोधशून्या, अप्रतिवद्धा ।

सरस्वती–वाग्देवता । यथा–

"स्वरा स्वरणशीलत्वात् गेयाख्याः सप्त कीर्तिताः ।
अतिप्रापणदाने वा तेन देवी सरस्वती ॥"

——देवीपुराणे ४५ तमेऽध्याये

पुनश्च–अनिरुद्धाः—

"ततस्तया क्रियाशक्त्या लब्धावेशा चिकीर्षया ।
युज्यमानानिरुद्धाख्यां लम्भिता तत्त्वकोविदैः ॥

—ल. तं. २।४८

अत्र–पालनकर्तृत्वः । शक्तितेजसोः समुन्मेषः । तथा च– "षाड्गुण्याद् वासुदेवः पर इति स भवान्भुक्तभोग्यो बलाढ्य-बोधात्संकर्षणस्त्वं हरसि वितनुषे शास्त्रमैश्वर्यवीर्यात् । प्रद्युम्नः

१. सर्वशुद्धेः 'परा', क। "सर्वसिद्धेः 'परा" इत्येव पाठः समीचनतया प्रतिभाति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्गधर्मौ नयसि च भगवन् शक्तितेजोऽनिरुद्धो बिभ्राणः पासि सत्त्वं गमयसि च तथा व्यूह्य रङ्गाधिराजः।" इति तत्त्वप्रकाशिनी।

माण्डूक्योपनिषदि—एक एव ईश्वरो व्यष्टि-समष्टयात्मकदेहत्रये स्थूलादि प्रविभक्त स्थूलादि रूपमवष्टभ्य विश्वतैजसप्राज्ञ-विश्वादि रूपेण त्रिधास्थितः सन् वाह्यान्तर्घनप्रज्ञतां भवति। यथा—

"बहिः प्रज्ञो विभुर्विश्वो ह्यन्त प्रज्ञस्तु तैजसः।
घन प्रज्ञस्तथा प्राज्ञ एक एव त्रिधा मतः॥
तक्षिणाभिमुखे विश्वो मनस्यन्तस्तु तैजसः।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः॥
विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्त भुक्।
आनन्द भुक् तथा प्राज्ञस्त्रिधा भोगं निबोधतः॥
स्थूलं तर्पयते विश्वं प्रविविक्तस्तु तैजसम्।
आनन्दश्च तथा प्राज्ञं त्रिधातृप्ति निबोधत॥"

— मा. नि. आगम प्र. १–४

अनिरुद्ध सरस्वत्या ज्ञानमात्रेण साधकः।
पाण्डित्यंच कवित्वं च वागीशसमतां व्रजेत्॥३॥

अनिरुद्धेत्यादि—अनिरुद्धसरस्वतीः ब्रह्मस्वरूपात्मिका शक्तिः। ब्रह्मज्ञाने जाते न किमपि ज्ञातव्यमवशिष्यते। अत एवोच्यते—साधकः ज्ञानमात्रेणैव साधकः पाण्डित्यं कवित्वं वागीशत्वञ्च प्राप्यते। किं नाम पाण्डित्यम् ?

स्वकार्ये परकार्ये वा यस्य बुद्धिस्थिरा भवेत्।
एतदेव हि पाण्डित्यं शेषाः पुस्तक वाचकाः॥

—स्व. तं. १०।७२

तस्य पाण्डित्य-वैदग्ध्य-विचित्रपदकल्पनात्[1]।
देवा अपि विलज्जन्ते किं पुनर्मानवादयः॥४॥
अस्ति चेत् त्वत्समा नारी मत्समः पुरुषोऽस्ति चेत्।
अनिरुद्धसरस्वत्याः समो मन्त्रोऽस्ति वै तदा॥५॥

१. पदजल्पनात्, ।ख-घ। पाठजल्पनात्, ।ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तस्येत्यादि–द्वाविंशत्यक्षरात्मिका-अनिरुद्धसरस्वती विद्या साधनेन अलौकिकं पाण्डित्यं प्राप्यते । तन्मन्त्रसाधने पुरुषो मत्समः, नारी च त्वत्समा भवेत् तदैव सिद्धिं विन्दते । "सस्त्रीको धर्ममाचरेत्"–इत्यर्थः ।

अस्या जपो ब्रह्मजपो ज्ञानमस्यात्मचिन्तम् ।
योगसन्धारणा सम्यग् ध्यानमस्या न संशयः॥६॥

अस्येत्यादि–अस्याः–द्वाविंशत्यक्षरात्मिकानिरुद्धसरस्वतीजप एव ब्रह्मजपः । यथा–

हंसविद्यामिमां लब्ध्वा गुरुशुश्रूषया नरः ।
आत्मानमात्मना साक्षाद्ब्रह्मबुद्ध्वा सुनिश्चलम् ॥
––ब्र. वि. उप. २७

तस्या विद्याया जपः । अस्या ज्ञानमेव आत्मज्ञानम् । अस्या–योगसंधारणमेव ध्यानम् । ध्यानफलमाहः–

आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा ।
वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः ॥
—ष. च. नि १३

अनिरुद्धसरस्वती—

"भोक्तृभोग्यसमष्टिस्तु निलीना तत्र तिष्ठति ।
मनोभूतस्य देवस्य तस्या हन्ता तु या स्मृता ॥
साहं सरस्वती नाम वीर्यैश्वर्यविवर्तिनी ।
यो मे तस्याः समुन्मेष सोऽनिरुद्धः प्रकीर्तितः ॥
––ल. तं. ६।१०–११

अस्याः स्वरूपम्—

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वतीः स्वपसः सदन्ताम् ॥
—अथर्व. ५।१२।८

देवा होतारः ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वयाभिगृणन् गृणाता नः स्विष्टये ।
तिस्रो देवीर्बर्हिरेदं सदन्तामिडा सरस्वती मही भारती गृणाना ॥
––अथर्व. ५।२७।६

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देवा अदुः सूर्यो अदाद् द्यौरदात् पृथिव्यऽदात्।
तिस्रः सरस्वतीरदुः सचित्ता विषदूषणम्॥
—अथर्व. ६।१००।१

अत्र—"इडा-सरस्वती-भारतीति तिस्रो देव्यः—नाड्यः-साहचर्यात् सरस्वत्य उच्यन्ते।"—इति सायणः। सा एव—ब्रह्मनाडीति कथ्यते। अर्थाद्—मूलाधारात्सहस्रार पर्यन्तं या तन्तूपमा नाडी अस्ति तदेव ब्रह्मनाडी। अयं भावः—

"मध्ये सुषुम्णा तन्मध्ये वज्राख्या लिङ्गमूलतः।
तन्मध्ये चित्रिणी सूक्ष्मा विसतन्तुसहोदरा।
मूलमूलात् सहस्रारस्तदन्तर्ब्रह्मनाडिका॥"
— तंत्रान्तरे

कुण्डलिनी जागरण के पश्चात् साथ-ही-साथ इडा-पिङ्गला में प्रवाहमानस्रोत सूक्ष्मता को प्राप्त करता हुआ सुषुम्ना के मार्ग में प्रवेश करता है। एवं सुषुम्ना के मार्ग से भी ऊर्ध्व उठता हुआ क्रम से और भी सूक्ष्मता प्राप्त करता रहता है। इसी रूप में जीव की शक्ति को वज्रा और चित्रिणी नाडी का भेद करके अवशेष में—ब्रह्मनाडी अथवा आनन्दमय कोश में गमन करना पड़ता है। बस, यही ऐश्वर्यावस्था है। जिस समय में आनन्द-कोश की तरफ भी ध्यान नहीं रहता, उस समय गुणातीत परम साम्यावस्था की प्राप्ति होती है।" ——भा सं सा. पृ. ३११

पिण्डार्थः—त्रितयगुणमयो सुषुम्ना, मध्ये वज्रा, तन्मध्ये चित्रिणी तन्मध्ये ब्रह्मनाडी-आनन्दमयकोशः। प्रपञ्चस्तु—

मेरो र्बाह्ये प्रदेशे शशि-मिहिर-शिरे सव्य-दक्षे निषण्णे,
मध्ये नाडी सुषुम्णा त्रितयगुणमयी चन्द्रसूर्याग्निरूपा।
धूस्तूर-स्मेर-पुष्प-ग्रथिततमवपुः कन्दमध्याच्छिरःस्था,
वज्राख्या मेढ्रदेशाच्छिरसि परिगता मध्येऽस्या ज्वलन्ती॥१॥
तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या,
लूतातन्तूपमेया सकलसरसिजान् मेरुमध्यान्तरस्थान्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भित्वा देदीप्यते तद्ग्रन्थरचनया शुद्धबोधस्वरूपा,
तन्मध्ये ब्रह्मनाडी हरमुख कुहरादादिदेवान्तसंस्था ।।२।।

—ष. च. नि. १–२

एषा ब्रह्मनाडी तन्त्रयोगे-अनिरुद्ध-सरस्वतीति कथ्यते । उपनिषद् योगे–"ब्रह्मपथः"–प्रसिद्धः । अस्याः प्रसादेनैव सर्वविधमैश्वर्यं प्राप्यते–

आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा ।
वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः ।।

—ष. च. नि. १३

अत एवोक्तम्—पाण्डित्यम् आत्मचिन्तनमित्यादि ।

महापदि महापापे महाग्रहनिवारणे ।
महाभाये महोत्पाते महाशोके महाजये[1] ।।७।।
महामोहे महासौख्ये महादारिद्रचसंकटे ।
महारण्ये महाशून्ये महाज्ञाने[2] महारणे ।।८।।
दुरात्मने[3] दुरावासे दुर्भिक्षे दुर्निमित्तके ।
समस्तक्लेशसंघाते स्मरणादेव नाशयेत् ।।९।।

महापदीत्यादि त्रिविधदुःखानां प्रज्ञापराध एव मूलम् । यथा–

दारिद्रचदुःखरोगाश्च बन्धनव्यसनानि च ।
आत्मापराधवृक्षस्य फलान्येतानि देहिनाम् ।।

—कु. तं. १।५४

प्रज्ञापराधसम्प्राप्ते व्याजौ कर्मज आत्मनः ।
नाभिशंसेद् बुधो देवान्न पितृन्नपि राक्षसान् ।।
आत्मानमेव मन्येत कर्त्तारं सुख-दुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत् नो त्रसेत् ।।

—अ. तं. नि. ४।२४–२५

---

१. महामये, ।ख। महोत्सवे, ।ग-घ। । २. महाज्ञाने, ।ख-घ। । ३. दुराध्वाने, ।ख। दुरापदे, ।ग–घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अत्र–आत्मापराधः=प्रज्ञापराधः । आत्मानमेव-प्रज्ञामेव । आत्मा= बुद्धिः ।

'आत्मा यत्नो धृतिर्बुद्धिः स्वभावोवर्ण्य एव च" –इत्यमरः
"चित्ते धृतौ बुद्धौ च" –इति धरणिः ।

तद्विनाशाय–प्रज्ञापराधनिवारणाय महाविद्याजपं सर्वोत्तमोत्तममुपायं वर्तते । द्वाविंशत्यक्षरात्मकज्ञानेन-ध्यानेन तज्जपेन च स्थितप्रज्ञो जायते । स्थितप्रज्ञस्य-विशुद्धबुद्धस्य प्राक्तनकर्माण्यपि विनश्यन्ति ।

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।।
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ।।

—गीता ५।१६–१७

"अनया विद्यया प्रभावेन स्थितप्रज्ञः प्रजायते ।"

अस्या ज्ञानं ब्रह्मज्ञानं[1] ध्यानमध्यात्म चिन्तनम् ।
तस्मादस्याः समा विद्या नास्ति तंत्रे न संशयः ।।१०।।
श्मसानशयनो वीरः[2] कुलस्त्रीभिर्व्यवहारवान् ।
कुलामृतनिवेषी च काली तन्त्रार्थचिन्तकः ।।११।।
ब्रह्मादिभवने तस्य समो नास्ति कुतःपरः[3] ।
स एव सुकृती लोके स एव कुल भूषणः।।१२।।
धन्या च जननी तस्य येन देवी समर्चिचता ।
वक्त्रे सरस्वती तस्य लक्ष्मीस्तस्य सदा गृहे ।।१३।।
तीर्थानि देहे तिष्ठन्ति येन देवी समर्चिचता ।
धनेन धननाथश्च तेजसा भास्करोपमः ।।१४।।
बलेन[4] पवनो ह्येष येन देवी समर्चिचता ।
गानेन तुम्बरूः साक्षाद्दाने कर्ण समस्तथा[5] ।।१५।।

---

१. ज्ञानमेव, ।ख ग घ। २. श्मसाने शयने वीरः, ।ख। श्मसाने वीरशयनः ।
३. समोऽस्ति किमु चापरः, ।ख। ४. वेगेन, ।ग घ। ५. दानेन वासवो यथा, ।ख। देश्वर्ये वासवो यथा, ।घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दत्तात्रेयसमो ज्ञानी येन देवी समर्चिचता ।
वह्निरिव रिपोर्हन्ता गंगेव मलनाशकः ॥१६॥
शुचौ शुचिसमः साक्षादिन्दोरिव[1] सुखप्रदः ।
पितृदेवसमः शास्ता कालस्येव दुरासदः ॥१७॥
वागीश इव गम्भीरो निर्घात इव[2] दुर्धरः ।
बृहस्पतिसमो वाग्मी धरणीसदृशः क्षमी ॥१८॥
कन्दर्पसदृशः स्त्रीणां[3] येन देवी समर्चिता ।
अहोभाग्यमहोलोके कुलज्ञानपरायणः[4] ॥१९॥
तेषां मध्येऽपि यः[5] कोपि कालीसाधनतत्परः ।
त्यजसि त्वं वरं चैतत्[6] पुमांसं परमं तथा ॥२०॥
मादृशन्तु[7]क्वचित् काले त्यजसित्वं न कदाचन[8] ।
काली ज्ञानिनमासाद्य न त्यजसि कदाचन ॥२१॥
नहि कालीसमा विद्या[9] नहि कालीसमं फलम्[10] ।
नहि काली समं ज्ञानं नहि काली समं तपः ॥२२॥
ये गुणाः परमेशस्य पञ्चकृत्यविधायिनः ।
ते गुणाः संतिसर्वज्ञे[16] कालीतत्त्वस्य नान्यथा ॥२३॥
कालिकाहृदयज्ञानी लतासाधनतत्परः ।
देववन्मानवो भूत्वा लभेन्मुक्ति च शाश्वतीम्[12]।२४।
इति ते कथितं सम्यक् कालिकातत्त्वमुत्तमम्[13] ।
अनेन सम्यगास्थाय सर्वधर्मफलं[14] लभेत् ॥२५॥
इति श्रीकालीतन्त्रे विद्याफलविधिर्नाम नवमः[15] पटलः ।
प्रसादभाष्ये नवमः पटलः समाप्तश्च

१. विन्दु ।ग। २. नृसिह इव, ।ख। निर्भर्त्तेरिव, ।ग घ। ३. स्त्रीषु, ।ग। ४ कूल· ज्ञानी भवेन्नरः, ।घ। ५ तेषां मध्ये च यः कोऽपि, ।घ। ६. परञ्चैव, ।ख। ७. न कदाचित्। ।ग घ। ८ महेशस्तु: ।घ। ९. जगन्मये, ।ख। शुचिस्मिते, ।ग घ। १०. पूजा, ।ख। ११. श्लोकार्धमेतत्, ।ग घ। पुस्तकयोर्नास्ति । १२. सर्वेऽपि, ।घ। १३ चतुर्विधाम्. ।ख ग। १४. काल्यास्तत्त्वमनुत्तमम्, ग घ। १५. सर्वकामफलं, ।ख ग घ। १६. विद्यापटलेनवमः, ।क। ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दशमः पटलः

यथा काली तथा दुर्गा यथा दुर्गा तथोन्मुखी ।
यथा तारा तथा काली[1] यथा नीला तथोन्मुखी[2] ॥१॥
दुर्गाया कालिकायास्तु ध्यानं सममिहोच्यते[3] ।
महाचीनक्रमेणैव तारा शीलफलप्रदा ॥२॥
गन्धर्वाख्यक्रमेणैव पञ्चमी भुक्तिमुक्ति दा[4] ।
महाचीन[5] क्रमेणैव कालिका फलदायिनी[6] ॥३॥
कालिकोग्र मुखी शस्ता दत्तात्रेय विभाविता[7] ।
सप्तसप्तति भेदेन श्रीविद्या[8] विदिता भुवि ॥४॥
तासांतु समता ज्ञेया गुप्तसाधनसाधने ।
चत्वारिंशत् प्रकारा च भैरवी परिकीर्तिता ॥५॥
तासान्तु समता ज्ञेया गुप्तसाधनसाधने ।
या या विद्या महाचण्डा तासामेब विधिर्मतः ॥६॥
महाचीनक्रमेणैव छिन्नमस्ता च सिद्धिदा ।
यस्मिन्मंत्रे य आचारस्तस्मिन् धर्मस्तु तादृशः ॥७॥
कृतार्थस्तेन जायते स्वर्गो वा मोक्ष एव वा[9] ।
भ्रान्तिरत्र न कर्त्तव्या सिद्धिहानिस्तु जायते ॥८॥
विशुद्धचित्तोऽत्र भवेत्सिद्धि स्यादपवर्गदा ।
एवंतु तत्क्षणादेव[10] सिद्धिर्विस्मयो नास्ति चापरः ॥९॥

---

१. नीला, ।ग। २. श्लोकार्धमेतत्, ।घ। पुस्तके नास्ति । ३ सम्यगिहोदितम् ।ख।
४ मतिदुर्लभा, ।ल ग घ। ५. महानील, ।ख ग। ६. सिद्धिदायिनी, ।घ। ७ ब्रिमा-
विना, ।ख ग घ। ८. महाविद्या, ९. स्वर्गं वा मोक्षमेव वा, ।क। मुक्तिरेव वा,
।ख। मोक्षश्च एव वा । १०. तत्र तत्र क्षणात् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विस्मिता विलयं यान्ति पशवः शास्त्रमोहिताः ।

भैरव उवाच—

कालिका हृदयं विद्यां सिद्धिविद्यां महोदयाम् ॥१०॥
पुरा येन यथा जप्त्वा सिद्धिमापुर्दिवोकसः ।
कामाक्षरं वह्निसंस्थमिन्दिरा नादविन्दुभिः ॥११॥
मंत्रराजमिदं ख्यातं दुर्लभं पापचेतसाम् ॥११½॥

पुरा इत्यादि—पुरा काले येन मंत्रेण दिवौकसः सिद्धि प्राप्नुयुः तमाह कामाक्षरमिति—कामाक्षरम्-ककारः, वह्नि संस्थं-रेफसंस्थं, इन्दिरा-ईकारः नादः—विन्दुश्च एतैर्युक्तम् । तेन "क्रीं" इत्यायातः । मंत्रार्थस्तु—

"क" काली ब्रह्म "र" प्रोक्तं महामायार्थकश्च "ई" ।
विश्वमातार्थं को "नादो" "विन्दु" दुःखहरार्थकः ॥
तेनैव कालिकादेवी पूजयेद्दुःख शान्तये ।
—प्राणतोषिणी

"तृतीयं शृणु कल्याणि ! दीप संस्थ प्रजापतिः ।
गोविन्द विन्दु संयुक्त साधकानां सुखावहः ॥"
—महानिर्वाणतन्त्रे

अत्र—प्रजापतिः—क, दीपसंस्थः=र गोविन्द=ई तथा विन्दुः इति "क्रीं"

सुलभं शुभदं भक्त्या साधकानां महात्मनाम् ॥१२॥

इत्येकाक्षरो मंत्र—"क्रीं" उच्चारणभेदात् "करीम" सर्वेषामेव सुलभम् । शुभदम्-सौख्यकरम् । भक्त्या-श्रद्धया न तु तर्केण साधकानाम्—यतताम् महात्मनाम्—न तु दुरात्मनाम्—

"परद्रव्येषु योऽन्धश्च परस्त्रीषु नपुंसकः ।
परापवादे यो मूकः सर्वदा विजितेन्द्रियः ॥"
—मेरुतन्त्रे

त्रिगुणा तु विशेषेण सर्वशास्त्र प्रबोधिकाः ।
अनया सादृशी विद्या नास्ति सारस्वतप्रदा ॥१३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्र्यक्षरविद्यामाह—"त्रिगुणा" इति। एकाक्षरी विद्या त्रिगुणा त्रिधा स्थिता। एतेन क्रीं क्रीं क्रीं इति त्र्यक्षर मंत्र आयातः। तन्मनुः—विशेषेण सर्वशास्त्रप्रबोधक अत एव सारस्वतप्रदश्च वर्तते। एकाक्षर-त्र्यक्षर मंत्रयोस्तु ध्यानपूजादिकं प्रयोगः पुरश्चरणश्च सर्वं द्वाविंशत्यक्षर मंत्रवत्।

आकर्षण-वशीकार - मारणोच्चाटनं तथा।
शान्ति पुष्टयादि कर्माणि साधयेदनयाचिरात् ॥१४॥
किं वक्तव्यमनेनापि वर्णितुं नैव शक्यते।
जिह्वाकोटिसहस्त्रैस्तु वक्त्रकोटिशतैरपि ॥१५॥
अनया सदृशी विद्या अनया सदृशो जपः।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥१६॥
ध्यानं पूजादिकं सर्वं साधनञ्च पुरश्क्रिया।
अनिरुद्ध सरस्वत्याः समानं सर्वमीरितम्[1] ॥१७॥

फलश्रुतिमाह—आकर्षणेत्यादि स्पष्टम्।

रक्तैराकार्षणे पुष्पैः पीतैः स्तम्भनकर्मणि।
मारणे कृष्णपुष्पैश्च पूजयेद् घोरदक्षिणाम्[2]॥१८॥
आद्यैकं बीजं बीजानां तथैवान्तेऽपि चैककम्[3]।
दक्षिणे कालिके चेति मध्ये संयोज्य मंत्रवित्[4]॥१९॥
स्वाहान्तं मंत्रमुच्चार्य भवेदाकर्षणं महत्।
लोहितांकुशहस्ताञ्च[5] एकशूलधरान्तथा ॥२०॥
महाकालसमासीनां[6] ध्यात्वा चाकर्षणं महत्[7]।
स्थावरं जंगमञ्चैव पातालतलगन्तथा[8]॥२१॥
आकर्षयति मंत्रज्ञः किमन्यद् भुवि योषितः।
अयुतैकजपः प्रोक्तः सदाकर्षणकर्मणि ॥२२॥

---

१. समं पूर्ववदाचरेत्, ।ख। साधनं सर्वमीरितम्, ।ग। साधनं पूर्वं मीरितम्।
२. पूजयेदेव दक्षिणाम्, ग। ३. अस्य कैकन्तु बीजानां तथैवान्ते चैककम्, ख। आद्यं कन्तु बीजानां तथैवान्ते च एककम्, ग घ। ४. श्लोकार्धमेतत् क पुस्तके नास्ति।
५. लोहितांगुली हस्ता च एक शूलधरा तथा ।ख ग घ। ६. महाकालाग्रनासीनाम् ।ख ग घ। ७. भवेत्, ख। चरेत् ग घ। ८. तलगा, ख ग।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रयोगमाह—रक्तेत्यादि—स्पष्टम् ।

अथान्यत्[1] सम्प्रवक्ष्यामि वशीकरणमुत्तमम् ।
कूर्च्च-लज्जाद्वयं वीजद्वयं ठान्तं[2] तथैव च ॥२३॥
योजायित्वा जपेद् विद्यामयुतं[3] वशयेद्ध्रुवम्[4] ।
ध्यानमस्याः[5] प्रवक्ष्यामि येन वश्यं जगत्त्रयम् ॥२४॥

प्रयोगान्तरमाहः—कूर्च्चं-हूंकारः, लज्जाद्वयम्=ह्रीं ह्रीं वीजद्वयं निजबीजद्वयमिति क्रीं क्रीं ठान्तः-स्वाहा । अथ ध्यानम्—

नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम् ।
जटाजूटसमासीनां[6] महाकालसमीपगाम्[7] ॥२५॥

नागेत्यादि—एनां विशेषणयुक्तां भगवतीं ध्यायेत् जपेच् च । तेन--

एवं कामशराविद्धा[8] विह्वलां काममोहिता ।
स्वं स्वं संत्यज्य[9] भर्त्तारम् यांति लोकत्रयांगना[10]:॥२६॥

अथ सिद्धविद्यामाह--

अथ वक्ष्ये महाविद्यां सिद्धविद्यां[11] महोदयाम् ।
भैरवेण पुरा प्रोक्ता[12] कालीहृदयसंज्ञिता[13]॥२७॥
अस्या ज्ञानप्रभावेण कलयामि जगत्त्रयम् ।
प्रणवं पूर्वमुद्धृत्य[14] हृल्लेखावीजसमुद्धरेत् ॥२८॥
रतिवीजं समुद्धृत्य[15] पपञ्चम भगान्वितम् ।
ठ-द्वयेन समायुक्ता विद्याराणी मयोदिता[16] ॥२९॥

---

१. तयान्यत्, क। २. कूर्च लज्जा द्वयं वीजं द्वयश्चान्ते, ख। वीजद्वयश्चान्ते ख। वीजद्वयं ठान्तं, घ। ३. नियुतं, ग घ। ४. वश्य कर्मणि, ग घ। ५. मंत्र, ग। मंत्र, घ। ६. जटा-जूटञ्च सम्विन्त्य, घ। ७. समीपतः, क। ८. काम समाविद्या, क। काम समा विद्धा, ख। ९. निर्लज्जा विक्लवाः स्त्रियः, ग। १०. सिद्धिविद्यां, ख घ। ११. प्रोक्तां, ग। १२. संस्थिता, क। संज्ञिताम्, ग। १३. मुच्चार्य, क। १४. समुच्चार्य, क। १५. प्रकीर्तिता, ख। १६. महोदया, घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अनया सदृशी विद्या कालिकायास्तु दुर्लभा ।
भैरवोऽस्य ऋषिःप्रोक्तो विराट्छन्दउदीरतम्[1]।।३०।।
सिद्धकाली ब्रह्मरूपा देवता भुवनेश्वरी ।
रतिबीजं बीजमस्या हृल्लेखा शक्तिरुच्यते ।।३१।।
हृल्लेखया षड्दीर्घेण प्रणवाद्येन कल्पयेत् ।
अंगषट्कं ततो न्यस्यध्यात्त्वा देवीं शिवो भवेत् ।।३२।।

अथ इत्यादि—काली हृदय संज्ञिताम् सिद्धविद्यात्राह—"ॐ ह्रीं क्रीं मे स्वाहा" इति षडक्षरमंत्र स्वरूपाम् महाविद्यामिति भैरवेण पुरा काले प्रोक्ता। तामाह-हृल्लेखा-ह्रीं रतिबीजं-क्रीं। भगं एकारः तेन पुनः पपञ्चम=मकारः एकार युक्तेन "मे" इति। ठद्वयं=स्वाहा। अस्य महाकाल भैरव ऋषिः। विराट् छन्दः। सिद्धकाली ब्रह्मरूपा भुवनेश्वरी देवता, क्रीं बीजं, ह्रीं शक्तिः। ओं ह्रां हृदयाय नमः, इत्यदि क्रमेण द्वाविंशत्यक्षरमंत्रवत् कराङ्गन्यासौ कुर्यात्। सिद्धकाली ब्रह्मरूपा भुवनेश्वरी तु दक्षिणकालिका एव रूपभेदः।

खड्गोद्भिन्नेन्दु विम्बस्रवदमृत रसाप्लावितांगी त्रिनेत्रा,
सव्ये पाणौ कपालाद् गलदमृतमथो[2] मुक्तकेशी पिवन्ती।
दिग्वस्त्रा बद्धकाञ्ची मणिमयमुकुटाद्यैर्युता दीप्तजिह्वा,
पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डलालीढपादा।३३।

सिद्धकालो—ब्रह्मरूपा-भुवनेश्वरीध्यानमाह—खड्गोद्भिन्नेन्द्वित्यादि। खड्गेन—दशहस्तस्थितेन उद्भिन्नं-विदीर्णं यद् इन्दु विम्बं-चन्द्रमण्डलम्, तस्मात् स्रवत्-क्षरद् यो मृतरसः, तेन आप्लावितं अंगं यास्या सा=खड्गोद्भिन्नेन्दु विम्बस्रवदमृतरसाप्लाविताङ्गी। सव्ये पाणौ कपालात् वामहस्तस्थित कपालभाजनात् गलत्-पतत्-अमृतं सुधां पिवन्ती-पानशीला। एतेन द्विभुजा-दक्षहस्ते खड्गः, वामहस्ते-पानपात्रं नरकपालपात्रम्, इति स्वरूपम्। त्रिनेत्राम्-त्रीणि चन्द्रसूर्याग्निरूपाणि नयनानि यस्या सा। यद्वा—देवीपुराणे ४५ अध्याये—

१. उदाहृतम्, ख ग घ। २. गलदसृज, ख घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पक्षिणां चोत्तरं लोकं तथा ब्रह्मायनं परम्।
नयं सन्मार्गधर्मत्त्वं दृष्टौ नियमामृता॥

तथा च श्रुतिः—"सैवेयमग्न्यानने ज्वलतीति विचिन्त्य त्रि-ज्योतिषमीश्वरम्" मुक्तकेशी। दिग्वस्त्रा। बद्धकाञ्ची बद्धनरकरे-रिति शेषः, काञ्ची मेखला यया सा। मणिमयमुकुटाद्यैराभूषणं-र्युता। दीप्तजिह्वा दीप्ता प्रकाशमाना यस्या सा ललज्जिह्वा इत्यर्थः। नीलोत्पलाभा-नीलोत्पलस्येव आभा कान्ति यस्या सा--नीलोत्पलसदृशनीलवर्णा इत्यर्थः। रविशशिविलसत्कुण्डला—रविशशिभ्यां विलसन्ती शोभमाने कुण्डले कर्णभूषणे यस्याः सा। आलीढपादा-वामपादमग्रतो विन्यस्य अवस्थिता—"आलीढं वाम-पादन्तु प्रत्यालीढं तु दक्षिणम्।" प्रथमे पटले व्याख्यातम्। अत्र—अनुक्तेपि शवरूप महादेवोपरिस्थिता इत्युन्नेयम्। सम्प्रदाय स्वरसात्। "आलीढ पादा" इत्युक्तेश्च। तेन शवरूप-महादेवस्य हृदये वामपादं उरुद्वये विन्यस्यावस्थितेति ज्ञेयम्। एवंभूता भगवती दक्षिणकाली पायात्-सदा रक्षेत्।

जपेद् विंशतिसाहस्रं सहस्रकेण संयुतम्।
होमयेद्दशांशेन मृदुपुष्पेण मन्त्रवित्॥३४॥
त्रिकोणं कुण्डमालिख्य[1] सिद्धविद्यः शिवो भवेत्।
पूजनंच प्रयोगंच दक्षिणावदुपाचरेत्॥३५॥

जपेदित्यादि—मन्त्रवित्-मन्त्रशास्त्रवेत्ता। गुरुमुखात्-मंत्रज्ञान-मधीत्य प्रयोगं कुर्यात्। तदेव—सिद्धविद्यो भवति। त्रिकोणकुण्डम्—त्रिकोणम्—त्रयकोणा यस्य तत्त्रिकोणम्। "योनिः" इति शब्दार्थ-कल्पतरुः। कामरूप-पीठविशेषः। त्रिकोणकुण्डम्—योनि-कुण्डम्—

"कुण्डस्यरूपं जानीयात्परमं प्रकुतेर्वपुः।
प्राच्यां शिरस्समाख्यातं बाहूदक्षिण सौम्ययोः॥

१. कुण्डमासाद्य, ।ख ग घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उदरं कुण्डमित्युक्तं योनिः पार्दो तु पश्चिमे।

—प्र. सा. सा. सं ७ तमे पटले

होतुरग्रे योनिरासामुपर्यश्वत्थपत्रवत् ।
मुष्टचरत्नेक हस्तानां कुण्डानां योनिरीरिता ॥
षट्चतुर्द्वयङ्गुलायाम् विस्तरोन्नतिशालिनी।
एकाङ्गुलन्तु योन्यग्रं कुर्यादीषदधोमुखम् ॥
एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वय-क्रमेणैव योन्यग्रमपि वर्द्धयेत् ॥
स्थलादारभ्यनालं स्याद् योन्यामध्ये सरन्ध्रकम् ॥"

—शारदातिलके

आसां मेखलानां अश्वत्थ पत्रवत् इत्यनेन चतुरंगुलविस्तृत-मूलात् । यथोक्त क्रमेण एकाङ्गुलान्तः संकुचित विस्तारा ।

"नाल मेखलयोर्मध्ये परिधेः स्थापनाय च।
रन्ध्रं कुर्यात्तथा विद्वान् द्वितीय मेखलोपरि ॥"

—यामले

"तस्मात्सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम् ।
हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि ॥"

—वशिष्ठ संहिता

एकाक्षर्य्या महाकल्पसमानं सर्वमेव वा ॥३५½॥

एकाक्षरीत्यादि । एकाक्षर मंत्र विधानं विभिन्न तन्त्रेषु दृष्टव्यम् । यथा—ह्रीं मनोः पपञ्चसारसंग्रहे नवमे पटले दृष्टव्यम् । प्रयोगाः—

रक्तपद्मस्य[1] होमेन साक्षाद् वैश्रवणो[2] भवेत् ॥३६॥
विल्वपत्रस्य होमेन राज्यं भवति[3] निश्चितम् ।
रक्तप्रसूनहोमेन वशयेदखिलं जगत् ॥३७॥
पीतपुष्पस्य होमेन स्तम्भयेद्वायुमप्यथः[4]।

---

१. रक्तपुष्पस्य, क। २. वैश्वानरो, क। ३. प्राप्नोति, ख। ४. यद्वि, क।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मालतीपुष्प होमेन साक्षात् वाक्पतिसन्निभः ॥३८॥
कृष्णपुष्पस्य होमेन शत्रून्मारयतेऽचिरात् ॥३८½॥

होमसंख्या—

अस्य सर्वस्य होमस्य[1] संख्यास्यादयुतावधि[2] ॥३९॥

पुनः फलश्रुति माहः—

अस्या स्मरणमात्रेण महापातककोटयः ।
सद्यः प्रलयमायान्ति साधकः खेचरो भवेत् ॥४०॥

अस्या इति—खेचरः=खेचरी मुद्रा सिद्धः । तामाह—

चित्तं चरति खे यस्माज्जिह्वा चरति खे गता ।
तेनैषा खेचरी नाम मुद्रा सिद्धैर्निरूपिता ॥
यो जनानां शतं गच्छेदनायासेन साधकः ।
स्त्रीणां शतं गच्छेच्छक्र स्तम्भकरी मता ॥
वीर्यस्तम्भन विधिस्तु परिशिष्टे द्रष्टव्या ।

इति श्रीकालीतन्त्रे सिद्धविद्याफलविधिः[3] दशमः पटलः ।

समाप्तश्च प्रसादभाष्ये दशमः पटलः

१ सर्वेषु होमेषु, ग। २. मालती पुष्पेत्यारभ्य अयुतावधि इतः पर्यन्तम् क पुस्तके नास्ति । ३. सिद्धविद्यापटले ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एकादशः पटलः

भैरव उवाच--

अथोच्यते कालिकायाः सामान्यसाधनं प्रिये ।
कृतेन येन विधिवत् पलायन्ते महापदः[1] ॥१॥
शिवाबलिश्च दातव्यः सर्वसिद्धिमभीप्सुभिः ॥१½॥

शिवाबलि विधानम्—तत्र प्रशस्त प्रदेशाः—

शून्यालयं रुद्रगृहं श्मसानं चतुष्पथं मातृगृहं जलान्तम् ।
वन्ध्यावनिश्चत्वरमेवमाद्या बलिप्रदानाय मताः प्रदेशाः ॥

—श्रीवसन्तराजशाकुने

विल्वमूले प्रान्तरे वा श्मसाने वाथ साधकः ॥"

—कुलचूडामणि निगम ७।४०

विधिः—प्राप्याष्टमीं वाथ चतुर्दशी वा संमन्त्र्य मंत्रणञ्च सप्तकृत्वः ।
बलिं शिवाया निशि निश्चयेन दद्यान्मनुष्यो यदि भद्रमिच्छेत् ॥

—श्री. व. रा. शा.

तस्मिन् विचित्रं विततं विदध्यात् पिष्टाक्तकेनाष्टदलं सरोजम् ।
सम्पूजयेत्तत्र सुराधिपादीन् क्रमेण सर्वानपि लोकपालान् ॥
मध्ये सुतैः पञ्चभिरम्युमेता शिवान्विता पिष्टमयी प्रसन्ना ।
पूज्या शिवा तुष्यति भक्तियोगात् प्रभूत-पुष्पाक्षतधूपदीपैः ॥
साज्य-गुडौदन - माष - कुलत्थैर्यविक - पूपलिकामिष - मद्यैः ।
संभृतिरत्र नरासनमात्रं बुद्धिमता बलिकर्मणि कार्या ॥

अथ मन्त्रः—"ॐ शिवे ज्वालामुखि बलिं च गृहाण गृहाण हूं फट् स्वाहा ।" ॐ शिवे शिवदूति भगवति चण्डे इदमर्घ्यं बलिलीला समुचितं गृहाण गृहाण आगच्छ आगच्छ वायुवेगेन शुभं कुरु कुरु स्वाहा ।" इत्यर्घ्यमंत्रः ।

ॐ नमो भगवति एनं बलिं गृह्ण गृह्ण गन्ध-पुष्प-धूपदीपादिकं दह दह पच पच घोररूपिणि भो भगवति पिवत पिवत स्वाहा—

—श्री वं रा. शा.

१. श्लोकमेतद्, क ख पुस्तकोर्नास्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"कालि कालि च वक्तव्यं ततः सा शिवरूपिणी ।
पशुरूपा समायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां मुखमुत्तोलय सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा कुलभूषण: ॥"
—कु. चू. नि. ७।४१-४२

महोत्पाते महाघोरे महारोगे[1] महाग्रहे ॥२॥
महापदि महायुद्धे महाविग्रहसंकुले[2] ।
महादारिद्र्यशमने महादुःस्वप्नदर्शने ॥३॥
महाशान्तौ महावश्ये[3] महास्वस्त्ययने तथा ।
घोराभिचारशमने[4] घोरोपद्रवनाशने ॥४॥
कूटयुद्धादिशमने[5] कूटशत्रुनिवारणे[6] ।
राजादिभयशान्तौ च राजक्रोधप्रशान्तये[7] ॥५॥
न ददाति बलिं यस्तु शिवायै शिवताप्तये ।
स पापिष्ठो नाधिकारी कुलदेव्याः समर्चने[8] ॥६॥

महोत्पाते इत्यादि—"शिवाबलिश्चेत्यारभ्य कुलदेव्या समर्चने" । इत्यन्तम् शिवाबलिप्रकरणम् । कालीपूजायाम् शिवबलिक्रिया आवश्यकी वर्तते । वीराचारे—इक्षुदण्डादिभिः वलिर्दीयते । दिव्याचारे तु—यथा—

अवश्यमन्नदानेन नियतं तोषयेच्छिवाम् ।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥
तथेयं कुलदेवीनां नित्यतः कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने ॥
शिवारावेण तस्याशु सर्वं नश्यति निश्चितम् ।"
—कु. चू त. ७।४३-४५

कुलीनं नावमन्येत् कुलज्ञं[9] परिपूजयेत् ।
कुलज्ञेषु[10] प्रसन्नेषु कालिका सन्निधिर्भवेत्[11] ॥७॥

श्वासद्वय निरोधेन कुण्डलीत्रय मेलनात् ।
यज्जीव शिवयोरैक्यं तेनामावन्तरो वलिः ॥ इति

१. महारोगे महोत्पाते महादोषे, क ख। महारोगे महादोषे, ग। महादोषे, घ। २ महा-संकुल संग्रहे क। निग्रह संकुले. ग। ३. महात्रल्ये, ख। ४ चोराभिगमने घोरे, क। ५. युद्धाभिगमने, क। ६. निपातने, क। ७. राजोपप्रव नाशने, क। ८. शिवतृप्तये, ग घ। ९. देवीवत्, क। १०. कुलज्ञेषु, क। ११. सन्निधो, क।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अहोधन्यवतां[1] लोके जानाति कुलदर्शनम् ।
तेषां मध्ये तु यः कश्चित् कुलदेवीं समर्चयेत् ॥८॥
कुलाचारविहीनो यः पूजयेत्कालिकां नरः ।
स स्वर्गमोक्षभागी च न स्यात्सत्यं न संशयः ॥६॥
आयुरारोग्यमैश्वर्यं बलं पुष्टिं महद्यशः ।
कवित्वं भुक्तिमुक्ती च कालिकापादपूजनात् ॥१०॥
शुक्लेन ध्यान योगेन कविता वशवर्तिनी ।
पीतेन ध्यानयोगेन स्तम्भयेदखिलं जगत् ॥११॥
कृष्णाभा शत्रुमारणे धूम्राभा वैरनिग्रहे ॥११½॥
अनया विद्यया मन्त्री स्पृशेत् पातकिनं यदि ॥१२॥
स तु संस्पर्शमात्रेण वह्नि सौधीं निराकुलम् ।
कुमारी पूजनं कुर्यात् सर्वधर्म-फलाप्तये ॥१३॥

अनया इत्यादि—अनया-द्वाविंशत्याक्षरात्मिकया विद्यया इत्यर्थः । कुमारीपूजनस्यावश्यकतामाहः—

कुमारीं पूजयेद् यत्नैर्द्रव्यैर्बहुविधैरपि ।
होमादिकं तु सकलं कुमारी पूजनं विना ॥
परिपूर्णफलं नैव सकलं पूजनं भवेत् ।
ततः सकलसिद्ध्यर्थं कुमारीं तु प्रपूजयेत् ॥
—बृ नी. तं ७।२४०–२४१

कुमारीयजन-विस्तृतविधिः बृ. नी. तन्त्रे द्रष्टव्यः ।

भैरव उवाच—

अथान्यत् सम्प्रवक्ष्यामि प्रयोगं शत्रुनिग्रहम् ।
सर्वान्ते वह्निवनितां योजयित्वाऽयुतं जपेत् ॥१४॥
कालिकां[3] द्विभुजां कर्त्तृकपाले सव्यदक्षिणे[4] ।
एवं ध्यात्वा तु शत्रूणां मारणं समुपाचरेत्[5] ॥१५॥

१. अहोभाग्यवतां लोके जानाति, ख। २. नवम् श्लोक, क ख। पुस्तकयोर्नास्ति।
३. कपिलां, ख। ४. सव्य दक्षिणाम्, ख। ५. समुदाहृतम्, घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवं कालीमतं प्रोक्तं सर्वसिद्धिप्रदायकम् ।
अनया विद्यया सम्यक् साधयेत्स्व-मनीषितम् ॥१६॥
अनया विद्यया यद् यन्न साधयति[1] साधकः ।
तत्सर्वेषु तन्त्रेषु नास्ति सत्यं न संशयः ॥१७॥
कालनियन्त्रणात् काली ज्ञानतत्त्व प्रदायिनी[2]।
तस्मात्सर्वप्रयत्नेन यजेदुभयसिद्धये ॥१८॥
कालीमंत्रमिदं दिव्यं भैरवेण प्रकाशितम् ।
न कुत्रापि प्रवक्तव्यं साधकेन[3] स्वपौरुषम् ॥१९॥
एतत्तन्त्रञ्च मंत्रञ्च ध्यानञ्चैव प्रपूजनम् ।
प्रकाशात्सिद्धिहानिःस्यात् तस्याद्यत्नेन गोपयेत्।२०।
तस्मात्सर्वप्रयत्नेन गोप्तव्यां देवतागणैः ।
यथा मनुष्यो लभ्येत् तथा कार्यं महेश्वरि ॥
यो भक्तः साधयेद् ज्ञानी तस्मै नित्यं प्रकाशयेत् ॥

इति कालीतन्त्रे-परमरहस्ये कालीकल्पे-
एकादशः पटलः समाप्तः ।

समाप्तश्च प्रसादभाष्ये एकादशः पटलः ।

समाप्तञ्चेदं कालीतन्त्रम्

श्रीः

१. सिद्धिरनुष्ठितम्, ग। सिद्धेरनुष्ठितम्, घ। २. प्रदर्शिनी। ग घ। ३. साधने ख ग घ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वादशः पटलः[1]

बह्वोजनाः "प्रक्षिप्तोऽयं पटलः" इति मन्यते ।

भैरव्युवाच--

त्वयोक्तं पूजनं देव साधनेन पुरष्कृतम् ।
इदानीं श्रोतुमिच्छामि वीरनित्यक्रियां प्रभो ॥१॥

भैरव उवाच--

प्रातः कृत्यं ततो न्यासः ऋष्याद्यगाङ्गुलैरपि ।
वर्ण-व्यापक-विन्यासः पीठान्यास स्ततः परम् ॥२॥
ततो ऽन्तर्यजनं देवि योगियोगनिशा प्रिये ।

प्रातरित्यादि—प्रातः कृत्यम्—तत्र साधने केन्द्रो श्रीमान् ब्राह्मे मुहूर्त्ते उत्थाय मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तं तेजोदण्ड निभया मूलविद्यया प्रकाशितायां शिरस्सहस्रदल-कमल-कर्णिकायां नीलाम्बरं नीलमाल्यानुपलेपनं शङ्खाभरणभूषितं मुदितं द्विनेत्रं द्विभुजं शान्तं वामाङ्क पीठस्थितया वामहस्त-धृत-नील-लीला-कमलया नीलवर्णया नीलवस्त्रमाल्यानुलेपनया शक्त्या दक्षकरेणालिङ्गितं गुरुम्—

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् ।
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्त्यादिलक्षम् ॥
एकं नित्यं विमलमचलं सर्वदा साक्षिभूतम् ।
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

ॐ लं पृथिव्यात्मकं गन्धं सशक्तिकाय श्रीगुरुवे समर्पयामि नमः, गन्ध-मुद्रया । ॐ हं आकाशात्मकं पुष्प सशक्तिकाय श्रीगुरुवे समर्पयामि नमः, पुष्प-मुद्रया । ॐ यं वाय्वात्मकं धूपं सशक्तिकाय

१. द्वादश पटलन्तु—अशुद्धि बहुलः—केवलं घ पुस्तके विद्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीगुरुवे समर्पयामि नमः, धूप-मुद्रया । ॐ रं तेजोमयं दीपं सशक्तिकाय श्रीगुरुवे समर्पयामि नमः, दीप-मुद्रया । ॐ वं अमृतात्मकं नैवेद्यं सशक्तिकाय श्रीगुरुवे समर्पयामि नमः, तत्व-मुद्रया ।

ततश्च कुलक्रमेण गुरुपादुकामंत्रं जपेत् ।

तत्र—लघु पादुका मंत्रम्—ऐं ह्रीं श्रीं अमुकनन्दनाथ श्रीअमुकी अम्बा श्रीपादुकां तर्पयामि पूजयामि नमः ।

स्थूल पादुका-मंत्रम्—ऐं ह्रीं श्रीं ह स ख फ्रें ह स क्ष म ल व र यू स ह ख फ्रे ह क्ष म ल व र यीं ।

ह् सौः स्हौ अमुकनन्दनाथ श्री अमुकी अम्बा श्रीपादुकां तर्पयामि पूजयामि नमः ।

सहस्रार स्थिते गुरुचक्रस्य द्वादशदले नववारं जपेत् । ततश्च—

ॐ गुह्याति गुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ! ॥
ॐ इदं जपं श्री गुरवे समर्पयामि नमः ॥
ॐ अज्ञानातिमिरान्धस्य ज्ञानाञ्जन शलाकया ।
चक्षुरुन्मिलितं येन तस्मै श्रीगुरवे नमः ॥
ॐ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरुवे नमः ॥
ॐ गुरुर्ब्रह्मा गुर्रुविष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः ॥

इष्ट-ध्यानम्—

खड्गोद्भिन्नेन्दु-बिम्बस्रवदमृतरसा प्लाविताङ्गी त्रिनेत्रा,
सव्ये पाणौ कपालाद् गलदमृतमथो मुक्तकेशी पिवन्ती ।
दिग्वस्त्रा बद्धकाञ्ची मणिमय मुकुटाद्यैर्युता दीप्तजिह्वा,
पायात् नीलोत्पलाभा रविशशि विलसत्कुण्डलालीढ पादा ॥

इत्थं—आज्ञाचक्रे ध्यात्वा मूलमंत्र जपेत् । जपं देव्या वामहस्ते समर्प्य—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रातः स्तोत्रं पठेत्—

ॐ प्रातर्नमामि मनसा त्रिजगद्विधात्रीं कल्याणदात्रीं कमलायताक्षीम् ।
कालीं – कलानाथ – कादम्बिनीमेचक – काय – कान्तिम् ॥१॥
जगत्प्रसूते द्रुहिणो यदर्च्चाप्रहादतः पाति सुरायि हन्ता ।
अन्ते भवो हन्ति भवप्रशान्त्यै तां कालिकां प्रातरहं भजामि ॥२॥
शुभाशुभैः कर्मफलैकरनेक जन्मनि मे सञ्चरन्ता महेशि ।
माभूत्कदाचिदपि मे पशुभिश्च गोष्ठी दिवानिशं स्यात्कुल मार्ग सेवा ॥३॥
वामे प्रिया शाम्भवमार्ग निष्ठा पात्रं करे स्तोत्रमये मुखाब्जे ।
ध्यानं हृदब्जे गुरु कौल सेवा स्युर्मे महाकालि तव प्रसादात् ॥४॥
श्रीकालिमातः परमेश्वरि त्वां प्रातः सगुत्थाय नमामि नित्यम् ।
दीनोऽस्म्य नाथोऽस्मि भवातुरोऽस्मि मां पाहि संसार समुदमग्नम् ॥५॥
प्रातः स्तवं यः परदेवतायाः श्रीकालिकायाः शयनावसाने ।
नित्यं पठेत्तस्य मुखावलोकादानन्दकन्दां कुरितम्मन स्यात् ॥६॥

ततश्च—ॐ नमामि सर्वजननीं मुण्डमाला विभूषिताम् ।
महाकालयुतां घोरां कलौ जाग्रत्स्वरूपिणीम् ॥
कालिकां दक्षिणां दिव्यां त्वां नमामि विभूतये ॥

इति । नमस्कृत्य कुण्डलिनीं चिन्तयेत्—

ध्यायेत् कुण्डलिनीं देवीं स्वयंभूलिङ्गवेष्टिनीम् ।
श्यामां सूक्ष्मां सृष्टिरूपां सृष्टिस्थिति लयात्मिकाम् ॥
विश्वातीतां ज्ञानरूपां चित्तयेदूर्ध्वगामिनीम् ॥

प्रतिचक्रदले चिन्तयेत् । ततश्च—अजपाजपमाचरेत्—

सङ्कल्पम्—ॐ अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिश्वासात्मकं षट्शताधिक मेक विंशति सहस्र संख्या जपं । मूलाधार-स्वाधिष्ठान-मणिपूरानाहत विशुद्धात्रा चक्र ब्रह्मरन्ध्रस्थितेभ्यो गणपति-ब्रह्म-विष्णु-रुद्र-जीव गुरु परमात्मेभ्यः सिद्धि सरस्वती लक्ष्मी गौरी प्राण-शक्तिज्ञानशक्तिचिच्छक्ति समेतेभ्यो यथासंख्यं षट्शतं-षट्सहस्रं-षट्-सहस्रं-षट्सहस्रं सहस्रमेकं-सहस्रमेकं-सहस्रमेकं अजपागायत्री जपं प्रत्येकं निवेदयामि । इति निवेद्य । पुनरद्य प्रातःकालमारभ्य द्वितीय प्रातःकालपर्यन्तं नासापुट-निश्वासोच्छ्वास निःश्वासात्मकं षट्-शताधिक विंशति सहस्र संख्याकमजपागायत्री-जपमहोरात्रेणाहं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

करिष्ये। इति जायमानजप—सङ्कल्पं कृत्वा स्वकृत्यमाचरेत्। ततश्च प्राणायाम-विनियोग-ऋष्यादिन्यास-करन्यास - षडङ्न्यासं कृत्वा ध्यायेत्—

द्यां मूर्धानं यस्य विप्रावदन्ति रवं वै नाभिचन्द्रसूर्यो च नेत्रे।
दिग्भि श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्योऽसौ सर्वभूतान्तरात्मा।
अहं काली न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्त स्वभाववान्॥
परदेव्या हृदिस्थेन प्रेरितेन करोम्यहम्।
न मे किंचित्क्वचिद्वापि कृत्यमस्ति जगत्त्रये॥
प्रातः प्रभृति सायान्तं सायान्त प्रातरं पुनः।
यत्करोमि जगन्मातस्तदस्तु तव पूजनम्॥

त्रैलोक्य चैतन्यमये ! सुरेशि ! श्री विशालमातर्भदाज्ञैव।
प्रातः समुत्थाय तव प्रियार्थं संसारयाभामनुवर्तयिष्ये॥
ततश्चायुर्वेदोक्त दिनचर्यामाचरेदिति।
अशनमालेहनम्—"आस्वादनीयमित्यर्थः।" —सायणः

पंचमानां प्राशनं च जपो रात्रौ विधानतः॥३॥

पञ्चमानामित्यादि—पञ्चमानां प्राशनम्=पञ्चमानाम्-लता-वेष्टितक-क्षीरजलक ललाटिक अरूपगूहन जघनोपगूहन स्वरूपाण मालिङ्गनानां प्राशनम्—प्रकर्षेण अशनं सेवनमित्यर्थः। तेषां स्वरूपन्तु—

लतावेष्टितकम्—लतेव शालमावेष्टयन्ती चुम्बनार्थं मुखमवन-मेत्। उद्धृत्य मन्दसीत्कृता तमाश्रिता वा किंचिद्रामणीयकं पश्येत्त-ल्लता वेष्टितकम्॥१५.

क्षीरजलकम्—रागान्धावन पेक्षिता त्ययौ परस्पर मनुविशत इवोत्सङ्गतायाम् त्रिमुखोपविष्टायां शयने वेति क्षीरजलकम्।"१९.

लालाटिका—मुखे मुखमासज्याक्षिणी अक्ष्णोललाटेन ललाट-माहन्यात्सा ललाटिका।" २६.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अरूपगूहनम्--तन्त्रेरूपवदंशेनैकमूरूमूरूद्वयं वा सर्वप्राणं पीडयेदिति अरूपगूहनम् ।" २३.

जघनोपगूहनम्--जघनेन जघनमवपीड्य-प्रकीर्यमाण केश-हस्ता नख दर्शनप्रहरणम् चुम्बन प्रयोजनाय तदुपरि लङ्घयेत्तज्जघनोपगूहनम् ।" २४.

—कामसूत्र अ २

यथा वृक्षं लिबुजा समन्तम् परिषस्वजे ।
एवा परिषष्वजस्व मां यथा मां कामिन्यसो यथा मन्नापगा असः ॥

—अथर्व. ६।८।१

"वाञ्छं मे तन्व पादौ वाञ्छाक्ष्यौ वाञ्छं सक्थ्यौ ।
अक्ष्यौऽवृषण्यन्त्याः केशा मां ते कामेन शुष्यन्तु ॥"

——अथर्व. ६।९।१

"भगलिङ्गस्य योगेन मैथुनं यद् भवेत् प्रिये ।
तस्य नाम भवेद्देवि ! पञ्चमं परिकीर्तितम् ॥"

—समयाचारतन्त्रे

"जब वीर्य का गर्भाशय में गिरने का समय हो उस समय स्त्री-पुरुष दोनों स्थिर और नासिका के सामने नासिका, नेत्र के सामने नेत्र अर्थात् सीधा शरीर और अत्यन्त प्रसन्न चित्त रहें, डिगे नहीं ।"

—सत्यार्थ प्रकाश चतुर्थ समुल्लास

स्तोत्रपाठो यत्र यत्र तत्र समये च वरानने ।
वीर श्रद्धा तर्पणञ्च तथालापः स्त्रियामपि ॥४॥
विजयांगी कृतिश्चैव स्वसुखोद्दिशिनं तथा ।
अकाश कुलाचारे मृदुभाषा च सर्व्वतः ॥५॥
गुर्व्वनुज्ञामात्रेण सर्व्वाचारविधि प्रिये ।
एवमादीनि चान्यानि वीरनिन्दा सुव्रते ॥६॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एति परम्परया ह्येन चीने देवि प्रतिष्ठितम् ।
अन्यत्र विषयेन्नास्ति सत्यमेतद् ब्रवीमि ते ॥७॥
वामाचारः कुलाचारश्चीननाथेन शंकरात् ।
प्रकाशितः शंकरेण महारुद्रात्प्रकाशितः ॥८॥
महाचीनाधिपो देवि माहात्म्येन तयोर्द्वयोः ।
कुलाचारं कुलश्रेष्ठे वामाचारः प्रयत्नतः ॥९॥
अस्यैवाशेष महात्म्यं चीनतन्त्रे मयोदितम् ।
कुलाचारमशेषेण चीननाथेन वेत्त्यमपि ॥१०॥
यद् यद् दृष्टं श्रुतं यद् यद् गुरुः साधकवक्त्रतः ।
तत्तद् कार्यं वीरवर्य्यै स्तेन सिद्धिर्भवेत् प्रिये ॥११॥
क्वचिचण्डः क्वचिद्भंडः क्वचिद्भूत पिशाचवत् ।
क्वचिद्देवार्चनरतः क्वचित्तन्निन्दकस्तथा ॥१२॥
भवेच्छीलरतोवीरो महारुद्रस्य शाशनात् ।
यजनंच विधिं वक्ष्ये पञ्चदेव्यार्यथाविधिः ॥१३॥

पञ्चमादि–तारा उग्रतारा-एकजटा-नीलसरस्वती-महानील-सरस्वतीति पञ्चदेव्यः ।

आदौ गुरुं स्मरन् पश्चात् कुण्डलीं परिभाव्य च ।
आजिह्वान्तस्तर्पणम् भक्षयेन्नतिपूर्वकम् ॥१४॥

आदौ इत्यादि–कुण्डलीम्–

परापरेति विख्याता कुण्डली जीव संज्ञका ।
इयं नारायणी काली तारा शून्यनिवासिनी ॥
सुन्दरी रक्तकाली च महिषमर्दिनी तथा ।
परमात्वैव रामोऽयं महाविष्णुर्महाशिव ॥
निरञ्जन स्वरूपोऽयं कृष्णरूपा च तारिणी ।
आत्म प्रकाशिनी नित्या नित्यानन्द स्वरूपिणी ॥"

—वृ. नी. तं. ८।१३०–१३२

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

परिभाव्य च—

अथ वक्ष्ये महेशानि शाक्ताचारक्रमं शुभम् ।
शाक्तानां कुल सर्वस्व जानीहि नगनन्दिनी ॥
प्रातरुत्थाय मंत्रज्ञः कुलवृक्षं प्रणम्य च ।
शिरः पद्मे गुरुं ध्यात्वा तत्सुधाप्लावितं स्मरेत् ॥
मानसैरुपचारैस्तु तामाराध्य निरामयः ।
मूलादि ब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत् ॥
सूर्यकोटि प्रतीकाशां सुधाप्लावित विग्रहाम् ।
तत्प्रभा पटलं व्याप्तं स्वशरीरं विचिन्तयेत् ॥

—बृ. नी. तं. ६।६८–७१

ननु परमेश्वरी अस्मद् शरीरे एवाधिवासो क्रियते, तदा तस्या ध्यानं-पूजनं-यजनं किमर्थं क्रियते ? उच्यते—

गवां सर्पिः शरीरस्थं न करोत्यङ्गः पोषणम् ।
स्वकर्म रचितं दत्तं पुनस्तामेव पोषयेत् ॥
एवं सर्व शरीरस्था सर्पिवत् परमेश्वरी ।
विना चोपासनानां देवि न ददाति फलं नृणाम् ॥

—कु. तं. ६।७७–७८

अत एव—

अरुणं रूपिणीं कृत्वा कर्मकाण्डरता नराः ।
गवां सर्वाङ्गजं क्षीरं स्रवेत् स्तन मुखाद्यथा ॥
तथा सर्वगतो देवः प्रतिमादिषु राजते ।
आभिरूप्याच्च विम्बस्य पूजायाश्च विशेषतः ।
साधकस्य च विश्वासात् सन्निधौ देवता भवेत् ॥

—कु. तं. ६।७४–७६

कुत्र-कुत्र यजनीया सा परमेश्वरी—

लिङ्गस्थण्डिल वह्न्यम्बु सूर्यकुडच पटेषु च ।
मण्डले फलके मूर्ध्नि हृदि वा दश कीर्तिता ॥

तत्र मूर्ध्नि-हृदि च निर्गुणोपासकैः निराकारा ध्यायते । सगुणोपासका लिङ्गप्रभृतिषु साकारां ध्यायन्ति यजन्ति पूजयन्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गुरुं नत्वा तपोज्येष्ठं शक्तेर्नति परायणः ।
ज्येष्ठत्वं वा कनिष्ठत्वं कुलाचार विधानतः ॥१५॥

अभिषेक्तो गुरुः साक्षात्मंत्र भेदेन समः स्मृतः ।
अभिषेके विनाभूते प्रधानत्वं करोति यः ॥१६॥

चत्वारि तस्य नश्यन्ति आयुर्विद्या यशोबलम् ।
तद्विधिश्चोत्तरा तन्त्रे पाशवेन किमि तः ॥१७॥

वीरै ग्राह्य प्रयत्नेन हंसै क्षीरं जलद्यथा ।
आचारोऽयं शक्ति मंत्रे सर्वत्र परिकथ्यते ॥१८॥

विशेषात् कालिकातारा भैरव्यादिषुपंचसु ।
कालिका-तारिणीभेदं यः करोति स नारकी ॥१९॥

यत्र यत्र कालिकेति नाम संश्रूयते प्रिये ।
तत्र तारा विधानञ्च संयुते नात्र संशयः ॥२०॥

यद् यदन्यत् साधनं च नान्यत्रापि मोदितम् ।
तत्र सर्वं पूर्वपूर्वेण तंत्रेण ज्ञायते प्रिये ॥२१॥

न पूजा न्यास जालं वा स्त्रीणां केवलजापतः ।
सिद्धिर्भवति देवेशि कुलाचारविधानतः ॥२२॥

अथ चेत् क्रियते न्यासस्तदा शृणु विधिं प्रिये ।
ऋष्याद्यंगपीठानां न्यास कृत्वा च संस्मरेत् ॥२३॥

ततः साहमिति ध्यायेन्महाचीनमतं यथा ।
कालीतन्त्रं कौलतंत्रं तारातंत्रं तथा प्रिये ॥२४॥

चीनतंत्रं स्वतन्त्रं च युगपद् वक्रतं स्मृतम् ।
अथ यद् यन्मतं प्रोक्तं तत्पंचसु समाचरेत् ॥२५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गुरुपादप्रसादेन शुभादृष्टस्य योगतः।
आचारः प्राप्यते वीरैर्नात्र कार्यश्च संशयः॥
तदैव तुष्टा सा देवी निर्विकल्प स्वयं यदि ॥२६॥

इति श्रीकालीतन्त्रे परम गुह्याचारे द्वादशः पटलः।

वज्रं पापमहीभृतां भव-गदोद्रेकस्य सिद्धौषधम्।
मिथ्या ज्ञाननिशाविशालतमस्तिग्मांशु विम्बोदयः।
स्फूर्जत्क्लेश महीरुहां गुरुतर-ज्वाला-जटालः शिखी।
द्वारं निर्वृत्ति सद्मनां विजयते कालीति वर्णद्वयम्।

सा काली तत्त्वज्ञानरूपिणी ब्रह्ममात्रप्रकाशन दक्षेति "दक्षिणा" प्रोक्ता। अत एव "दक्षिणा काली" इति कथ्यतेऽस्माभिः। परं तत्त्वं किमिति न ज्ञायते। तथापि ऋषिभिर्बहुधा गीतम् :—

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥ —ऋ. १।१।१

किं तद् ब्रह्ममयं धाम ?

अष्टाचक्रा नवद्वारा देवानां पूरयोध्या।
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः॥
तस्मिन् हिरण्यये कोशे त्र्यक्षरे त्रिप्रतिष्ठिते।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः॥
—अथर्व. १०।२।३१–३२

अबुध्ने राजा वनस्योर्ध्वं स्तूपं ददते पूतदक्षः।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः॥
—ऋ. १।२४।७

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यस्य श्वेता बिचक्षणा तिस्रो भूमीरधिक्षितः ।
त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः,
सप्ताना मिरज्यति नभन्तामन्यके समे ॥

—ऋ. ८।४१।९

यास्तिस्त्रो रेखाः सदनानि भूस्त्रीस्त्रिविष्टपारित्त्रगुणारित्र प्रकाराः ।
एतत्रयं पूरकं पूरकाणां मंत्र प्रतते मदनो मदन्या ॥

—त्रि. उ. ५

इमां विज्ञाय सुधया मदन्ती परिसृता पर्पयन्तः स्वपीठम् ।
नाकस्य पृष्ठे महन्तो वसन्ति परं धाम त्रैपुर चा विशन्ति ॥
ज्ञातमेतन्मया देव ! त्वत्प्रसादान्महेश्वर !

स्फटिक रजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलश विद्यां ज्ञानमुद्रां कराग्रे ।
दधतमुरग कक्ष्यं चन्द्रचूडं त्रिणेत्रं,
विधृत विविधभूषं दक्षिणामूर्ति मीडे ॥

प्रसादभाष्ये द्वादश-पटलः समाप्तः ।
समाप्तञ्चेदम् "कालीतन्त्रम्"

॥ ह्रीं ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रथमं परिशिष्टम्

शाक्त-विज्ञानम्

तत्र किं नाम शक्तिः १ अत्रोच्यते—कुण्डलिन्येव शक्तिः। यथा-शक्तिःकुण्डलिनी चाद्या भ्रमरी योग दायिका ॥

अनाहता ह्यघोषा च निर्मर्यादा नदोग्दता।
शब्दब्रह्म तथा शक्ति मातृकायोनिरुत्तमा ॥
गायत्री च कला गौरी शची देवी सरस्वती।
वृषाकपायी सत्या च प्राणपत्नी यशस्विनी ॥
इन्द्रपत्नी महाधेनुरदितिर्देवनन्दिनी।
रुद्राणां जननी देवी वसूनां तु हिता यथा ॥
आदित्यानां स्वसा नाभिरमृतस्य धृतिः परा।
इडा रतिः प्रियाकारा गुरुधात्री महीयसी ॥
मही च विश्रुतिश्चैव त्रयी गौः प्राणवत्सला।
शक्तिश्च प्रकृतिश्चैव महाराज्ञी पयस्विनी ॥
तारा सीता तथा श्रीश्च कामवत्सा प्रियव्रता।
तरुणी च वरारोहा नीरूपा रूपशालिनी ॥
अम्बिका सुन्दरी ज्येष्ठा वामा घोरा मनोमयी।
सिद्धा सिद्धान्तिका योगा योगिनी योगभाविनी ॥
एवमादीनि नामानि शास्त्रे शास्त्रे मनीषिभिः।
कथितानि रहस्यानि शक्तेः सिद्धान्तपारगैः ॥

—ल. नं. ३२।१८-२६

सा च—

चैतन्यं सर्व भूतानां शब्द ब्रह्मेति मे मतिः।
तत्प्राप्य कुण्डली रूपं प्राणिनां देहमध्यगम् ॥

—शा. ति १।१३

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सा एव—

सर्वेष्वाधारपद्मेषु निश्चलैवावतिष्ठते ।
आ-वस्तिदेशादामूर्ध-ब्रह्मयानमनुव्रता ।
एकेयमुज्ज्वला दीप्ता पावना च यशस्विनी ।।
ब्रह्मरन्ध्राद्विनिष्क्रान्ता महापद्ममुपेयुषी ।
ओत प्रोतात्मिका सेयं परमानन्द वर्त्मनि ।।
विलाप्य मार्त्यवं रूपममृतं प्लावयेन्नरम् ।
मन्त्राणां मन्मयानां नाम हि मंत्रैर्विष्णुमयैः सह ।।

—ल. त. ३२।५८–६०

कथलाल्पावयतीत्याह—

द्विसप्तत्या सहस्रेण नाडीनां देहसागरम् ।
तर्पयामि रसैनिरियं प्राणानां प्रेरणावशात् ।।

—ल. तं. ५०।१५०

देहे द्वासप्ततिर्नडचः तंत्रशास्त्रे प्रसिद्धाः । देहस्य सागरत्वेन, नाडीनां नदीत्वेन, प्राणानां वायुत्वेन, रसानां जलत्वेन चाध्यवसायो विवक्षितः ।

अतएवोक्तम्—

"सैषा कुण्डलिनी शक्तिर्यस्या कुण्डलितं जगत् ।"

—ल. तं. २६।१५

तत्स्वरूपन्त—

त्रिकोणोन्तर्गतां वलयाकाररूपिणीम् ।
स ब्रह्मा स शिवः साक्षात्स शूरः परमोत्तमः ।।
स एव विष्णुः सः प्राणः स कालाग्निः स चन्द्रमा ।
कुल कुण्डलिनीं ध्यात्वा सर्व पापैः प्रमुच्यते ।।

—काली विलास तं. १४।४–५

सा च त्रिविधा—

सैषा शक्तिः परा दिव्या त्रिधारुपैरवस्थिता ।
स्थूल–सूक्ष्म–परत्वेन त्रैधमेतत् प्रदर्श्यते ।।

—ल. गं. ३२।२७

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेजोरूपं तु यद्रूपं सा क्रिया शक्तिरुच्यते।
सैवाग्निरुच्यते शक्ति सर्वोपलपवदाहनात्॥

—ल. तं. ३२।८

ऐश्वर्य-संमुखं रूपं भूतिर्लक्ष्मीरितीरिता।
शक्तिरैश्वर्य भूयिष्ठा सा मे सोममयी तनुः॥
अध्यात्मस्था तु सूर्याख्या पिङ्गलामार्गगामिनी।
आलोकेनाधिभूतस्या सूर्यशक्तिः प्रवर्तते॥

—ल. तं. ४१।८।१५

अध्यात्ममाधिदैवं च तथा चैवाधिभौतिकम्।
तस्या रूपत्रयं विद्ध सूर्याख्यायाः सुरेश्वरा॥

—ल. तं. ३२।१४

इच्छा क्रिया-ज्ञानमय्यास्ते इमे व्यूहजे मम।

—ल तं ३२।११

तच्छक्त विज्ञानमाह—

स्थानम् प्रवेशो रूपञ्च लक्षं लक्षणमेव च।
उत्थापनं बोधनञ्च चक्रविश्राममेव च॥
भूमिकागमनञ्चैव अन्तावस्था तथैव च।
विश्रामः परिणामश्च तथागमनमेव च॥
इति त्रयोदशविधं शाक्तं विज्ञानमुत्तमम्॥

—शा. वि. १-२

स्थानम्—

"प्राणो वा अयं सन्नाभेरिति तस्मात् नाभिस्तन्नाभेर्नाभित्वम्।"

—ऐ. १।२०

यद्वै प्राणस्यामृतमूर्ध्वं तन्नाभेरूर्ध्वैः प्राणैरूच्चरत्यथ यन्मर्त्यं पराक्तन्नाभिमत्येति। —श. ६।७।१।११

"मध्यं वै नाभिर्मध्यमभयम्।" —श. १।१।२।२३

रुद्रस्य मूत्रस्यमृतस्य नाभिः। —अथर्व. ६।४४।३

"अमृतस्य-चिरकाल जीवनस्य नाभिः बन्धकं स्थापकम्। रस शास्त्रोक्त प्रकारेण ईश्वर वीर्यस्य रसस्य आसेवनेन हि सिद्धा-अजरामरत्वं लभन्त इति।" —सायणः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

THREE-X
Two & Three Wheeler Spares

Suntex
OIL SEALS
AN ISO 9001

ESTIMATE

२६-२-2006

८:३३ से ६।३८ तक



THREE-X ELECTRONICS (INDIA)
1164/8 (Basement), Naiwala, Karol Bagh, N Delhi - 5

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रवतो नपान्नम एवास्तु तुभ्यं नमस्ते हेतये तपुषे च कृणमः ।
विद्मते धाम परमं गुहा यत् समुद्रे अन्तर्निहितासि नाभि ।।

—अथर्व. १।१३।३

"यथा देह मध्ये नाभिचक्रे सर्वा नाड्यो बद्धाः भवन्ति ।"—सायणः

रहस्य गर्भिता ऋक् । प्रसंगोपात्त पर्यजन्यः शब्दोऽपि दृष्टव्यः—

"पर्जन्यो मे मूर्ध्नि श्रितः" —तै. ३।१०।८।८

"पर्जन्यो वा अग्निः" —श. १४।६।१।१३

मूर्धानमाश्रितो वह्निः शरीरं परिपालयन् ।
प्राणो मूर्ध्नि चाग्नौ च वर्तमानो विचेष्टिते ।।

—महा. व. २१३.२

"प्राणो वा अग्निः" —श, २।२।२।१५

'तदग्निर्वै प्राणाः" —जै. उ. ४।२२।११

येन देवाः स्वऽरारुरूर्हुहित्वा शरीरममृतस्य नाभिम् ।
तेन गेष्म सुकृतस्य लोकं घर्मस्य व्रतेन तपसा यशस्यवः ।।

--अथर्व. ४।११।६

यद्यप्यात्मप्रभुशक्तिवायवः सर्वत्र देहस्थिता, तथापि प्राधान्याभिप्रायेण यथाक्रमं नाभ्यन्तं प्रकृतितत्वस्य व्याप्तिरिति नाभावशेष नाडीचक्रभूतायां प्रधान्येन आत्मा स्थितः अधोमेढ्रे तु मध्यशक्तिः । एषां चात्र स्वरूपम् अवधानैरेव सम्यगुपलभ्यते न तु पशुभिः ।

नाभ्यधो मेढ्र कन्दे च स्थिता वै नाभि मध्यतः ।
तस्माद्विनिर्गता नाड्यस्तियगूर्ध्वमधः प्रिये ।
चक्रवत् संस्थितास्तत्र प्रधाना दश नाड्यः ।।

--स्व. तं. ७।७–८

"अपानाद्वयङ्गुलादूर्ध्वमधो मेढ्रस्य तावता ।
देहमध्यं मनुष्याणाम् —त्रि. ब्रा. मंत्र भाग ६६
"ऊर्ध्वं मेढ्रादधो नाभेः कन्दयोनिः खगाण्डवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्तति ।।

—गो. सं. १।२५

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नाभि कन्दाधः स्थानं कुण्डल्या द्वयंगुलं मुने ।

—दर्शनो. नि. ४।११

"तन्मध्ये कन्दनामा च चक्रस्थानमिति स्मृतम् ।"

—सोमानन्दनाथः

प्रवेश—

"प्राणापाननिरोधेन मनस्तत्रैव निःक्षिपेत् ।
सम्यग् वायुगतिं जित्वा यावन्मध्यगतां नयेत् ।।
एष प्रवेश इत्याहु" —सोमानन्दनाथः

रूपम्—

शृङ्गाटक निभं चक्रं षडरं चापरं ध्रुवम् ।
दाडिमीकुसुमप्रख्यं कन्दं वै अति लोहितम् ।।
एतद्रूपं समाख्यातं तृतीयं चिन्तनात्मकम् ।।

—सोमानन्दनाथः

लक्षम्—

तन्मध्ये निक्षिप्पेच्चित्तं यावत्तत्र स्थिरीकृतम् ।
त्यक्त कन्दो यदा वायुस्तदा लक्षं विनिर्दिशेत् ।।

—सोमानन्दनाथः

लक्षणम्—

कन्दचक्रस्य मध्यस्था त्वनाहतमयी कला ।
अधोर्ध्वे रेखासंयुक्ता भुजङ्गःकुटिला कृति ।।
ऊर्ध्वाधो ऽवस्थितावस्था सूर्याचन्द्रमसावुभौ ।
सत्यं विराजमाना सा सहस्रार्कसमप्रभा ।।
तामेवालोकयेच्छक्तिं मनाक् कुम्भकवृत्तिना ।
एतत् लक्षणमुद्दिष्टम् ।

—सोमानन्दनाथः

प्रकाश्यं सर्ववस्तूनां विसर्ग रहितं तु या ।
शक्तिः कुण्डलिका चैव प्राण कुण्डलिका तथा ।।
विसर्ग प्रान्तदेशे तु परा कुण्डलिका मता ।
शिव व्योमेति परमं ब्रह्मात्मस्थानमुच्यते ।।

—तं. लोक. ३।१३९–१४०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सेयं क्रियात्मिका शक्ति शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्धयुपपादिका ।।

—तं. लो. ५।२८ उद्धृत वचनम्

या सा कुण्डलिनी सात्र जगद्योनिः प्रकीर्तिताः ।
तुर्यरूपा तु सा ज्ञेया जीवभूता जगत्यपि ।।
बीजरूपा समाख्याता चिद्रूपापि प्रकीर्तिता ।।

—तं. लो. ३।२६१ उद्धृत वचनम्

उत्थापनम्—

जुषद्रेचक-वृत्त्या तु मंत्रं चैव समुच्चरेत् ।
प्रबुद्धां चिन्तयेच्छक्ति दण्डवत्परमेश्वरीम् ।।
आधारमध्यादायाता सुषुम्ना मार्गमाश्रिता ।
उत्थापनं समाख्यातं बोधनं परतस्तथा ।।

— सोमानन्दनाथः

बोधनम्—

............................बोधनं परतस्तथा ।
कन्दस्थो वेधयेन्नाभि ततो हृत्स्थं पितामहम् ।
कण्ठस्थमच्युतं साक्षाद्रुद्रं तालुतले स्थितम् ।।
भ्रुवोर्मध्यगतं त्वीशं ब्रह्मद्वारे सदाशिवम् ।
बोधयित्वा व्रजेदाशु पदं चानाश्रितं शिवम् ।।
एतद्बोधन मुद्दिष्टम् ।"

—सोमा०

"एतत्त्रयसमावेशः शिवो भैरव उच्यते ।"

—तं. लो. ३।१७३

"मंत्र आत्मा तथा नाडी समरसी भवेत् ।"

—स्व. तं. ४।३०३

"नाडयाधारस्तु नादौ वै भित्त्वा सर्वमिदं जगत् ।
अधः शक्तया विनिर्गत्य ऊर्ध्वशक्तयावसानकः ।।
नाडयां ब्रह्मविले लीनस्त्वव्यक्त ध्वनिलक्षणः ।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"ब्रह्माणी त्वपरा शक्ति ब्रह्मणोत्संगगामिनी।
द्वारं सा मोक्ष मार्गस्य रोधयित्वा व्यवस्थिता ।।
त्वां भित्वा तु वरारोहे ऊर्ध्व शक्ति परांशिवाम्।
शक्ति तत्त्वात्मिकां देवीं प्रसुप्तभुजगा कृतिम् ।।"
"शक्तितत्वं समाख्यातं भुवनैराश्रितं,महत् ।
तत्त्वातीतं वरारोहे वाङ्‌मनोऽतीत गोचरम्।
अनिष्कलं चासकलं नीरूपं निर्विकल्पकम्।।
निर्द्वन्द्वं परं तत्त्वं शिवाख्यं परमं पदम् ।।"

—स्व. तं.

चक्रविश्रामणम्—

..............................चक्रविश्रामणं ततः।
"स्वाभाविकं दलं दीप्तं द्रवं स्थिरं नभोपमम् ।।
अमृतं शेखरं चैव शक्तिर्ब्रह्मा तथैव च।
बिन्दु नादं तथा प्रोक्तं चक्रद्वादशकं किल।।
वेधयन्ति क्रमाच्छक्तिश्चक्रे चक्रे प्रतिक्षणम्।
विश्रमेत्सा महादेवी चक्रविश्राम उत्तमः ।।"

—सो. मा.

भूमिकागमनम्—

हृदयं कम्पते पूर्वं तालुकद्वारमेव च।
शिरश्च भ्रमते तस्य दृष्टि-संक्रान्तिलक्षणम् ।।
एकैकं भ्रमयत्यङ्गमङ्गप्रत्यङ्गसन्धिषु।
घूर्णते हृदयं चास्य सम्यग्विद्याप्रभावतः ।।
यानि यानि विकाराणि अवस्था कुरूते सतः।
तेषु तेषु न भेतव्यं क्रीडति परमेश्वरी ।।
अमृते सेयमुन्मुत्ता विकारान् कुरूते बहून्।
मलत्रय विकारेण बहुजन्मसु यत्कृतम् ।।
धुनोति समलान् पाशात् परशक्तिसमुत्थितान्।
भूमिकागमनं प्रोक्तम् ।"

——सोमानन्द

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अन्तावस्था—

"यत्संक्रान्तौ रोमहर्षोऽश्रुपातो-
जृम्भारम्भो गद्गदा गीर्गिरोऽन्तः ।
ग्रन्थिस्फोटः स्पर्शदिव्यप्रहर्षो
विन्दुस्पदा नाभिकन्दात् स्फुरन्ति ।
अन्तावस्था समाख्याता ।"

—सोमानन्द

विश्रामम्—

....विश्रामस्त्वधुनोच्युते ।
नाभिचक्रविनिर्याता यदा शक्तिः प्रबुध्यते ॥
तदा त्वस्तमितं सर्वमक्षग्रामं बहिः स्थितम् ।
यदा सा परमाशक्ति सुलीना परमे पदे ॥
तदा न विन्दते किञ्चिद् विषयी विषयान्तरम् ।
शिवे विश्राम्यते शक्तिस्तदा विश्राम उच्यते ॥"

—सोमानन्द

यत्र विश्रमणं शक्तेर्मनस्तत्र लयं व्रजेत् ।
तदात्मा परमात्मत्वे ज्ञातव्यो निश्चितात्मभिः ॥
शिवीभूतो भवत्यात्मा परिणामः एव हि ॥

—सोमानन्दः

आगमनम्—

सदा स वर्षते दिव्यममृतं जन्तुजीवनम् ।
चित्तं तत्र तु सन्वार्य पुनर्देवी विशेत्तु सा ॥
तदा त्वागमनं प्रोक्तमेवं सम्यक् त्रयोदश ॥

—सोमानन्दः

इति शाक्त-विज्ञानम्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वितीयं परिशिष्टम्—

❀ श्रीः ❀

अथ–कवचम्

भैरव्युवाच—

काली-पूजा श्रुता नाथ ! भावाश्च विविधाः प्रभो !
इदानीं श्रोतुमिच्छमि कवचं पूर्व–सूचितम् ॥१॥
त्वमेव स्रष्टा पाता च संहर्ता त्वमेव हि।
त्वमेव शरणं नाथ ! त्राहिमाम् दुःख सङ्कटात् ॥२॥

भैरव उचाव—

रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे।
श्री जगन्मङ्गलनाम कवचं मन्त्र–विग्रहम् ॥३॥
पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्क्षणात्।
नारायणोऽपि यद् धृत्वा नारी भूत्वा महेश्वरम् ॥४॥
योगिनं क्षोभमनयत् यद् धृत्वा च रघूत्तमः।
वर तृप्तो जघानैव रावणादि निशाचरान् ॥५॥
यस्य प्रसादादीशोऽहं त्रैलोक्य विजयी विभुः।
धनाधिपः कुवेरोऽपि सुरेशोऽभूत् शचीपतिः ॥६॥
एवं हि सकला देवा सर्वसिद्धीश्वराः प्रिये।
श्री जगन्मंङ्गलस्यास्य कवचस्य ऋषिः शिवः ॥७॥
छन्दोऽनुष्टुप् देवता च कालिका दक्षिणेरिता।
जगताम्मोहनं दुष्टविजये भुक्ति-मुक्तिषु ॥८॥
योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः।
शिरोमे कालिका पातु क्रींकारै काक्षरी परा ॥९॥
क्रीं क्रीं क्रीं मे ललाटञ्च कालिका खड्गधारिणी।
हूं हूं पातु नेत्र युगं ह्रीं ह्रीं पात श्रुतिमम ॥१०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दक्षिणे कालिका पातु घ्राणयुग्मं महेश्वरी।
क्रीं क्री क्रीं रसनां पातु हुं हुं पातु कपोलकम् ॥११॥
वदनं सकलं पातु ह्रीं ह्रीं स्वाहा स्वरुपिणी।
द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखपदा ॥१२॥
खड्गमुण्डधरा काली सर्वाङ्गमभितोऽवतु।
क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयं मम ॥१३॥
ऐ हूँ ओं ऐं स्तन–द्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलम्।
अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका ॥१४॥
क्रीं क्रीं हूं हूं ह्रीं ह्रींकारी पातु षडक्षरी मम।
क्रीं नाभिमध्यदेशञ्च दक्षिणे कालिकाऽवतु ॥१५॥
क्रीं स्वाहा पातु पृष्ठञ्च कालिका सा दशाक्षरी।
क्रों मे गुह्यं पातु सदा कालिकायै नमस्ततः ॥१६॥
सप्ताक्षरी महाविद्या सर्वतंत्रेषु गोपिता।
ह्रीं ह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयम् ॥१७॥
काली दशाक्षरी विद्या स्वाहा मां उरुयुग्मकम्।
ॐ क्रीं क्रों में स्वाहा पातु कालिका जानुनी सदा ॥१८॥
काली हृन्नाम विद्येयं ञ्चतुवर्गफलप्रदा।
क्रीं क्रां ह्रीं ह्रीं पातु सागुल्फ दक्षिणोऽव ॥१९॥
क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम।
खड्ग मुण्ड धरा काली वरदा भय हारिणी ॥२०॥
विद्याभिस्सकलाभिः सा सर्याङ्गमभितोऽवतु।
काली कपालिनी कुल्ला कुरु कुल्ला विरोधिनी ॥२१॥
विप्रचित्ता तथोग्रप्रभा दीप्ता घनत्विषा।
नीला घना बलाका च मात्रा मुद्रा मिता च माम् ॥२२॥
एतास्सर्वा खड्गधरा मुण्डमाला विभूषणा।
रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा ॥२३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माहेश्वरी च चामुण्ड़ा कौमारी चा पराजिता ।
वाराही नारसिंही च सर्वाश्चामितभूषणाः ॥२४॥
रक्षन्तु स्वामुधैर्दिक्षु विदिक्षु मां यथा तथा ।
इति ते कक्षितं दिव्यं कवचं परमाद्भुतम् ॥२५॥
श्री जगन्मङ्गलन्नाम महाविद्यौग्ध विग्रहम् ।
त्रैल्लेक्याकर्षणं ब्रह्मन् कवचं मन्मुखोदितम् ॥२६॥
गुरु पूजां विधायाथ विधिवत्प्रपठेत्ततः ।
कवचं त्रिः सवृद्वापि यावज्जीवञ्च वा पुनः ॥२७॥
एतच्छत्तार्धमावृत्य त्रैलोक्य विजयी भवेत् ।
त्रैलोक्यं क्षोभयत्वेव कवचस्य प्रसादतः ॥२८॥
महाकविर्भवन्यासं सर्वसिद्धीश्वरो भवेत् ।
पुष्पाञ्जलीन्कालिकायै मूलेनैव वार्पयेत् सकृन् ॥२९॥
शतवर्षसहस्राणां पूजायां: फलमाप्नुमान् ।
भूर्जे विलिखञ्चैवत्स्वर्णस्थं धारमेर्द्यादि ॥३०॥
विशाखयान्दक्षवाहौ कण्ठे वा धारमेद्यदि ।
त्रैलोक्यं मोहयेत्क्रोधात् त्रैलोक्ञ्चूर्णयेत्क्षणात् ॥३१॥
पुत्रवान् धनवान् श्रीमान् नानाविद्यानिधिर्भवेत् ।
ब्रह्मस्त्रादीनि शस्त्राणि तद् गात्र स्पर्शनात्ततः ॥३२॥
नाशमायान्ति या नारी वन्ध्या वा मृतपुत्रिणो ।
वह्लपत्या जीवितोका भवत्येव न संशयः ॥३३॥
न देयं परशिच्येभ्यो ह्यभक्तेभ्यो विशेषतः ।
शिष्येभ्यो भक्ति युक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् ॥३४॥
स्पर्धमुद्भूय कमला वाग्देवी मन्दिरे सुखे ।
पौत्रान्तं स्थैर्ममास्थाय निवसत्येव निश्चितम् ॥३५॥
इदङ्कवचमज्ञात्वा यो भजेद् घोर दक्षिणाम् ।
शत् लक्षं प्रजत्प्वावापि तस्य विद्या न सिद्धयति ।
सहस्रघातमाप्नौति सोऽचिरान्मृत्युमाप्नुयात् ॥३६॥
इति कालिका-तंत्रे कवचं सम्पूर्णम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

❀ श्री ❀

अथ शतनाम

भैरव उवाच—

शतनाम प्रवक्ष्यामि कालिकाया वरानने ।
यस्य प्रपठनाद्वाग्मी सर्व्वत्र विजयी भवेत् ॥१॥
काली कपालिनी कान्ता कामदा काम सुन्दरी ।
कालरात्रिः कालिका च काल भैरव पूजिता ॥२॥
कुरुकुल्ला कामिनी च कमनीय स्वभाविनी ।
कुलीना कुलकर्त्री च कुलवर्त्मप्रकाशिनी ॥३॥
कस्तूरीरसनीला च काम्या कामस्वरूपिणी ।
ककारवर्णनिलया कामधेनुः करालिका ॥४॥
कुलकान्ता करालास्या कामार्ता च कलावती ।
कृशोदरी च कामाख्या कौमारी कुल पालिनी ॥५॥
कुलजा कुलकन्या च कलहा कुलपूजिता ।
कामेश्वरी कामकान्ता कुञ्जरेश्वर गामिनी ॥६॥
कामदात्री कामहर्त्री कृष्णा चैव कपर्द्दिनी ।
कुमुदा कृष्णदेहा च कालिन्दी कुल पूजिता ॥७॥
काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा ।
क्रींरूपा कुलगम्या च कमला कृष्ण पूजिता ॥८॥
कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी ।
कम्बुकण्ठी कौलिनी च कुमुदा काम जीविनी ॥९॥
कुलस्त्री कीर्तिका कृत्या कीर्तिश्च कुलपालिका ।
कामदेवकला कल्पलता कामाङ्गवर्द्धिनी ॥१०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुन्ता च कुमुदप्रीता कदम्व कुसुमोत्सुका।
कादम्बिनी कमलिनी कृष्णानन्द प्रदायिनी ॥११॥
कुमारीपूजनरता कुमारीगणशोभिता।
कुमारीरञ्जनरता कुमारीव्रतधारिणी ॥१२॥
कङ्काली कमनीया च कामशास्त्राविशारदा।
कपालखट्वाङ्गधरा कालभैरवरूपिणी ॥१३॥
कोटरी कोटराक्षी च काशी कैलासवासिनी।
कात्यायिनी कार्य्यकरी काव्यशास्त्र प्रमोदिनी ॥१४॥
कामाकर्षणरूपा च कामपीठनिवासिनी।
कङ्गिनी काकिनी क्रीडा कुत्सिता कलहप्रिया ॥१५॥
कुण्डगोलोद्भवप्राणा कौशिकी कीर्तिवर्द्धिनी।
कुम्भस्तनी कटाक्षा च कोकनदप्रिया ॥१६॥
कान्तारवासिनी कान्तिः कठिना कृष्णवल्लभा।
इति ते कथितन्देवि गुह्याद्गुह्यतरम् परम् ॥१७॥
प्रपठेद्य इदन्नित्यङ्कालीनाम् शताष्टकम्।
त्रिषु लोकेषु देवेशि तस्यां साध्यन्न विद्यते ॥१८॥
प्रातः काले च मध्यान्हे सायान्हे च सदा निशि।
यः पठेत्परया भक्त्या कालीनाम शताष्टकम् ॥१९॥
कालिका तस्य गेहे च संस्थानङ्कुरुते सदा।
शून्यागारे श्मशाने वा प्रान्तरे जलमध्यतः ॥२०॥
वन्हिमध्ये च सङ्ग्रामे तथा प्राणस्य संशये।
शताष्टकञ्जपन्मन्त्री लभते क्षेममुत्रमम् ॥२१॥
कालीं संस्थाप्य विधिवत्स्तुत्वा नाम शताष्टकैः।
साधकस्सिद्धिमाप्नोति कालिकायाः प्रसादतः ॥२२॥

इत्यष्टोत्तर शतनाम समाप्तम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

❀ श्रीः ❀

अथ काली सहस्रनाम

ओ३म अस्य श्री सर्व-साम्राज्यमेघानामका तीरूप-
ककारात्मक–सहस्रनाम–स्तोत्र–मन्त्रस्य—

महाकाल ऋषि :—अनुष्टुप् छन्दः श्री दक्षिणमहाकालीदेवता, ह्री बीजम्, हूंशक्तिः, क्रीं कीलकम्, काली वरदानाद्यखिलेष्टार्थं जपे विनियोगः ।

ओं क्रीं काली क्रं करालो च कल्याणी कमला कला ।
कलावती कलाढ्या च कलापूज्या कलात्मिका ॥१॥
कलादृष्टा कलापुष्टा कलामस्ता कलाधरा ।
कलाकोटि–समाभासा कलाकोटि प्रपूजिता ॥२॥
कलाकर्म–कलाधारा कलापरा कलागमा ।
कलाधारा कमलिनी ककरा करुणा कविः ॥३॥
ककारवर्णसर्वाङ्गी कलाकोटि प्रभूषिता ।
ककारकोटि गुणिता ककार कोटि भूषणा ॥४॥
ककारवर्ण हृदया ककारमनुमण्डिता ।
ककारवर्णनिलया काकशब्दपरायणा ॥५॥
काकारवर्णभुकुटा ककारवर्णभूषणा ।
ककारवर्णरूपा च ककशब्दपरायणा ॥६॥
ककवीरास्फालरता कमला–कर–पूजिता ।
कमला करनाथा च कमला कर रूपधृिक् ॥७॥
कमला कर सिद्धिस्था कमला कर पारदा ।
कमला–कर–मध्यस्था कमला–कर–तोषिता ॥८॥
कथङ्कारपरालापा कथङ्कारपरायणा ।
कथङ्कार–पदान्तस्था कथङ्कार–पदार्थभूः ॥९॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कमलाक्षी कमलजा कमलाक्ष-प्रपूजिता ।
कमलाक्ष-वरोद्युक्ता ककरा कर्बुराक्षरा ॥१०॥
करतारा करच्छिन्ना करश्यामा करार्णवा ।
करपूज्या कररता करदा करपूजिता ॥११॥
करतोया करामर्षा कर्मनाशा करप्रिया ।
करप्राणा करकजा करका करकान्तरा ॥१२॥
ककारचलरूपा च ककराचल-शोभिनी ।
करकाचलपुत्री च करकाचल-तोषिता ॥१३॥
करकाचलगेहस्था करकचल-रक्षिणी ।
करकाचलसम्मान्या करकाचलकारिणी ॥१४॥
करकाचल वर्षाढ्या करकाचल रञ्जिता ।
करकाचलकान्तारा करकाचलमालिनी ॥१५॥
करकाचलभोज्या च करकाचल रूपिणी ।
करामलकसंस्था च करामलसिद्धिदा ॥१६॥
करामलकसम्पूज्या करामलकतारिणी ।
करामलककाली च करामलरोचिनी ॥१७॥
करामलकमाता च करामलकसेविनी ।
करामलकवद्ध्येया करामलकदायिनी ॥१८॥
कञ्जनेत्रा कञ्जगति कञ्जस्या कञ्जधारिणी ।
कञ्जमाला प्रियकरी कञ्जरूपा च कञ्जना ॥१९॥
कञ्जाति — कञ्जगति — कञ्जहोमपरायणा ।
कञ्जमण्डलमध्यस्था कञ्जाभरणभूषिता ॥२०॥
कञ्जसम्माननिरता कञ्जोत्पत्ति परायणा ।
कञ्जराशिसमाकारा कञ्जारण्यनिवासिनी ॥२१॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

करञ्जवृक्षमध्यस्था करञ्जवृक्षवासिनी ।
करञ्जफलभूषाढ्या करञ्जारण्यवासिनी ॥२२॥
करञ्जमालाभरणा करवाल परायणा ।
करवालप्रहृष्टात्मा करवालप्रियागति ॥२३॥
करवालप्रियाकन्या करवालविहारिणी ।
करवालमयीकर्मा करवालप्रियङ्करी ॥२४॥
कबन्धमालाभरणा कबन्धराशिमध्यगा ।
कबन्ध कूट संस्थाना कबन्धानन्त भूषणा ॥२५॥
कबन्धानादसन्तुष्टा कबन्धासनधरिणी ।
कबन्धगृहमध्यस्या कबन्धवनवासिनी ॥२६॥
कबन्धकाञ्चीकरणी कबन्धराशिभूषणा ।
कबन्धमालाजयदा कबन्धदेह धारिणी ॥२७॥
कबन्धासन मान्या च कपालमाल्यधारिणी ।
कपालमालामध्यस्था कपालव्रततोषिता ॥२८॥
कपाल–दीप–सन्तुष्टा कपालदीपरूपिणी ।
कपालदीपवरदा कपालकज्जलस्थिता ॥२९॥
कपालमालाजयदा कपालजयतोषिणी ।
कपालसिद्धिसंहृष्टा कपालभोजनोद्यता ॥३०॥
कपालव्रतसंस्थाना कपाल कमलालया ।
कवित्वामृतसारा च कवित्वामृतसागरा ॥३१॥
कवित्वसिद्धि संहृष्टा कवित्वादान कारिणी ।
कविपूज्या कविगतिः कविरूपा कविप्रिया ॥३२॥
कविब्रह्मानन्द रूपा कवित्वव्रततोषिता ।
कवि मानस संस्थाना कविवाञ्च्छा प्रपूरिणी ॥३३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कवि–कण्ठ–स्थिता कं ह्रीं कं कं कं कविपूर्तिदा ।
कज्जला कज्जलादानमानसा कज्जलप्रिया ॥३४॥
कपालकज्जलसमा कज्जलेशप्रपूरिता ।
कज्जलार्णमध्यस्था कज्जलानन्दरूपिणी ॥३५॥
कज्जलप्रियसन्तुष्टा कज्जलप्रियतोषिणी ।
कपालमालाभरणा कपालकरभूषणा ॥३६॥
कपाल–कर–भूषाढचा कपाल–चक्र–मण्डिता।
कपालकोटि–निलया कपाल–दुर्ग–कारिणी ॥३७॥
कपालगिरि–संस्थाना कपाल चक्रवासिनी ।
कपाल–पात्र–सन्तुष्टा कपालार्घ्यपरायणा ॥३८॥
कपालार्धप्रियप्राणा कपालार्घ्यवरप्रदा ।
कपाल–चक्र–रूपा च कपालरूपमात्रगा ॥३९॥
कदली कदलीरूपा कदली–वन–वासिनी ।
कदलीपुष्पसम्प्रीता कदलीफलमानसा ॥४०॥
कदली–होम–संतुष्टा कदली दर्शनोद्यता ।
कदलीगर्भमध्यस्था कदलीवनसुन्दरी ॥४१॥
कदम्बपुष्पनिलया कदम्बवनमध्यगा ।
कदम्बकुसुमामोदा कदम्बवनतोषिणी ॥४२॥
कदम्ब–पुष्प–सम्पूज्या कदम्ब–पुष्पहोमदा ।
कदम्ब–पुष्प–मध्यस्था कदम्बफल भोजिनी ॥४३॥
कदम्बकाननांतःस्था कदम्बाचलवासिनी ।
कक्षपा कक्षपाराध्या कक्षापासनसंस्थिता ॥४४॥
कर्णपूरा कर्णमासा कर्णाढचा काल–भैरवी ।
कलप्रीता कलहदा कलहा कलहातुरा ॥४५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्णयक्षी कर्णवार्ता कथिनि कर्णसुन्दरी ।
कर्ण-पिशाचिनी कर्णमञ्जरी कपिकक्षदा ॥४६॥
कविकक्षाविरूपाठ्या कविकक्षस्वरूपिणी ।
कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी ॥४७॥
कस्तूरीमृगसन्तोषा कस्तूरीमृगमध्यगा ।
कस्तूरीरसनीलाङ्गी कस्तूरीगन्धतोषिता ॥४८॥
कस्तूरी-पूजक-प्राणा कस्तूरी-पूजक-प्रिया ।
कस्तूरी-प्रेम-सन्तुष्टा कस्तूरी-प्रेम-धारिणी ॥४९॥
कस्तूरीपूजकानन्दा कस्तूरी-गन्धरूपिणी ।
कस्तूरी-मालिका-रूपा कस्तूरीभोजनप्रिया ॥५०॥
कस्तूरी-तिलकानन्दा कस्तूरीतिलकप्रिया ।
कस्तूरीहोमसन्तुष्टा कस्तूरी तर्पणोद्यता ॥५१॥
कस्तूरी-मार्जनोद्युक्ता कस्तूरीचक्रपूजिता ।
कस्तूरी-पुष्प-सम्पूज्या कस्तूरी-चर्वणोद्यता ॥५२॥
कस्तूरी-गर्भ-मध्यस्था कस्तूरीवस्त्रधारिणी ।
कस्तूरीकामोदरता कस्तूरी-वन-वासिनी ॥५३॥
कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी ।
कस्तूरीशक्तिनिलया कस्तूरी-शक्ति-कुण्डगा ॥५४॥
कस्तूरी-कुण्ड-संस्थाना कस्तूरी-कुण्ड-मज्जना ।
कस्तूरीजीवसन्तुष्टा कस्तूरी-जीव-धारिणी ॥५५॥
कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा ।
कस्तूरीजातिभावस्था कस्तूरी-गन्ध-चुम्बना ॥५६॥
कस्तूरीगन्धसंशोभा विराजित कपालभूः ।
कस्तूरी मदनान्तःस्था कस्तूरीमदहर्षदा ॥५७॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कस्तूरो-कविता-नाढ्या कस्तूरी-गृहमध्यगा ।
कस्तूरीस्पर्शक प्राणा कस्तूरीविन्दकान्तका ॥५८॥
कस्तूर्य्यामोदरसिका कस्तूरी-क्रीडनोद्यता ।
कस्तूरी-दान-निरता कस्तूरी-वर-दायिनी ॥५६॥
कस्तूरी स्थापनासक्ता कस्तूरी-स्थान-रञ्जिनी ।
कस्तूरीकुशलप्रश्ना कस्तूरी-स्तुति-वन्दिता ॥६०॥
कस्तूरी-वन्दकाराध्या कस्तूरीस्थानवासिनी ।
कहरूपा कहाढ्या च कहानन्दा कहात्मभूः ॥६१॥
कहपूज्या कहात्याढ्या कहहेया कहात्मिका ।
कहमाला कण्ठभूषा कहमंत्रजपोद्यता ॥६२॥
कहनामस्मृतिपरा कहनामपरायणा ।
कहपरायणरता कहदेवी कहेश्वरी ॥६३॥
कहहेतु कहानन्दा कहनादपरायणा ।
कहमाता कहान्तस्था कहमंत्रा कहेश्वरा ॥६४॥
कहगेया कहाराध्या कहध्यान परायणा ।
कहतंत्रा कहकहा कहचर्यापरायणा ॥६५॥
कहाचारा कहगतिः कह-ताण्डव-कारिणी ।
कहारण्या कहगतिः कहशक्तिपरायणा ॥६६॥
कहराज्यनता कर्म-साक्षिणी कर्मसुन्दरी ।
कर्म-विद्या कर्मगति कर्मतंत्रपरायणा ॥६७॥
कर्ममात्रा कर्मगात्रा कर्मधर्मपरायणा ।
कर्म-रेखानाशकर्त्री कर्म-रेखा-विनोदिनी ॥६८॥
कर्म-रेखा-मोहकारी कर्मकीर्तिपरायणा ।
कर्मविद्या कर्मसारा कर्मधारा च कर्मभूः ॥६९॥
कर्मकारी कर्महारी कर्म्म-कौतुक-सुन्दरी ।
कर्मकाली कर्म्मतारा कर्म्मच्छिन्ना च कर्मदा ॥७०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्म्म चाण्डालिनी कर्म्मवेदमाता च कर्म्मभूः ।
कर्म्मकाण्डरतानन्ता कर्मकाण्डानुमानिता ।।७१।।
कर्म्मकाण्डपरिणाहा कमठी कमठाकृतिः ।
कमठाराध्यहृदया कमठा कण्ठसुन्दरी ।।७२।।
कमठासन-संसेव्या कमठी कर्म्मतत्परा ।
करुणाकारकान्ता च करुणाकरवन्दिता ।।७३।।
कठोराकरमाला च कठोर-कुच-धारिणी ।
कपर्द्दिनी कपटिनी कठिनी कङ्क-भूषणा ।।७४।।
करभोरु कठिनदा करभा करभालया ।
कलभाषामयी कल्पा कल्पना कल्पदायिनी ।।७५।।
कमलस्था कलामाला कमलास्या क्वणत्प्रभा ।
ककुद्मिनी कष्टवती करणीय कथार्चिता ।।७६।।
कचार्चिता कचतनु कचसुन्दरधारिणी ।
कठोरकुच-संलग्ना कटि-सूत्र-विराजिता ।।७७।।
कर्ण-भक्ष-प्रिया कन्दा कथा कन्दगतिः कलिः ।
कलिघ्नी कलिदूति च कविनायकपूजिता ।।७८।।
कण-कक्षा-नियन्त्री च कश्चित् कविरार्चितता ।
कर्त्री च कर्तृराभूषा करिणी कर्ण्णशत्रुपा ।।७९।।
करणेशी करणपा कलवाचा कलानिधिः ।
कलना कलनाधारा कलना कारिका करा ।।८०।।
कलगेया कर्कराशिः कर्कराशिप्रपूजिता ।
कन्याराशिः कन्यका च कन्यकाप्रियभाषिणी ।।८१।।
कन्यकादानसन्तुष्टा कन्यकादानतोषिणी ।
कन्यादान-करानन्दा कन्यादानग्रहेष्टदा ।।८२।।
कर्ष्णाकक्षदहना कामिता कमलासना ।
करमालानन्दकर्त्री करमाला-प्रमोषिता ।।८३।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

करमालाशयानन्दा करमालासमागमा ।
करमालासिद्धिदात्री करमालाकरप्रिया ॥८४॥
करप्रिया कररता करदान–परायणा ।
कलानन्दा कलिगतिः कलिपूज्या कलिप्रसूः ॥८५॥
कलनादनिनादस्था कलनादवरप्रदा ।
कलनादसमाजस्था कहोला च कहोलदा ॥८६॥
कहोलगेहमध्यस्था कहोलवरवरदायिनी ।
कहोल कविताधारा कहोल–ऋषि–मानिता ॥८७॥
कहोल मानसाराध्या कहोल–वाक्य–कारिणी ।
कर्तृरूपा कर्तृमयी कर्तृमाता च कर्त्तरी ॥८८॥
कनीया कनकाराध्या कनीनकमयी तथा ।
कनीयानन्दनिलया कनकानन्द तोषिता ॥८९॥
कनीयककराकाष्ठा कथार्णवकरी करी ।
करिगम्या करिगतिः करिध्वजपरायणा ॥९०॥
करिनाथप्रिया कण्ठा कथानकाप्रतोषिता ।
कमनीया कमनका कमनीय–विभूषणा ॥९१॥
कमनीयसमाजस्था कमनीयव्रतप्रिया ।
कमनीयगुणाराध्या कपिला कपिलेश्वरी ॥९२॥
कपिलाराध्यहृदया कपिलप्रियवादिनी ।
कह–चक्र-मन्त्रवर्णा कहचक्र–प्रसूनका ॥९३॥
क ए ईल् ह्रीं स्वरूपा च कए ईल् ह्रीं वरप्रदा ।
क ए ईल् ह्रीं सिद्धिदात्री क ए इल् ह्रीं स्वरूपिणी ॥९४॥
क ए ईल् ह्रीं मंत्रवर्णा क ए ईल् ह्रीं प्रसूकला ।
कवर्गा च कपाटस्था कपाटोद्घाटनक्षमा ॥९५॥
कङ्काली च कपाली च कङ्कालप्रियभाषिणी ।
कङ्कालभैरवाराध्या कङ्कालमानसस्थिता ॥९६॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्म्म चाण्डालिनी कर्म्मवेदमाता च कर्म्मभूः ।
कर्म्मकाण्डरतानन्ता कर्मकाण्डानुमानिता ॥७१॥
कर्म्मकाण्डपरिणाहा कमठी कमठाकृतिः ।
कमठाराध्यहृदया कमठा कण्ठसुन्दरी ॥७२॥
कमठासन-संसेव्या कमठी कर्म्मतत्परा ।
करुणाकारकान्ता च करुणाकरवन्दिता ॥७३॥
कठोराकरमाला च कठोर-कुच-धारिणी ।
कपर्द्दिनी कपटिनी कठिनी कङ्क-भूषणा ॥७४॥
करभोरु कठिनदा करभा करभालया ।
कलभाषामयी कल्पा कल्पना कल्पदायिनी ॥७५॥
कमलस्था कलामाला कमलास्या क्वणत्प्रभा ।
ककुद्मिनी कष्टवती करणीय कथार्चिता ॥७६॥
कचार्चिता कचतनु कचसुन्दरधारिणी ।
कठोरकुच-संलग्ना कटि-सूत्र-विराजिता ॥७७॥
कर्ण-भक्ष-प्रिया कन्दा कथा कन्दगतिः कलिः ।
कलिघ्नी कलिदूति च कविनायकपूजिता ॥७८॥
कण-कक्षा-नियन्त्री च कश्चित् कविरार्चितता ।
कर्त्री च कर्तृराभूषा करिणी कर्णशत्रुपा ॥७९॥
करणेशी करणपा कलवाचा कलानिधिः ।
कलना कलनाधारा कलना कारिका करा ॥८०॥
कलगेया कर्कराशिः कर्कराशिप्रपूजिता ।
कन्याराशिः कन्यका च कन्यकाप्रियभाषिणी ॥८१॥
कन्यकादानसन्तुष्टा कन्यकादानतोषिणी ।
कन्यादान-करानन्दा कन्यादानगृहेष्टदा ॥८२॥
कर्ष्पणाकक्षदहना कामिता कमलासना ।
करमालानन्दकर्त्री करमाला-प्रमोषिता ॥८३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

करमालाशयानन्दा करमालासमागमा।
करमालासिद्धिदात्री करमालाकरप्रिया ॥८४॥
करप्रिया कररता करदान–परायणा।
कलानन्दा कलिगतिः कलिपूज्या कलिप्रसूः ॥८५॥
कलनादनिनादस्था कलनादवरप्रदा।
कलनादसमाजस्था कहोला च कहोलदा ॥८६॥
कहोलगेहमध्यस्था कहोलवरवरदायिनी।
कहोल कविताधारा कहोल–ऋषि–मानिता ॥८७॥
कहोल मानसाराध्या कहोल–वाक्य–कारिणी।
कर्तृरूपा कर्तृमयी कर्तृमाता च कर्त्तरी ॥८८॥
कनीया कनकाराध्या कनीनकमयी तथा।
कनीयानन्दनिलया कनकानन्द तोषिता ॥८९॥
कनीयककराकाष्ठा कथार्णवकरी करी।
करिगम्या करिगतिः करिध्वजपरायणा ॥९०॥
करिनाथप्रिया कण्ठा कथानकाप्रतोषिता।
कमनीया कमनका कमनीय–विभूषणा ॥९१॥
कमनीयसमाजस्था कमनीयव्रतप्रिया।
कमनीयगुणाराध्या कपिला कपिलेश्वरी ॥९२॥
कपिलाराध्यहृदया कपिलप्रियवादिनी।
कह–चक्र–मन्त्रवर्णा कहचक्र–प्रसूनका ॥९३॥
क ए ईल् ह्रीं स्वरूपा च कए ईल् ह्रीं वरप्रदा।
क ए ईल् ह्रीं सिद्धिदात्री क ए इल् ह्रीं स्वरूपिणी ॥९४॥
क ए ईल् ह्रीं मंत्रवर्णा क ए ईल् ह्रीं प्रसूकला।
कवर्गा च कपाटस्था कपाटोद्घाटनक्षमा ॥९५॥
कङ्काली च कपाली च कङ्कालप्रियभाषिणी।
कङ्कालभैरवाराध्या कङ्कालमानसस्थिता ॥९६॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कङ्कालमोहनिरता कङ्कालमोहदायिनी ।
कलुषघ्नी कलुषहा कलुषार्त्तिविनाशिनी ॥९७॥
कलिपुष्पा कलादाना कशिपुः कश्यपार्चिता ।
कश्यपा कश्यपाराध्या कलिपूर्ण कलेवरा ॥९८॥
कलेवरकरी काञ्ची कवर्गा च करालका ।
करालभैरवाराध्मा करालभैरवेश्वरी ॥९९॥
कराला कलनावारा कपर्द्दीशवरप्रदा ।
कपर्द्दीशप्रेमलता कर्पार्द्दमालिकायुता ॥१००॥
कर्पार्द्दजपमालाढ्या करवीरप्रसूनदा ।
करवीरप्रियप्राणा करवीरप्रपूजिता ॥१०१॥
कर्णिकार समाकारा कर्णिकार प्रपूजिता ।
करिषाग्निस्थिता कर्ष्णाकर्ष्मात्रसुवर्णदा ॥१०२॥
कलशा कलशाराध्या कषाया करिगानदा ।
कपिला कलकण्ठी च कलिकल्पलतामता ॥१०३॥
कल्पलता कल्पमाता कल्पकारी च कल्प भूः ।
कपूर्रामोदरुचिरा कर्पूरामोदधारिणी ॥१०४॥
कर्पूरमालाभरणा कर्पूरवासपूर्तिदा ।
कर्पूरमालाजयप्रदा कर्पूरार्णव–मध्यगा ॥१०५॥
कर्पूरतर्पणरता कटकाम्बरधारिणी ।
कपटेश्वरसम्पूज्या कपटेश्वररूपिणी ॥१०६॥
कटुःकविध्वजाराध्या कलापुष्पधारिणी ।
कला–पुष्प–रुचिरा कलापपुष्पपूजिता ॥१०७॥
क्रकचा क्रकचा–राध्या कथम्ब्रूमा करालता ।
कथङ्कारविनिर्मुक्ता काली काल क्रिया क्रतुः ॥१०८॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कामिनी कामिनीपूज्या कामिनीपुष्पधारिणी।
कामिकी-पुष्प-निलया कामिनी-पुष्प-पूर्णिमा ॥१०९॥
कामिनी पुष्प पूजार्हा कामिनीपुष्पभूषणा।
कामिनी-पुष्प-तिलका कामिनीकुण्डचुम्बना ॥११०॥
कामिनीयोणसन्तुष्टा कामिनी-योग-भोगदा।
कामिनी कुण्ड सम्मग्ना कामिनी-कुण्ड-मध्यगा ॥१११॥
कामिनी-मानसा-राध्या कामिनीमानतोषिता।
कामिनीमानसञ्चारा कालिकाकालकाकिभा ॥११२॥
कामा च कामदेवी च कामेशी कामसम्मदा।
काममात्रा कामरता कामार्त्ता काममञ्जरी ॥११३॥
काममञ्जीररणिता कामदेव-प्रियान्तरा।
कामकाली कामकला कालिका कमलार्चिता ॥११४॥
कादिका कमला काली कालानल-समप्रभा।
कल्पान्तादहनाकान्ता कान्तार-प्रियवासिनी ॥११५॥
कालपूज्या कालरता कालमाता च कासिनी।
कालवीरा कालघोरा कालसिद्धा च कालदा ॥११६॥
कालाञ्जनसमाकारा कालञ्जरनिवासिनी।
काल ऋद्धि कालवृद्धि कारागृहविनोदिनी ॥११७॥
कादिविद्या कादिमाता कादिस्था कादिसुन्दरी।
काशी काञ्ची च काञ्चीशा काशीश-वरदायिनी ॥११८॥
क्रीमबीजा चैव क्रामबीजा हृदयाय नमस्कृता। याय-नमः
काम्या काम्यगति काम्य सिद्धदात्री च कामभूः ॥११९॥
कामाख्या कामरूपा च कामचापविमोचिनी।
कामदेवकलारामा कामदेवकलालया ॥१२०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कामरात्रिः कामदात्री कान्ताराचलवासिनी ।
कामरूपा कालगति कामयोगपरायणा ॥१२१॥
कामसम्मर्द्दनरता कामगेह विकाशिनी ।
कालभैरवभार्या च कालभैरवकामिनी ॥१२२॥
काल–भैरव–योगस्था काल–भैरव–भोगदा ।
कामधेनु कामदोग्ध्री काममाता च कान्तिदा ॥१२३॥
कामुका कामुकाराध्या कामुकानन्दवर्द्धिनी ।
कार्तवीर्या कार्तिकेया कार्तिकेय–प्रपूजिता ॥१२४॥
कार्या कारणदा कार्यकारिणी कारणान्तरा ।
कान्तिगम्या कान्तिमयी कात्या कात्यायनी चक ॥१२५॥
कामसारा च काश्मीरा काश्मीराचारतत्परा ।
कामरूपाचाररता कामरूपप्रियंददा ॥१२६॥
कामरूपाचारसिद्धि कामरूपमनोमयी ।
कार्त्तिकी कार्त्तिकाराध्या काञ्चनारप्रसूनभूः ॥१२७॥
काञ्चनकार प्रसूनानां काञ्चनारप्रपूजिता ।
काञ्चरूपा काञ्चभूमि कास्यपातु प्रभोजिनी ॥१२८॥
कांस्यध्वनिमयी काम–सुन्दरी कामचुम्बना ।
काशपुष्पप्रतीकाशा कामद्रुमसमागणा ॥१२९॥
कामपुष्पा कामभूमि कामपूज्या च कामदा ।
कामदेहा कामगेहा कामबीजपरायणा ॥१३०॥
कामध्वजसमारुढा कामध्वजसमास्थिता ।
काश्यपी कश्यपाराध्या काश्यपानन्ददायिनी ॥१३१॥
कालिन्दीजल संकाशा कालिन्दीजलपूजिता ।
कामदेवपूजानिरता कामदेवपरमार्थदा ॥१३२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कार्मणा कार्मणाकारा काम कार्मण कारिणी।
कार्मण त्रोटनकरी काकिनी कारणह्वया ॥१३३॥
काव्यामृता च कालिङ्गा कालिन्ङ्ग-मर्द नोद्यता।
काला-गुरु-विभूषिाढ्या काला-गुरु-विभूतिदा ॥१३४॥
काला-गुरु-सुगन्धा च काला-गुरु-प्रतर्पणा।
कावेरीनीरसम्प्रीता कावेरीतीरवासिनी ॥१३५॥
कालचक्रभ्रमाकारा कालचक्रनिवासिनी।
कानना काननाधारा कारु कारुणिकामयी ॥१३६॥
कम्पिल्यवासिनी काष्ठा कामपत्नी च कामभूः।
कादम्बरीपानरता तथा कादम्बरीकला ॥१३७॥
कामवन्द्या च कामेशी कामराजप्रपूजिता।
कामराजेश्वरीविद्या कामकौतुकसुन्दरी ॥१३८॥
काम्बोजजा काञ्चिनदा कांस्यकाञ्चनकारिणी।
काञ्चनाद्रिसमाकारा काञ्चनाद्रि-प्रदानदा ॥१३९॥
कामकीर्ति कामकेशी कारीका कायराश्रन्या।
कामभेदी च कामार्तिनाशिनी कामभूमिका ॥१४०॥
कालनिर्णासिनी काव्यवनिता कामरूपिणी।
कायस्था कामकामसन्दीप्ति काव्यदा कालसुन्दरी ॥१४१॥
कामेशी कारणवरा कामेशी पूजनोद्यता।
काञ्चीनूपूरभूषाढ्या कङ्कुमाभेरणंन्विता ॥१४२॥
कालचक्रा कालगति कालचक्रामनोभवा।
कुन्दमध्या कुन्दपुष्पा कुन्दपुष्पप्रिया कुजा ॥१४३॥
कुजमाता कुजाराध्या कुठारवरधारिणी।
कुञ्जरस्था कुशरथा कुशेशय-विलोचना ॥१४४॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुनठी कुररी कुद्रा कुरंगी कुटजाश्रया ।
कुम्भीनसविभूषा च कुम्भीनस वधोद्यता ।।१४५।।
कुम्भकरणमनोल्लासा कूल–चूड़ा–मणिकुला ।
कुलालगृह–कन्या च कुलचूड़ामणिप्रिया ।।१४६।।
कुलपूज्याकुलाराध्या कुलपूजापरायणा ।
कुलभूषा तथा कुक्षि कुररी–गणसेविता ।।१४७।।
कुलपुष्पा कुलरता कुलपुष्पपरायणा ।
कुलवस्त्रा कुलाराध्या कुल-कुण्ड समप्रभा ।।१४८।।
कुलकुण्डसमोल्लासा कुण्डपुष्पपरायणा ।
कुण्डपुष्पप्रसन्नास्या कुण्डगोलोन्दवात्मिका ।।१४९।।
कुण्ड गोलोदध्वाधारा कुण्डगोलमयी कुहूः ।
कुण्डगोलप्रियप्राणा कुण्ड–गोल–प्रपूजिता ।।१५०।।
कुण्डगोलमन्नोल्लासा कुण्डगोलबलप्रदा ।
कुण्डदेवरता क्रुद्धा कुलसिद्धीकरापरा ।।१५१।।
कुलकुण्डसमाकारा कुलकुण्डसमानुभूः ।
कुण्डसिद्धि कुण्डऋद्धि कुमारी–पूजनोद्यता ।।१५२।।
कुमारीपूजकप्राणा कुमारीपूजकालया ।
कुमारी–काम–सन्तुष्टा कुमारीपूजनोत्सुका ।।१५३।।
कुमारी–व्रत–सन्तुष्टा कुमारीरूपधारिणी ।
कुमारीभोजनप्रीता कुमारी च कुमारदा ।।१५४।।
कुमारमाता कुलदा कुलयोनि कुलेश्वरी ।
कुललिङ्गा कुलानन्दा कुलरम्या कुतर्कधक् ।।१५५।।
कुन्ती च कुलकान्ता च कुलमार्गपरायणा ।
कुल्ला च कुरुकुलला कुल्लु कुल कामदा ।।१५६।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुलिशाङ्गी कुब्जिका च कुब्जिकानन्दवर्धिनी ।
कुलीना कुञ्जरगति- कुञ्जरेश्वरगामिनी ॥१५७॥
कुलपाली कुलवती तथैव कुलदीपिका ।
कुलयोगेश्वरी कुण्डा कुङ्कमारुणविग्रहा ॥१५८॥
कुङ्कुमानन्दसन्तोषा कुङ्कुमार्णववासिनी ।
कुसुमा कुसुमप्रीता कुलभूः कुलसुन्दरी ॥१५९॥
कुमुद्वती कुमुदिनी कुशला कुलटालया ।
कुलटालयमध्यस्था कुलटासङ्गतोषिता ॥१६०॥
कुलटाभवनोद्युक्ता कुशावर्ता कुलार्णवा ।
कुलार्णवचाररता कुण्डली कुण्डला कृतिः ॥१६१॥
कुमरि च कुलश्रेष्ठा कुलचक्रपरायणा ।
कूटस्था कूटदृष्टिश्च कुन्तलाकृति ॥१६२॥
कुशलाकृतिरूपा च कूचबीजधरा च कूः ।
कुं कुं कुं कुं शब्दरता कूं कूं कूं कूम्परायणा ।१६३॥
कुं कुं कुं शब्दनिलया कुक्कुरालयवासिनी ।
कुक्कुरासङ्गसंगसंयुक्ता कुक्कुरानन्तविग्रहा ॥१६४॥
कूर्चारारम्भ कूर्चबीणा कूर्च्चजापरायणा ।
कुचस्पर्शन सन्तुष्टा कुचालिङ्गनहर्षदा ॥१६५॥
कुगतिघ्नी कुवेराच्र्या कुचभूः कुलनायिका ।
कुगायिना कुचधरा कुमाता कुन्ददन्तिनी ॥१६६॥
कुगेया कुगरा कुहरा भाषा कुगेया कुघ्नदारिका ।
कीर्तः किरातिनी विलन्ना क्लिन्नारा कन्नरीक्रिया ॥१६७॥
क्रीङ्कारा क्रीञ्जपासक्ता क्रीं हूं स्त्रीं मंत्ररूपिणी ।
किर्म्मीरितदृशापाङ्गी किशोरी च किरीटनी ॥१६८॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कीटभाषा कीटयोनि: कीटमाता च कीटदा।
किंशुका कीरभाषा च क्रियासारा क्रियावती ॥१६९॥
कीं कीं शब्दपरा क्लीं क्लीं क्लूं क्लैं क्लौं मन्त्ररूपिणी।
कां कीं कूं कें स्वरूपा च क–फट् मंत्र स्वरूपिणो ॥१७०॥

केतकीभूषणानन्दा केतकीभरणान्विता।
कैकदा केशिनी केशी केशीसूदनतत्परा ॥१७१॥

केशरूपा केशमुक्ता कैकेयी कोशिकी तथा।
कैरवा कैरवाल्हादा केशरा कु केतुरूपिणी ॥१७२॥
केशवाराध्यहृदया केशवासक्तमानसा।
क्लैव्यविनाशिनी क्लैञ्च क्लैम्बीजजपतोषिता ॥१७३॥

कौशल्या कौशलाक्षी च कोशा च कोमला तथा।
कोलापुरनिवासा च कोलासुरविनाशिनी ॥१७४॥

कोटिरूपा कोटिरता क्रोधिनी क्रोधरूपिणी।
केका च कोकिला कोटिः कोटिमंत्रपरायणा ॥१७५॥

कोटचनन्तमंत्रयुक्ता कैरूपा कैरलाश्रया।
केरलाचारनिपुणा केरलेन्द्रगृहस्थिता ॥१७६॥
केदराश्रमसंस्था च केदारेश्वरपूजिता।
क्रोधरूपा क्रोधपदा क्रोधमाता च कौशिकी ॥१७७॥

कोदण्डधारिणीक्रौञ्चा कौशिल्या कौलमार्गगा:।
कौलिनी कौलिकाराध्या कौलिकागार वासिनी ॥१७८॥

कौतुकी कौमुदी कोला कुमारी कोरवार्चिता।
कौण्डिन्या कौशिकी क्रोधाज्वालाभासुर रूपिणी ॥१७९॥

कोटिकालानलज्वाला कोटिमार्तण्डविग्रहा।
कृत्तिका कृष्णवर्णा च कृष्णकृत्या क्रियातुरा ॥१८०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृशाङ्गी कृतकृत्या च कृ-फट् स्वाहारूपिणी।
क्रौं क्रौं हूँ फट् मंत्रवर्णा क्रीं ह्लीं हूं फट् नमस्स्वधा ॥१८१॥

क्रीं क्रीं ह्लीं ह्लीं तथा हूं हूं फट् स्वाहा मन्त्ररूपिणी।
इति श्री सर्व साम्राज्य मेधानाम सहस्रस्त्रम् ॥१८२॥

सुन्दरी शक्तिदानाख्य-स्वरूपाभिधिमेव च।
कथिन्दक्षिणाकाल्याः सुन्दर्य्यै प्रीतियोगतः ॥१॥

वरदानप्रसङ्गेन रहस्यमपि दर्शितम्।
गोपनीयम् सदा भक्त्या पठनीयं परात्परम् ॥२॥

प्रातर्म्मध्यान्हकाले च मध्यार्धरात्र्योरपि।
यज्ञकाले जपान्ते च पठनीयं विशेषतः ॥३॥

विद्याराज्ञीं तु सम्पूज्य पठेन्नाम सहस्रस्त्रम्।
अष्टोत्तर शतैर्योनि प्रमंत्र्या चुम्बव्य यत्नतः ॥४॥

संयोगी भूयः जप्तव्यं सर्वविद्याधिपो भवेत्।
योनीं वीक्ष जपेत्स्तोत्रं कुवेराधिको भवेत् ॥५॥

इति श्री काली तंत्रे काली सहस्रनाम स्तोत्रम् समाप्तम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

❀ श्री ❀

महाकाल विरचितः

KALIKA-TANTRAM

कर्पूर--स्तवः

ॐ अस्य श्रीकर्पूरस्तवराजस्य, महाकाल ऋषिः, गायत्री छन्दः, श्रीदक्षिणकालिका देवता, हलो बीजानि, स्वराः शक्तयः, अव्यक्तं कीलकं, श्रीदक्षिणकालिका—देवता–प्रसाद–प्राप्त्यर्थं विनियोगः ।

(1)

कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दुवामाक्षियुक्तं,
बीजं ते मातरेतत् त्रिपुरहरवधु त्रिःकृतं ये जपन्ति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छंदं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥१॥

O Mother "Dakshina Kalika" !

Any devotee who recites your "Beej Mantra" "Krim" in triplicate manner that is repeating it in three Times as "Krim, Krim, Kr m" may have the "Anima Mahima" etc eight sidhees. the supernatural power, without any efforts, also can speak any languege very flunetly in a correct form. He can recite prose and poetry very clearly and fluently.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Gist :—

A meditator becomes powerfull in all respects by doing the "Jap" of "Krim Beej".

Commentry :—

This "Shloka" describes the importance of the "Beej Mantra" of Mother "Dakshina Kali" because in "Tantrik Sadhna" only the "Beej Mantras" are so powerful. The meditator can achieve the miraculous power by repeating only the 'Beej Mantra". Without "Beej Mantra" no "Mantra" can give success of any Kind."

(2)

ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन् महेशि,
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ।
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-
वृन्दं चन्द्रार्धचूडे प्रभवति स महाघोरशावावतंसे ॥ २ ॥

O Maheshi ! O Chandrardh-Choode,
O Ghor Shavabtanse !

If even a dullard once recites your second "Beej" "Hoom" by repeating it two times as "Hoom Hoom" may become a man of sharp intellect, so that he behaves like a wiseman. He Commands over a language and he also becomes a rich man. Several beautiful ladies are attracted by him.

Commentry :—

By reciting this "Beej Mantra" the devotee may have a handsome appearance (attractive personality), may become world wise and richman also. This mantra is specially useful for the family man.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"For detailed study of it, please see "Saral Yog".

(3)

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो,
वीजं ते द्वन्द्वमन्यद् विगलितचिकुरे कालिके ये जपन्ति ।
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमभितो वश्यभावं नयन्ति,
सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे कालिकेति ।। ३ ।।

O Dakshina Kalika, having your hairs lying upon your back !

He who recites your third "Beej" "Hreem" in thrice as "Hreem, Hreem, Hreem," becomes enemyless, and he never meets with unsucces. His opponents are sure to see their destruction. The meditator becomes so powerful, that he can control all the three worlds. This Mantra provides three types of power as physical spritual and financial also. At the same time the "sadhak" acquires the power of heart, words and deeds.

(4)

ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं ततोऽधः,
सव्येऽभीतिं वंर च त्रिजगदघहरे दक्षिणे कालिके च ।
जप्त्वैतन् नाम ये वा तव विमल तनुं भावयन्त्येतदम्ब,
तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ।। ५ ।।

O You remover of the sins of three worlds !

O mother with visible teeth.

A meditator who recites your name "Dakshina Kalika" with a meditation of your four handed idol, he is awarded all the eight sidhees Anima, Mahima Laghima, Garima etc.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

The four handed statue is as follow :—

(1) The left hand raised upward holding a sword.

(2) The other left hand going downwards holding a head smeared with blood.

3. The right hand raised upwards showing the symbol of fearlessness.

(4) The right hand going downwards with a state of Veridiction.

(5)

वर्गाद्यं वह्निसंस्थं विधुरतिलालितं तत्त्रयं कूर्चयुग्मं,
लज्जाद्वन्द्वं च पश्चात् स्मितमुखि तदधष्ठद्वयं योजयित्वा ।
मातर्ये त्वां जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं,
ते लक्ष्मी लास्यलीलाकमलादलादृशः कामरूपा भवन्ति ।।६।।

O mother with smiling face !

Any devotee meditating upon your face recites your complete Mantra Consisting of the following nine letters, that is :—

"Krim, Krim, Krim, Hoom, Hoom, Hoom, Hreem, Hreem, Hreem, Swaha."

He may have the mercy of Goddness of wealth (Lakshmi ji) his eyes becomes beautiful like a special kind of lotus and he is blessed with an extraoridinary handsome face like Kamdeo, the god of love.

Commentry :—

It is fact that the "Kalika Mantra" is formed with the above mentioned nine letters, which are very powerful to do any impossible thing possible and possible can be made impossible.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(6)

प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति।
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे,
वाग्देवी, देवि मुण्डस्रगति शय लसत्कण्ठि पीठस्तनाढ्ये ॥६॥

O with a garland of heads, you look very much Gracious !

A devotee having fixed his attention upon your face, recites the first, second or third "Beej" of your Mantra with an addition of your name as "Dakshin Kalike" or he recites your full mantra of nine letters with an addition of your above written name, his eyes become the abode of the goddess of wealth (Laxmiji) and his mouth becomes house of the goddess of learning (Sarswati ji).

Commentry :—

Here is the importance of the name "Dakshin Kalika" because by adding it to any part of complete mantra which is of nine letters. By doing such practice the devotee can have wealth and the knowledge of every thing.

(7)

गतासूनां बाहुप्रकरकृतकाञ्ची—परिलसन्,
नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम्।
श्मसानस्थे तल्पे शवहृदि महाकालसुरत—
प्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ॥८॥

O mother you are creator of the three worlds and you are tripled eyed !

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Your hips are encircled by the heads, even then you are without clothes that is Digambara. You are seated on the chest of dead body of "Mahadeo" in the grave yard land and you are enjoying the sexual pleasure with the "Mahakal".

Even a worldly sensual engrossed person beeing a devotee of yours can acquire the power of wonderful poetic art.

(8)

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं संकीर्णायां प्रकटितचितायां हरवधूम् ।
प्रविष्टां सन्तुष्टा मुपरि सुरतेनाति युवतीं,
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८॥

O Mother,

The place where dead bodies are burnt, is full of the heads of dead bodies and skeltons. It is also echoed with the horrible cries of foxes. There is a burning dead body and you are embracing the 'Mahakal' upto your fullest satisfaction, you appear to be an youthful lady. A devotee of your such state never happens to see his disgrace and defeat.

Commentry :—

The above described position of mother "Dakshin Kali" is particularly to defeat the enemies and opponents.

(9)

वदामस्ते किंवा जननि वयमुच्चैर्जडधियो,
न धाता नापीशो हरिरपि न ते वेत्ति परमम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्मानममिते,
तदेतत् क्षन्तव्यं न खलु पशुरोष समुचितः ॥१०॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

O mother, thou art not even within the reach of "Brahma, Vishnu and Mahesh, because your "Param Tatwa" is not known o them. Then how can it be possible for us, who have very limited knowledge, to know your importance because you are limitless and your knowledge is quiteunlimited. Allthough we are, by all means, unable to worship you, yet we worship by expressing our heartful thoughts in regard of your praise and worth. The lack of worship on our part may become the cause of your anger, but a mother is always to exuse her children. We the wordly people are like animals, hence it is not proper to become angry with us.

Commentry :—

The mother is almighty and her power is limitless (Aseem) while we the all worldly creatures are limited (Saseem) hence a limited knowledge can not be able to reach the power of a limitless.

(10)

समन्तादापीनस्तनजघनदृग्यौवनवती—
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलित चिकुरस्तस्य वशगाः
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥१०॥

O Mother !

If any devotee, being in a position of having the sexual pleasure with beautiful young lady, who has been blessed with hard chest, fatty thighs and large eyes, recites your Mantra or meditates upon you as having your hair in disorder, your body uncovered with no clothes and having meditation upon your

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

'Yoni' while reciting your mantra at night, he becomes influencial, a learned scholar with poetic talent and being blessed with. He controls all the powerful creation of God.

Commentry :—

Only those persons, who have no "Tantrik" knowledge may laugh at this, but it is fact and based on experience that any devotee can be successful in such type of devotion provided he acts according to rules of "Tantra Sashtra" under the guidance of some able Guru. Without a help of a guru no devotee can be successful in meditation (Upasana).

(11)

समाः स्वस्थीभूतां जपति विपरीतां यदि सदा,
विचिन्त्य त्वां ध्यायन्नतिशय–महाकालसुरताम् ।
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः,
कराम्भोजे वश्या हरवधु महासिद्धिनिवहा ॥११॥

O the wife of lord shiva !

A devotee having full concentration upon you as being embraced with lord shiva, he becomes a learned scholar and all types of power lie under his control. He can do any thing in this world.

Commentry :—

Here the attention has been given to the complete concentration, because it is the most essential factor for devotees. Without it no devotee can be successfull.

(12)

प्रसूते संसारं जननि जगतीं पालयति च,
समस्तं क्षित्यादि प्रलयसमये संहरति च ।
अतस्त्वां धाताऽपि त्रिभुवनपतिः श्रीपतिरपि,
महेशोऽपि प्रायः सकलमपि किं स्तौति भवतीम् ॥१२॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

O Mother !

It is you who creats the world, protects the world and destroys the same at the time of its complete destruction 'Pralaya' therefore even Brahma, Vishnu and Mahesh can not pray you.

Then what to say of man having little knowledge like my self. It means thc mother goddess is so powerfull that no power can be compared with her.

(13)

अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्,
विमूढास्ते मातः किमपि नहि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरञ्च्यादिविबुधैः,
प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम् ॥१३॥

O the mother of whole world !

You contantly remain engrossed in sexual pleasure that is called 'Maha Anand' The greatest pleasure because no other sense or worldly thought is to disturb in this samadhi. you are the first creator of the both.

Many other persons, who are stupids and do not know your unexpressable influence become the devotee of other gods. But they are not aware the fact that their deveted gods as Brahma, Vishnu and Mahesh are also the true devotees of the mother.

Commentry :—

The true meditation, here has been compared with the sexual pleasure in which a man becomes a thoughtess and forgets even his own existence.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(14)

धरित्री कीलालं शुचिरपि समीरोऽपि गगनं,
त्वमेका कल्याणी गिरिशरमणी कालीसकलम्।
स्तुतिः का ते मातर्निजकरुणया मामगतिकं,
प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४॥

O Mother !

This world has been composed of the five elements and they are—

(1) Earth (2) Water (3) Fire (4) Air (5) Sky. But you are to control all the five elements.

So how can I be able to make prayers to you hence kindly be merciful and pleased with me, because it is not possible for me to pray you in the right form. Therefore only your mercy can make me able to achieve salvation(Moksha). If you are so please it is sure that salvation can be achived and the soul can be freed for ever from death and rebirth in this world.

Commentry :—

Here the mother has been depicted superior to all the elements and the human beings hence only the mercy of her is requested for achieving the solvation (Moksha) in the world.

(15)

श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः,
सहस्रं तु अर्काणां निजगलितवीर्येण कुसुमम्।
जपंस्तत् प्रत्येकं मनुमपि तव ध्यान निरतो,
महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥१५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

O Mother Maha Kali !

Any one of your devotees, being naked and having his hair lying loosely upon his head sits for meditation in a place where dead bodies are burnt to ashes and recites your Mantra having fixed his eyes upon your face and pats one thousand flowers of calotropis with his semen on the altar's burning fire, becomes the owner of the whole earth. It means he becomes such a powerful man that he can command the whole world.

(16)

गृहे संमार्जन्या परिगलितवीर्यं हि चिकुरं,
समूलं मध्याह्ने वितरति चितायां कुजदिने ।
समुच्चार्य प्रेम्णा मनुमपि सकृत् कालि सततं,
गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥१६॥

O Kali !

Any one who often taking out his hair with the help of a brush and smeared them with his semen, puts them into the fire in the midnight of Monday and while putting them goes on to recite the Mantras, with devotion, becomes a great poet, the owner of land thus enjoys the pleasure of riding an elephant. In other words the meditator becomes learned and prosperous.

(17)

स्वपुष्पैराकीर्णं कुसुमधनुषोमन्दिरमहो,
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम् ।
स गन्धर्वश्रेणीपतिरपि कवित्वामृत नदी–
नदीनः पर्यन्ते परमपदलीनः प्रभवति ॥१७॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

O mother of the whole world !

Any of your devotees recites your Mantra thiking continuously of sexual position he becomes the perfect musician and the sea of the rivers of poetic genious and in the end he gets the supreme glory—enjoys the hevenly bliss forever.

